चतुर्थीषष्ठीबहुवचनैः सहवस्नसौ वान्नावित्यत्र द्वित्वे वान्नाविति द्वितीयाचतुर्थीषष्ठीद्विवचनैः सह वान्नावौ ॥ तेमेइत्यत्र ङेङ
सौ बेमेत्वामाइत्यत्र अमात्वामेति त्वामादेशौ ॥ २२॥ ॥ महर्षयोस्माननुशिष्टकृत्यं देवाः समेमापरिरक्षतेति ॥ विप्रावराणां प्रपु
नीत चेतिसूर्येशमायेतिचवागिदानीं ॥ २३॥ ॥ इदानीं प्रभाते वाक्वाणी ब्रूते अर्थाद्धार्मिकाणां ॥ कथंकथमित्याह ॥ हेमहर्षयो

स्मान् रूत्यं धर्मकार्यमनुशिक्षोपदिशतेतीति रत्राध्याहार्यः ॥ तथा हे वा अर्हदादयः सर्वे सर्वे मामां परिरक्षत संसारपावेभ्यः पातेति ॥
तथा हे विभावरास्नानक्रियाभ्यां श्रेष्ठा यूयं मा मां प्रपुनीताशीर्वाददानपूर्वमरतकोपरि मंत्रपूतदूर्वाक्षतक्षेपादिना पवित्रयतेति ॥ च त
था हे सूर्य ईश स्वामिन् मामाम न रक्षेति ॥ धार्मिका हि प्रातर्धर्मश्रवणादिवां छंतीति हर्षयोऽस्मा नित्यत्रासदिवेत्यादिना मेऽव्ययदस्या
सत्वं ॥ देवाः सर्वे मा विभावरामामित्यत्र जस्वीत्यादिना मेऽव्यविशेष्यस्य वासत्वं ॥ सूर्येशमावेत्यत्र नान्यादिति असत्वनिषेधः ॥ २३ ॥
नखास्तवाहोरासि वाक्षिमांव तुभ्यं शपे स्मास्मित वानपेक्षा ॥ किमीक्षसेमां व्रजतां विमुंच मामित्यभीकं प्रतिवाक्किाचित् ॥ २४ ॥
अभीकं प्रभाते नुनयं तकामुकं प्रति सपत्नीनखक्षतदर्शनात् कुपिता काचित्कामिनी वक्ति ॥ कथमित्याह ॥ अहे ति साभ्यसू
ये संबोधने ॥ अह अरे धृष्ट तवोरसि वक्षसि नखा नखक्षतानि संति आः कष्टं च त्वं पुनर्मां वक्षि भणसि यदुत तुभ्यं शपे त्वमेव मच्चि
त्ते वर्तस इत्यर्थे तव प्रत्ययार्थं माचारिशपथान् करोमीत्यर्थ इति यतस्त्वमीदृशोऽत अश्वास्मि अहं तव नविद्यते ऽपेक्षा आकांक्षा य
स्याः साऽनपेक्षा वाऽन्यापेक्षे त्वया मम न प्रयोजनमित्यर्थः ॥ एवं चास्थिते मां किमीक्षसे किं चिंतयसि व्रजतां स्वमनोभिप्रेतां मन्त्वप
त्नीं ॥ विमुंच त्यज मामिति तुभ्यं शपे ॥ मामित्यभीकामित्यत्र पादादौ रिति नेमादेशाभावः वाक्षिमांव नखास्तवाहेत्यत्र चाहाहेत्या
दिना मा ते आदेशाभावः ॥ किमीक्षसेमामित्यत्र दृश्यर्थैश्चिंतायामिति मादेशाभावः ॥ २४ ॥ ॥ यूयमन्नसुस्नाइ तिवोऽलसत्वं वयंनु
सुस्नाइ तिनः पटुत्वं ॥ यूयं हि कांतास्त्वादिना वई युर्वयं न कांतारूत्वादिना न औ इश्नन् ॥ २५ ॥ यूयं सुमृख्यो हि न देष युष्मान् दुनोति भानुर्न
वयं सुमृख्यः ॥ तदेष नास्मांसुरतीति काकूक्तयः सखीनामुदिता इदानीं ॥ २६ ॥ ॥ इदानीं प्रभाते सखीनां काकूक्तयः का
कु वक्रो क्त्यासोपहासं भाणितय उदिता विजृंभिताः ॥ कथमित्याह हे सख्यो हि यस्माद्यूयं कांताः सौंदर्यपात्रं ततस्माद्वो युष्माक
मि नाभर्तारो वो युष्मानीयुः रंतुमागताः ॥ वयं न कांतास्त्वादिना न औ इश्नन् ॥ वयमपि कांता एवेत्यस्मद्भर्तारोऽप्यस्मान् रंतुमागता ए
वेत्यर्थो तदेव हे सख्यो यूयमन्नसुस्नाः सकला यां निशि निरंतररमणक्रियया न शयिता इति हे वो वो युष्माकमलसत्वमपा वं वयं तु सुस्ना ८
इति नः पटुत्वं यूयमिव वयमपि रात्रौ न सुस्ना अतस्त्वन्यमस्माकमप्यपाटवमस्तीत्यर्थः तथा हि यस्मात् यूयं सुमृख्यो भर्तृप्रसादे
न सदा सुखितत्वात् सुकुमारांग्यस्तस्माद्वो वो देष प्राभातिको पि भानुर्युष्मान्दुनोति पीडयति ॥ न वयं हि मृख्य अतदेष नास्मांसुद

नि यूयमिव वयमपि मृख्य एवातोऽस्मानप्येष भानुस्तुदतीत्यर्थ इति ॥ एतेन यथा वयं भालस्यं सुखस्तातपं चाविगणय सर्वप्राभातिकक
त्येषूत्सहामहे तथा यूयमप्युत्सहध्वमिति सखीभिर्व्यज्यत इत्यर्थः ॥ इति यः इति नइत्यत्र नित्यमन्वादेश इति नित्यं वस्नसौ ॥ तदिना
वः तदेष युष्मान् न दिनानः तदेष नास्मान् इत्यत्र सपूर्वादित्यादिना वावस्नसौ ॥ २६ ॥ ॥ पात्रन्नयैतच्च चयेन देते नार्घ्य भजेने
न बलिं न देहि ॥ जुहूस्रुचावानयतावदेते अथैनयोः प्रक्षिप सर्पिराशु ॥ २७ ॥ कुंडं खनेदं परिलिंपचैनदिदं फलं धेत्यथ होमयेनन् ॥
इदं सदैनेन यजस्व श्रौदेनयोः श्रुतं सत्कुरु चैनयोस्तत् ॥ २८ ॥ व्रजेम कस्मा यथदेहि चास्मा येते भयो थैषु नतिं कुरुष्व ॥ अन्योन्य
मित्यादिशतां द्विजानाममूर्गिरोब्रह्मपुरीषिदानीं ॥ २९ ॥ इदानीं प्रभाते ब्रह्मपुरीषु द्विजानां याज्ञिकानां अमूः प्रत्यक्षा गिरः आज्ञावाण्यो पुरी
वर्तते यतोऽन्योन्यमादिशतां कथमित्याह हे द्विजे तत्प्रत्यक्षं पात्रं यज्ञभाजनं नय जलस्थानादि प्रापय ततू एन देव पात्रं शीघ्रं चय जलक्षा
लनादिना पवित्रीकुरु तथा हे द्विजैनेन पात्रेणार्घ्यं पूजोपकरणं पुष्पफलादि भज गृहाणेत्यर्थः ॥ ततोनेनैव पात्रेणेश्वरेंद्रादिभ्यो बलिमुपहारं
देहि तथा एते जुहूस्रुचौ जुहूरुत्तरास्रुकूतोगोबलीवर्दन्यायेन स्रुक्शब्देनाधरास्रुगुच्यते द्वंद्वे जुहूस्रुचा वुत्तराधरस्रुचौ तावादिति प्रक्र
मे आनय । अथानंतरमेनयोरुत्तराधरस्रुचोराशु शीघ्रं होमाय सर्पिः प्रक्षिप ॥ तथा इदं कुंडं खन पुरोवर्तिनीं भूमिं मार्गाद्याधानार्थं
खननेन कुंडाकारां कुर्वित्यर्थः ॥ ततू एतदेव कुंडं परिलिंपच समंताल्लिंपस्व च ॥ तथेदं फलमाम्रादि धेहि पाणौ धर ॥ अथानंतरमे
नमेव फलहोमयजुहुधि ॥ तथेदं दधि सततू यतनेन तोनेनैव दर्भाय जस्व यागं कुरु ॥ तथा नयोर्यापजूक्रमः श्रुतं वेदादि शास्त्रसारं यद्वर्तते
श्रुतवंतावेतावित्यर्थः ॥ ततस्माद्धेतोरनयोः सत्कुरु संमानय ॥ अनयोरित्यत्र संबंधषष्ठीविषयसप्तमी वा ॥ तथेम कस्मै व्रजदे
शांतरागतत्वादृश्यानभिमं दूरस्थं प्रत्यक्षं द्विजमानेतुं गच्छ ॥ गम्यस्याप्य इति चतुर्थी ॥ अथानयनानंतरमस्मा ये वागतान द्विनायदे
हि स्वर्णादि वितर ॥ तथैते अग्नयो दक्षिणाहवनीयगार्हपत्याख्यास्त्रयो वन्हयो वर्तते ॥ अथ ततश्चैतेष्वग्निषु नतिं नेकुरुष्वेति ॥ ब्रह्म
पुरीनाम धर्मार्थमीश्वरैः कारितानि धनधान्यद्रूपदचतुष्पदादि सर्वसामग्रीसहितानि द्विजेभ्यो दत्तानि गृहाणि ॥ शीघ्रचयेनतू
पात्रं नेन अथैनयोरित्यत्र्यपदानेन दित्यादिना एनतू चैनतू एनेन यजस्व चैनयोरित्यत्र इदम इत्येनतू ॥ केचित्तु इदम आदेशमेन
मितिमातं द्वितीयैकवचने आडुल्लन्मतेहोमयेनं ॥ अस्मायित्यत्राश्वंजन इति साक इद्मो नूकेचिदेतदोपी छंति अथैषु ॥ २९ ॥

६

एभिः करैरंशुमतेमकस्येदिशेयतं सानूसृजतान्वनेन ॥द्यावापृथिव्योरनयोर्निजोयंपरोयकंव्यक्तिरियंव्यधायि ॥ ३०॥ ॥ अ
नेनप्राभातिकेनांशुमता द्यावापृथिव्यो राकाशभुवोर्मध्ये यं निजोऽयकं कुत्सितोस्यो ऽसतोवाऽयं परोन्य इत्येवं विधाव्यक्ति र्व्यधायि
॥ किंभूतेनसता एभिः प्राभातिकैः करैः किरणैः स्त्वा ऽरुणत्वादिमकस्येदिशे पूर्वतमोभिभूत्वादि नानुकंपितायेप्रत्यक्षाये
पूर्वस्यं अवतंसान्नुरक्तपुष्पमुकुयानिवसृजताकुर्वता॥ निशिहि द्यावापृथिव्योत्तमसाव्याप्तत्वान्निजपरयोर्ज्ञानंनासीत् रव्युद
येतु बभूवेत्यर्थः ॥ एभिरित्यत्रानिगित्यन् अनगितिकिं इमकस्ये अन्येन अन्ययोरित्यत्र टोस्यनइत्यनः ॥ अयंइयमित्यत्रायानि
त्यादिना अयमियमो ॥ साकोप्ययमियमादेशो भवतः ॥ अन्येत्यादेशेकृते पश्चादकमिछंति अयकं ॥ ३०॥ दीपाइमेरव्युदयेन

म्ह

राजं त्यदैतीमोहव्यभुजोपिनामी ॥ स्यएषनेंदुर्नसतारकौ घोदेवायतः कोपिकदापिसश्रीः ॥ ३१॥ इमेराज्ञोयेऽराजंते
दीपारव्युदयेसतिनराजंतिनिष्प्रकाशकत्वात् ॥ तथायेऽमीरात्राववराजंते ऽतीदमोनिस्तेजास्वित्वादिमान्दीपान् तिक्रांताहव्य
भुजोप्यग्नयश्चनराजंति ॥ तथास्योशञ्चोयोतिप्रकाशितवान् सएषप्रत्यक्षइंदुरपिनराजति ॥ तथासतारकौघोनराजति ॥ यद्वा
युक्तमेवैतद्यतोदेवाददृष्टिवशात्कोपिकदापिसश्रीः श्रीयुतः स्यात् ॥ ३१॥ ॥ संध्यानतुर्अम्ह्यसकाविनोसावेशदृयोरप्यमुयो
स्तृतीया ॥ त्वंवासुकोमोराजितीत्रयीयंसाक्षान्नतोनादमुयङ्पुमान्कः ॥ ३२॥ ॥ हेराजन् असकौरव्युदयेन गतप्रायत्वाद
स्येयंसंध्या प्रभातसंध्या ब्रह्मेणेयंब्राम्हीतनुर्मूर्तिः ॥ एवंकिलश्रूयते ॥ पुरासिसृक्षया प्रजास्सृजाब्रह्मणस्तन्वस्यक्तास्तत्रदेवानृस
ष्ट्वायातनुस्त्यक्तासाहः संपन्नापुनर्दैत्यान्सृष्ट्वा यातनुस्त्यक्तासारात्रिरूपाजायत भूयोमर्त्यान्निर्माय तनुरुत्सृष्टायासाप्रातः संध्या
समपद्यतेति ॥ तथासोप्रत्यक्षइनो रविरीशस्य शंभोरियमेशीतनुः ॥ यदुक्तं ॥ क्षितिजलपवनहुताशनयजमानाकाशसो
मसूर्याख्याः ॥ इशस्यमूर्तयोष्टौ चिरंतनैर्मुनिभिराख्याताः ॥ तथामुयोर्द्वयोरपिब्रम्हेशतन्वोस्तृतीयाऽसुकः प्रत्यक्षस्त्वंमोर
ति तीननुर्वैष्णवीमूर्तिः ॥ नृपोहिप्रजापालकत्वेन वैष्णवीमूर्तिरितिरूढिः ॥ एवंचेयंप्रत्यक्षात्रयी ब्रम्हशंभुविष्णुरूपासाक्षात्प्र
त्यक्षास्ति तस्माद्धेतोः कःपुमान्नादमुयङ् अमूंत्रयींनांचति ॥ अधुसंध्यासूर्य त्वांचत्रयीमूर्तित्वात्सर्वलोकःपूजयतीत्यर्थः ॥ ३२॥

६

सध्यांनृपार्चामुमुयह रोयद्ब्रम्हा यमुद्यङ् हरिरप्यदद्यङ् ॥ येनामुनामीअपियांतिमुक्तेर्नियापथाघस्यलुवाव लोकाः ॥ ३३॥

ङ् नाः

॥ हेनृपसंध्यांप्रभातमर्च्च ॥ यद्यस्माद्धेतोर्हरोप्यमूंसध्यामंचति अमुमुयङ् ॥ तथाब्रह्माप्यमुद्यङ् हरिरपिविष्णुरप्यदद्यङ् ॥ अ
थप्रत्यक्षेणाप्यस्यजगत्पूज्यतामाहुः ॥ लुवाचेतिचोभिन्नक्रमे येनचहेतुना अमुनाय थासंध्यालक्षणेनामीलोकाअपि ॥ आस्तां
तावद्दागमगम्याहराद्यः प्रत्यक्षाब्राम्हणाद्योजना अपियांतिसंध्याचीकुर्वंतीत्यर्थः यतः किंभूतेनाघस्यलुवाछेदकेनातए
वमुक्तेर्मोक्षस्यानियाप्रापकेन ॥ ३३॥ ॥ वेदानधीयंतेनंस्तुवंतोयवक्रियः शिश्रियुरग्निमेके कुशासकल्स्वः सामिदुन्व्य ३४
एके करभुवः सिंधुनयानथेयुः ॥ ३४॥ ॥ यवान्होमार्थक्रीणंतियवक्रियएकेऽग्निहोत्रिणोऽग्निकार्यार्थमग्निंशिश्रियुः ॥
कीदृशाः संनोवेदानधीयंतोऽकद्रेणपठंतः ॥ तथाइनंरविं स्तुवंतः ॥ अथतथैकेऽन्येऋषयः करेनप्रवंनेतरंति करभुवोज
लपूर्णनदीमपितरंतःसंतइत्यर्थः ॥ सिंधुनयानि नदीकूलानिईयुः प्रापुः यतः कुशासकल्स्वोऽग्निहोत्रपरिस्तरणार्थदर्भाणा
मसकृच्छेदकाः ॥ तथासामिधउन्वयंति सामिदुन्वोऽग्निज्वालनायकाष्ठाहारकाअतिनैष्ठिकाइत्यर्थः ॥ नदीतटेषुहिप्रायेण
दर्भादिबहुप्राप्यते ॥ इमेइत्यत्रदोमस्याद्गाविति मः ॥ त्यदादिसंबोधिविज्ञानादिहन्नस्यात् ॥ अतोदमः कः कदेत्यत्र कि
मः कस्तसादौचेतिकः ॥ स्यः सः असौ इमे एषः द्वयोः तसादौ मतः कदेत्यत्राद्धेरइति अः स्यः सः एषइत्यत्र तः सोसइ
तिसः ॥ असौ असकावित्यत्रादसइत्यादिनादस्यसः सः सेसुडौ असुकइति असुकयोकीनिवात्रिपाध्यतेपक्षे असकौ ॥
अमुयोरित्यत्र मवर्णस्येतिमः अदमुयङ् अमुद्यङ् अमुमुयङ् अदद्यङ् इत्यत्र वाडयवितिवादस्यमः द्वौचात्रदकारौतयो
र्वामिसातिन्वातूरूप्यं ॥ अमुमुयङ् इत्यत्र मादुवर्णोन्वित्युवर्णः ॥ आन्विति किमर्थं अमुयोरित्यत्र यत्वादिषु कार्येषु कृते पूव
र्णोयथास्यादित्येवमर्थं ॥ अमुनेत्यत्र प्रागिनादित्युवर्णः ॥ अमीइत्यत्र बहुष्वेरीरितिईकारः ॥ नियालुवा अधीयंतःस्तुवं
तइत्यत्रधातोरिवर्णेत्यादिना ईयुवो ॥ ईयुरित्यत्र इणइतिइयू ॥ यवक्रियः करभुवः शिश्रियुः इत्यत्र संयोगादिति य्वोरपवा
दोयीयूवोधातुनासंयोगस्यविशेषणादिहनभवति उन्यः असकृल्स्वः ॥ ३४॥ ॥ पश्यंतिसिद्धास्त्रियउद्भ्रुवोकमा
राभुवंतं किरणाद्पातैः ॥ आशास्त्रियः स्त्रीरिवपाङ्मनीश्च युश्रीस्त्रियं स्त्रीमिवस्व श्रियंच ॥ ३५ ॥ अणिमा
द्यष्टविधैश्वर्यवंतः सिधास्तेयांस्त्रियउद्भ्रुवोऽभ्रुवोयासांताउद्भ्रुवः सत्योऽर्कं पश्यंतियतःपादपातैः किरणनिपातैरथ

च पादेषु पातैश्चरण प्रणामैः कृत्वारा भुवंतं किल प्रसादयंतमिव॥ का: आशाः स्त्रियो दिगंगना स्तथा पद्मिनीः स्त्रीरिव नथा र
विकिरणपंचशतीस्वर्गमप्युपोनयतीतिप्रसिद्धेर्युश्रीः स्त्रियं स्वर्गलक्ष्मीमेवांगनां स्वश्रियं चाकाशलक्ष्मींच स्त्रीमिव॥
७ योपि कांतः प्रेमानुविद्धः स्वकांताः पादपातैराराधयति तमन्यास्त्रियोऽहो अस्य स्वकांतासु प्रेमानुबंधो यद्यस्माकमपीदृशः
पतिःस्यादित्यभिलाषेणोद्भुवः॥ आराभुवंतमित्यत्र भुवोस्तोरितिवू सिद्धुस्त्रियइत्यत्र स्त्रियाइतियास्त्रियं स्त्रीस्त्रियः स्त्री
रित्यत्र वाम्नासीतिनेयं॥ ३५॥ वस्त्रोवाचिन्युः कुसुमानिचैत्याग्रण्यंजगत्स्वं सुधियोथानिन्युः॥ दनूभ्वोपिवर्षाभ्वइवाभिलं
घ्योपलभ्यकाराभ्वमिवप्रभातं॥ ३६॥ ॥कारो निश्चयस्तत्र नेन वा भवतिकारभू रयगस्तमिव॥ यथाये मूर्मार्गदर्शकः
स्यात्तथा सर्ववस्तुदर्शकं प्रभातमुपलभ्यप्राप्यसुधियः पुष्पोच्चयदक्षा मालाकाराः कुसुमान्यवाचिन्युरुच्चितवंतो॥ यपुष्पाव
चयानंतरंजगत्स्वं लोकेनापावित्रकं चैत्याग्रगण्यं चैत्येषु देवायतनेषु श्रेष्ठं महाप्रभावत्वेन सर्वलोकपूज्यंजिनमंदिरादिकु
सुमानिनिन्युर्विक्रयार्थंप्रापयन्॥ किं कृत्वा दनूहिंसनूभवतीति दन्भूः दन्भ्वोपिसविषकीटकानपि वर्षाभ्व इव दर्दुरानिव अ
भिलंघ्योत्प्लुवनेनातिक्रम्य अहमहमिकयाशीघ्रं गत्वेत्यर्थः॥ यतोवस्त्रोवसुद्ध्यमिष्ठंतः प्रभाते हिमालिकाः पुष्पाण्युच्चि
त्यविक्रयणार्थं देवप्रासादेषुनयंति॥ सीतलकालत्वानुदनूभ्वश्च वाहुल्येन विचरंति॥ ३६॥ ॥ चिकीर्विधूदेंद्रदिशः पु
नर्भ्वाः करोतिकाराभ्वमिनोनुधकारं॥ एतइभुवः पुण्यकराभ्वएन स्तुष्णोनुटंकादलयंतिभासः॥ ३७॥ ॥ इनोरविरं
धकारंकारागुप्तिः कारेवकारा गुहाकूपादि तत्रभवति निष्ठतियस्तं करोति॥ कीदृक्सन् विधुनेंदुनोदयकाले संबंधाद्दूट
वोढा परिणीतेव येंद्रदिक् पूर्वा तस्याः पुनर्भ्वाः पुनरूढायाइवाचिकीर्षिकीर्षुरुदयेन पूर्वदिशासंबंधी भवन्नित्यर्थः॥ यो
१० पीनः स्वामी अन्योढां कन्यां तस्मिन्मृते सति पुनः परिणीतिसौ धकारतुल्यमपवादिन महितजनं काराभ्वं गुप्तिस्थं करोति
तथैवदृभुवोपिप्रभवाभासः त ष्णोवर्द्धकेष्टंकानुटंकिकायथापाषाणादिविदारयंति तथैनः पापं दलयंति यतः पुण्य दा२
स्यधर्मस्यकरभ्वोयेग्व इव सर्वलोकस्य धर्ममार्गेप्रवर्तकत्वात्॥ ३७॥ ॥ पूर्वाचले धातुवपुंषिप्राण्यवर्णाउद्यात्य
घलून्युरंशोः॥ पकाम्नताम्रेहतदंभि रक्तधूस्यभ्रलम्नेवविभातिसंध्या॥ ३८॥ ॥ अघलूनिमिछतिलोकानामिति

सापेक्षत्वेपि नित्यसापेक्षत्वेनैकार्थ्यात् क्यनिअघलून्युर्लोकपापच्छेदंघोरं शोरवेरर्वाणोऽश्वाः पूर्वाचलेउदयाद्रेस्तानि
वप्राणि रोधांस्युद्यात्युदंचंते कीदृंशि धातवएव वपुर्येषां तानिधातुमयानि॥ ततश्चेह पूर्वाद्रौ पक्वाम्नताम्रापरिप
क्वाम्रफलवद्रक्ताऽभ्रलग्ना ... ऽऽकाशस्थासंध्याभाति॥ कीदृक् तेषामर्वणां ये प्रयः खुरास्तैर्हृतोत्खातायाधू
लीधातुरेणुः सेव॥ अववचिन्युः निन्युरित्यत्र येनेकः स्वरस्येयः॥वस्व इत्यत्र स्यादौव इतिवः॥ चैत्याग्रण्यंजगत्स्वंइत्यत्राकि
धृतेरित्यादिनायवो॥दनूभ्वः पुनर्भ्वाः वर्षाभ्वः काराभ्वमित्यत्र दनूपुनरित्यादिनाभावः॥ करशब्देनापीछंत्यन्ये कराभ्वः॥
काराशब्देनाप्यन्ये काराभ्वं॥ दनादिभिरिति किं एतद्भुवः पूर्वेणैवसिद्धे नियमार्थमिदं एतैरेव भुवोनान्यैरिति॥ तक्ष्णः
चिकीः स्यादिविधौच अर्वाणः वपूंषीत्यत्र नषमित्यादिनाणत्वषत्वानामसत्वाद्नोकारलोपःसस्यरुरुपांत्यदीर्घ
च त्वंचस्यात्॥ पक्वस्यादिविधौच॥ अलून्युरित्यत्र क्वादेशाषीति वनयोरसत्वाद्धुटिकर्त्तव्ये न्याश्रित्यउरुत्वस्यात् अषीति
किं रक्तः अत्रकादेशस्य णस्यसत्वाद्यजसृजेत्यादिनाधुड्मिमित्तः षोनभवतिकत्वेत्वसत्वात्तद्वत्येव परेस्यादिविधौचे
त्येव॥लग्नाअत्रस्यादिविधौ पूर्वसूत्रकार्ये घोषे प्रथमोशिटइतिप्रथमत्वेनत्वस्यासत्वाभावाद्घोषनिमित्तः प्रथमोन
भवति॥ ३८॥ ॥ अश्वालिलिक्षंतिविमूर्छदारमद्युतिः सजूः शाद्वलशंकयेह॥ तमः पिपिक्षोररुणस्य दीव्यतोवागि
रोनोगणयंतिधुर्याः॥३९॥ ॥ अश्वारवितुरगालिलिक्षंतिसिस्वादयिषंति॥ काः इह पूर्वाचलेविमूर्छदारमद्युतीः गिरौम यि
णयोवर्ण्यंतइतिकविरूढिरित्यस्य मणिमयशिलासुविमूर्छंत्यः प्रतिफलंत्यो या आत्मद्युतयः स्वकांतयस्ताः॥ कयासजूः
शाद्वलशंकया शाद्वलशब्देनाचोपत्या शद्धरिततृणास्युच्यंते सजूंषिमिथः संबद्धान्यातिसांद्राणि यानिशाद्वलानिहरित
तृणानितेषां याशंका भ्रमस्तया गिरौ हरितसंभवात् प्रतिफलितस्वकांतीनां नीलत्वाच्चता हरितानि संभावयंत इत्यर्थः॥
अएवधुर्याधुरीणा अश्वाअरुणस्यरविसारथेर्दीव्यद्गाढनोदनाद्दीप्यमानं तोत्रंप्राजनं यासुताडीव्यत्तोत्रा स्तोत्रतोदन
पुरः सरागिरोहुंकारान्नोगणयंति यदितेशाद्वललिलिक्षया तोत्रहुंकारान्नगणयंति ताकिंतास्तेयु प्रयुङ्क्तेसाबि
त्याह॥ तमः पिपिक्षोरुच्छेत्तुकामस्यतमः पेषकार्यकरणोत्सुकस्येत्यर्थः॥ ३९॥ सुगीर्यमाणोपिगुरुत्वगीर्यन्नश्रेयार

च पादेषु पातेश्चरण प्रणामैः कृत्वा राभुवंतं किल प्रसादयंतमिव॥ काः आशास्त्रियो दिगंगनास्तथापद्मिनीः स्त्रीरिव तथार
विकिरणपंचश ती स्वर्गमध्युषी नयतीतिप्रसिद्धेर्धु श्रीस्त्रियं स्वर्गलक्ष्मीमेवांगनां स्वश्रियं वा काशलक्ष्मीं च स्त्रीमिव॥
५ यो पि कांतः प्रेमानुविद्धः स्वकांताः पादपातैराराधयाति तमन्यास्त्रियोऽहो अस्य स्वकांतासु प्रेमानुबंधो यद्यस्माकमपीदृशः
पतिस्यादित्यभिलाषेणोद्धुवः॥ आराभुवंतमित्यत्र भ्रुवोस्तोरितिवृ सिद्धुस्त्रियइत्यत्र स्त्रियाइतियास्त्रियं स्त्रीस्त्रियः स्त्री
रित्यत्र वाम्नासीति नेयं॥ ३५॥ वस्त्रोवाचिच्युः कुसुमानि चैत्याग्रण्यंजगत्वं सुधियोयानिन्युः॥ दनूभ्वोपि वर्षाभ्वइ वाभिलं
घ्योपलभ्य कारभ्व मिव प्रभातं॥ ३६॥ ॥कारो निश्चयस्तत्र नेन वा भवति कारभूः यगत्तमिव॥ यथाग्रे सूर्मार्गदृर्शकः
स्यात्तथा सर्ववस्तुदर्शकं प्रभातमुपलभ्य प्राप्य सुधियः पुष्पोच्चयदक्षा मालाकाराः कुसुमान्यवाचिच्युरुच्चितवंतो॥ वपुष्पाव
च्चयानंतरं जगत्स्वं लोकेनापावित्रकं चैत्याग्रगण्यं चैत्येषु देवायतनेषु श्रेष्ठं महाप्रभावत्वेन सर्वलोकपूज्यं जिनमंदिरादि कु
सुमानि निन्युर्विक्रयार्थं प्रापयन्॥ किं कृत्वा दनूर्हिंसनूभवतीति दनूभूः दनूभ्वोपि सविषकीटकानपि वर्षाभ्व इव दर्दुरानिव अ
भिलंघ्योत्प्लुवनेनातिक्रम्य अहमहमिकया शीघ्रं गत्वेत्यर्थः॥ यतो वस्त्रोवसुद्व्यमिच्छुंतः प्रभाते हि मालिकाः पुष्पाण्युच्चि
त्य विक्रयणार्थं देवप्रासादेषु नयंति॥ सीतलकालत्वात् दनूभ्वश्च बाहुल्येन विचरंति॥ ३६॥ ॥ चिकीर्विधू दंद्र दिशः पु
नर्भ्वाः करोति काराभ्व मिनोनूधकारं॥ एतइभुवः पुण्यकरभ्वएन कृष्णोनुटंकादलयंतिभासः॥ ३७॥ ॥ इनोरविरं
धकारं कारागुप्तिः कारेव कारागुहाकूपादि तत्र भवति निष्ठति यस्तं करोति॥ कीदृक् सन् विधुनेंदुनोदयकाले संबंधादूढे
वोढा परिणीनेव येंद्रदिक् पूर्वा तस्याः पुनर्भ्वाः पुनरूढायाइ वनिकीच्चिकीर्षुरुदयेन पूर्वदिशासंबंधी भवन्नित्यर्थः॥ यो
५४ पीनः स्वामी अन्योढां कन्यां तस्मिन्मृते सति पुनः परिणैति सोंधकारतुल्यमपवादिन महितजनं काराभ्वं गुप्तिस्थं करोति
तथैतद्भुवो पि प्रभवा भासः त क्ष्णोवर्द्धकेष्टंकानुटंकिकायथा पाषाणादि विदारयंति तथैनः पापं दलयंति यतः पुण्य दा २
स्य धर्मस्य करभ्वो येग्व इव सर्वलोकस्य धर्ममार्गे प्रवर्तकत्वात्॥ ३७॥ ॥ पूर्वाचले धातु वपुं पिष प्राण्यवर्णाउ यांत्य
घलून्युरंशोः॥ पक्वाम्र ताम्रे हत दंभि रक्त धूस्यभ्रलग्नेव विभाति संध्या॥ ३८॥ ॥ अघलूनिमिच्छति लोकानामिति

सापेक्षत्वेपि नित्यसापेक्षत्वेनैकार्थ्यात् क्यनि अघलून्युर्लोकपापच्छेदच्छोरंशोरवेरर्वाणोऽश्वाः पूर्वाचलेउदयाद्रिस्थानि
वप्राणि रोधांस्युर्यांत्युद्बंधंते कीदृंशि धातव एव वपुर्येषां तानि धातुमयानि॥ ततश्चेहपूर्वाद्रौ पक्वाम्रताम्रापरिप-
क्वाम्रफलवद्रक्तोऽभ्रलग्ना . . . ऽऽ काशस्था संध्या भाति॥ कीदृक् तेषामर्वाणां ये प्रयः खुरास्तैर्हतो त्वानाया धू
ली धातुरेणुः सेव॥ अववचिच्युः नित्युरित्यत्र येनेकः स्वरस्येय ॥वस्व इत्यत्र स्यादौ व इति वः॥ चैत्याग्रण्यं जगत्स्वंइत्यत्राधि
धृतेरित्यादिना यवौ॥ दनूभ्वः पुनर्भ्वाः वर्षाभ्वः कारभ्वमित्यत्र दनूपुनरित्यादिना भावः॥ करशब्देनापीच्छंत्यन्ये करभ्वः॥
काराशब्देनाप्यन्ये काराभ्वं॥ दनादिभिरिति किं एतद्भुवः पूर्वेणैव सिद्धे नियमार्थमिदं एतैरेव भुवो नान्यैरिति॥ तदृण:
चिकीः स्यादिविधौ च उर्वाणः यपूंषीत्यत्र नषमित्यादिना णत्वषत्वानामसत्वादृनो कारलोपः सस्यरुरुपांत्यदीर्घ
५ त्वं च स्यात्॥ पकस्यादिविधौ च॥ अघलून्युरित्यत्र क्वादेशाषीति वनयोरसत्वादुरिकर्तव्यन्याश्रित्य उरुत्वस्यात् अषीति
किं रक्तः अत्रक्वादेशस्य णस्यसत्वाद्यजसृजेत्यादिना धुड्निमित्तः षोन भवति कत्वेत्वसत्वात्तद्वत्स्येव परे स्यादिविधौ चे
त्येव॥ लग्ना अत्र स्यादिविधौ पूर्वसूत्रकार्ये घोषे प्रथमोशिट इति प्रथमत्वेन त्वस्यासत्वाभावाद् घोषनिमित्तः प्रथमोन
भवति॥ ३८॥ ॥ अश्वालिलिक्षंतिविमूर्छदारमद्युतिः सजूः शाद्वलशंकयेह॥ तमः पिपिक्षोररुणस्य दीव्यतोवागि
रौ नो गणयंति धुर्याः॥ ३९॥ ॥ अत्र श्वारवितुरगा लिलिक्षंति सिस्वादयिंति॥ काः इह पूर्वाचले विमूर्छदारमद्युती गिरौम पि
णयो वर्ण्यते इति कविरूढिरित्यस्य मणिमयशिलासु विमूर्छंत्यः प्रतिफलंत्यो या आरमद्युतयः स्वकांतयस्ताः॥ कया सजूः
शाद्वलशंकया शाद्वलशब्देना वोपचा शाद्वरित तृणान्युच्यंते सजूंषि मिथः संबद्धान्यतिसांद्राणि यानि शाद्वलानि हरित
तृणानि तेषां या शंका भ्रमस्तया गिरौ हरितसंभवात् प्रतिफलितस्वकांतीनां नीलत्वाच्चता हारितानि संभावयंत इत्यर्थः॥
अएव धुर्या धुरीणा अश्वा अरुणस्य रविसारथेर्दीव्यद्वाढ नोदनाद्देदीप्यमानं तोत्रं प्राजनं यासु तादीव्यत्तोत्रा स्तोत्रतोदन
पुरः सरा गिरो हुंकारान्नो गणयंति यदि ते शाद्वललिलिक्षया तोत्रहुंकारान्न गणयंति तत्किं तारते यु प्रयुङ्क्ते सावि
त्याह॥ तमः पिपिक्षोरुच्छेत्तु कामस्य तमः पेष कार्यकरणोत्सुकस्येत्यर्थः॥ ३९॥ सुगीर्यमाणोपि गुरुत्स गीर्यन्नश्रेयोर

थेधूर्यतिधूर्यमाणाः॥कुर्वात्मन्नन्साधुरिहोपयोगंछुर्यादघमोहजयज्ञगन्वान्॥४०॥ ॥साधुरार्हतमुनिरिहप्रभातेउपयोगंप्राभातिकानुष्ठानविन्नोपकुर्यात्करोतु॥ कीदृक्सन्॥सुगीर्यमाणोपिन्नोभनागीर्वाग्देवीतद्दानाचरन्नपिगुरुभिःसुगीर्यन्गुरुभिराचार्यैरुक्तांगिरवाणीमिकन्॥अविरोधे॥योहमिविद्वत्तयावाग्देवीतुल्यःस्यात्तस्यसर्वज्ञात्वपारगत्वेनाध्ययनविमुखत्वादाचार्योक्तगिराकिंप्रयोजनं॥विरोधपरिहारस्त्वेवं॥न्नोभनामधुरागीर्वाणीयस्यससुगीस्तद्दानाचरन्नुपयोगवेलायांगुरोःपुरःस्थित्वाविनतकारणाद्वाकारणसंदिश्नातोपयोगंकरिष्यामीत्यादिष्टवाक्यानिमधुरमुच्चारयन्नित्यर्थः॥तथागुरुभिराचार्यैरुक्तांगिरवुर्विसादि कामुक्तरूपांवाणीमिखन्॥एतेनविनीतत्वोक्तिः॥तथाधूर्यतिधुरमिच्छतिश्रेयार्थेश्रे योऽस्यादन्नाश्रीलांगसहस्रलक्षणोधर्मःसएवालेरमरथाकारकत्वाद्रथस्तस्मिन्विषयेधूर्यमाणोधूरिवाचरन्॥यथाधूरथाधारःस्यादेवयतिधर्मस्याधारइत्यर्थः॥अतएवप्रत्यानुपकृतंतरागद्वेषः॥अतएवजयेमोहनीयकर्मपराभवंजगन्वान्प्राप्तःसन्नघपापंकुर्यात्छिनत्तु॥उपयोगविधिश्चश्रीभद्रबाहुस्वामिपादैरुक्तो यथा॥अपुच्छपात्तिपढमाछियाइपडिपुच्छणायकायव्वा॥आवस्सियायइयाजस्सयजोगोयउच्छोओ॥१॥प्रथममाप्टच्छतियदुतसंदिशाथोपयोगंकरोमि॥एसापढमाउवउगकारावणिअकाउसग्गअइहिऊसासहिनमोकारंचिंतइ॥तओनमोकारेणंपारेऊणंभणइ॥इच्छाकारेणसंदिसह॥आयरियभणइलाभोसाहुभणइकिहगिहामित्ति॥एसापडिपुच्छातऊआयरिऊभणइतहत्ति॥यथासाधवोग्रह्णन्तीत्यर्थः॥तओसाहुभणइआवस्सियाजस्सयजोगोत्ति॥जंजंसंजमस्सउवगारेवट्टइतंतंगिण्हिस्सामि॥एवमसावनेनक्रमेणआप्टच्छतिसतिगुरुभिरनुज्ञातआवश्यकीकृत्वायस्यचायोगइतिअभिधायभिक्षार्थंनिर्गच्छतीत्यर्थः॥४०॥ ॥जगन्मदृसुक्तिपरैःसपर्णाधस्ताच्छिभीरश्मिधृतानुड्डिः॥ग्राम्यैरविद्युद्भिरुदीक्ष्यतेसौयूस्वास्वादिंदुर्दधिपिंडबुध्या॥४१॥ ॥ग्राम्यैरसाविदुर्दधिपिंडबुध्यास्थूलदधिवराटिकाकयादीक्ष्यतेऊर्ध्वमालोक्यते॥कीदृक्सन्॥यौव्योमैवपृथुत्वात्त्रयामत्वाचोखास्थालीतस्याःसकाशात्सन्तेऽधःपततीतियूस्वास्वन्॥कीदृग्भिःसद्भिः॥जगन्मदृसुक्तिपरैःकुटिलंगच्छामदृत्युच्चारयद्भिः॥ग्राम्याहिप्रायःप्रातःपत्रपात्साध्यानयनायान्योन्यमाकारयंतोबाह्यंव्रजंति॥तथापर्णानिधंससतपर्णध्वस्यायस्थिर्द्धिषु॥सदार्वाद्भिःसहतयावदरीपत्रादिपात नार्थंवर्ततेयेतेस्तथापत्रघासादिभाराराणार्थंरश्मोरज्जोधृताअवष्टब्धाअनडुहोवृषायैस्तैस्तथाऽविदुद्भिर्ग्राम्यत्वान्मुग्धैःग्रामेहिदधिबाहुल्येनग्राम्याणांस्वात्यधःपतद्धनदधिपिंडस्यसंपरिचितत्वादैस्तकालेव्योम्नोधःपततीदोतथातेनाध्यवसायः॥४१॥ ॥श्री॥

त

उदीयिवद्देत्यरणाध्वरर्त्विकूसहस्रदृग्दिक्स्पृगुदक्करस्त्वक्॥अजीवनग्भिर्मुनिभिर्दधृग्भिरुष्णिकूस्नुतोवोरुवपनङ्घ्नोर्कः॥४२॥ ॥हेराजन्वोयुष्माकमघनङ्घ्नेऽघस्यपापस्ययोनङ्नाशस्तस्ययाघ्नतंकरणंतस्मै अर्कोस्तु॥ कीदृक्॥उदीयिवांसरुत्कालोदितायेदैत्यामंदेहारव्याःषष्टिसहस्राणितेषांयोरणःसएवाध्वरोयागस्तत्रऋत्विक्पधार्त्विगध्वमेधयागेपशून्हंतितथादैत्यान्रणेघ्नन्नित्यर्थः॥तथासहस्रदृग्इंद्रस्यदिशंपूर्वांस्पृशतियःसः॥तथोदंचत्पूर्ध्वंप्रसरंतीकरस्त्राकिरणमालायस्यसः॥तथानास्तिजीवनक्जीवस्यैशनंयेषांतैरजीवनग्भिरजरामरैर्दधृग्भिःप्रगल्भैर्मुनिभिरष्टाशीतिसहस्रसंख्यैर्वालखिल्याभिधैःकर्तृभिरुष्णिग्भिःछंदोभेदैःस्नुतःउष्णिक्स्नुतः॥पिपिक्षोःलिलिक्षंतीत्यत्रपदोःक्सीतिकः॥विमूर्छनादीव्यादेत्यत्रभ्वादेर्नामिनइत्यादिनादीर्घः॥सजूरित्यत्रपदांतइतिदीर्घः॥पदान्तइतिकिंगिरःधुर्याइत्यत्रनयीत्यादिनादीर्घः॥तद्धितइतिकिंगीर्यन्सुगीर्यमाणः॥केचित्तुफान्स्युरोरपिप्रतिषेधमिच्छंति॥तन्मतेधुर्यमाणःकुर्वान्धुर्यादित्वकुर्छुरितिनदीर्घः॥प्रशान्जगन्वानित्यत्रमोनोन्वाश्चेति॥धुस्वास्वान्पर्णध्वत्उदीयिवत्आविदुद्भिःअनडुद्भिरित्यत्रस्रंसुध्वंसित्यादिनादः॥ऋत्विक्दृक्स्पृक्दधृग्भिःउष्णिगित्यत्रऋत्विक्दिगित्यादिनागः॥अजीवनग्भिःअघनङित्यत्रशौनेवेतिनागः॥४२॥ ॥युङ्शीकरैःप्राङ्मरुदुन्मदक्रुङ्सजूरजोभिःस्फुरमंबुजानां॥आद्यावहस्वेषजडत्वदस्तद्रविःऋताहाअऋताहएव॥४३॥ ॥अहःसुदिनेष्वादौप्रभातेएषमरुद्वातोजडत्वंशैत्यंददातिजडत्वदोस्ति॥कीदृक्सन्शीकरैर्जलकणैर्युङ्युक्तो तएवोन्मदाउन्मत्ताःक्रुंचःसारसायस्मात्सः॥प्रातःशीतवातस्पर्शोहिक्रौंचामादयंतितथाप्रशस्तंमृदंचतिगच्छतिप्राङ्॥तथाविकसितत्वादंबुजानांरजोभिःस्फुरंव्यक्तंसजूःसंबद्धः॥ततस्माद्धेतोःरविःऋताहाअपिरत्राध्याहार्यो ऋताहएव॥दिनेहिरविकिरणैर्जाड्यंखड्यतेनत्वप्रभातेकेशीतलेवातेवातितदवस्थमेवेत्यर्केणदिनंऋतमप्यऋतमेवेत्यर्थः॥युङ्प्राङ्क्रुङित्यत्रयुजंचित्यादिनाङःरविःरजोभिरित्यत्रसोरुइतिरुः॥सजूरित्यत्रसजुषइतिरुः॥ऋताहाःअहःस्वित्यत्रअन्हइतिरुः॥ऋताहाइत्यत्ररुत्वस्यासत्वान्नांतलक्षणोदीर्घोभवति॥कश्चित्तुदीर्घमिच्छतितन्मतेऽऋताहः॥४३॥ ॥जयत्यहोरत्नमहर्विधित्सुस्फूर्जत्यहोरूपमपत्रपाः॥

न१

ग

दिकू

भवत्यहोरात्र कृताशिषोहो रथंतरं सामविदश्चगातुं ॥ ४४॥ ॥ हे राजन्नहर्विधित्सु दिनं चिकीर्षव्हो र त्वं दिनमणिः सूर्यो
जयतिउदेतीत्यर्थः ॥ अथार्कोदयानंतरं प्रशस्तमहः प्रसौशेरूप विनिरूपपि अहोरूपं स्फूर्जति ॥ तथाभव तित्वयिवि
षये, होरात्रकृताशिषो नक्तं दिवं दत्ताशीर्वादाः सामविदश्च सामवेद ज्ञा अहर्दिने दिनारंभ इत्यर्थः ॥ कालाध्वभावेया
दिनाच्च द्वितीया ॥ रथंतरं सामवेदे सामविशेषं गातुं रागविशेषेणोच्चारयितुं प्र वृत्ताः ॥ प्रातर्हि सामविद्भी रथंतरं सामगीय
त इति स्थितिः ॥ अहर्विधित्स्वित्यत्र रोलुप्यरीतिरः ॥ अ ॑ीतिकिं अहोरत्नं अहोरूपं अहोरात्र अहोरथंतरं ॥ अन्येतु रूपरात्रि
रथंतरेष्वेव रेफादिषु रेफप्रतिषेधमिच्छंति ॥ ४४॥ ॥ एषाब्जिनी षट्पदधाम्भिराहसुदुग्धिशारत्नमिनेन दंशोः ॥ वियो
गभुत्पर्णपुडास्मि गोधुक्कालात्कयूयं वदतन्यग्रुद्धं ॥ ४५॥ एषाब्जिनी पद्मिनी सुदुदुःखैनिक्लिपि णिलुपि संयोगांतलो य
पोः म्लोपेच सुदुकूसु धुकुशेत्पादकमेतदुच्यमानं निशारत्नमंशोरवेरयेषट्पदवाम्भिर्भृगशब्दैः कृत्वाहेव वक्तीव ॥ इ
वोभिन्नक्र मे ॥ किमित्याह वियोगं बुध्ये वियोगभुदुभ्याद्दूरहदुःखज्ञा, तरेव पर्णानि गुहामि संकोचयामि पर्णपुडस्मि
अहं वर्ते ॥ हे अंशो यूयं ॥ अंशोरेकत्वेपि गौरवविवस्या गुरावेकश्चेति बहुवचनं ॥ वदत कथयत दोहनं धुक्गवां धुक्त
स्याः कालस्त स्माद्गोधुक्कालात् ॥ गम्ययपइत्यादिना पंचमी ॥ संध्याकालमारभ्यक न्यग्रुद्धं निरीनाइति ॥ यापि पतिव्रता भर्त्त
रि प्रोषिते वियोगभुक्सती पतिविरहे सती नांतां बूलभ क्षणमनुचितमिति पर्णानि नागवल्लीपत्राणि निगूहति लक्षणयान
खादति साभर्त रि समागते कुलवधूत्वेन सलज्जत्वात् षट्पदानि यासुता या वाच साभिरव्यक्ताक्षरवाणीभिर्विरहकष्टव
त्तांतं तथे यंति दिनानि यूयं कन्यग्रुद्धमित्येतच्च वक्रीत्युक्तिः ॥ ४५॥ ॥ उदेति तुं दिभ्रविबिंबमैंद्र्या स्तत रत्नमोदामलिडे
पलोकः ॥ प्रभोत्स्यते शोत्स्यति दास्यते च विधेय बोद्धा सुकृतं विधित्सुः ॥ ४६॥ ॥ ऐंद्र्याः पूर्वस्यादिशस्तुंडिभा मुन्न
त रागवती करोति मिचिकिपिच्च तुंडिभ्रसरशत्वादैंद्रीं तुं डिभामिव कुर्वद्रविविंबं उदेति तनोर्कोदयानंतरं लोकः प्रभोत्स्यते जागरिष्य
ति शोत्स्यति स्नास्यति दास्यते च द्विजादिभ्यः प्रातर्हि स्नात्वा दानं दीयते लोकैः ॥ कीदृक् सन् विधेय बोद्धा विधेकिर्वा त्कर्त्तव्यांना
नन्नत एव सुकृतं धर्मं विधित्सुश्चिकीर्षुरत एवच्च न मदोसोमम मालां लेढिखादतितमोदामलिडर्कस्तमिच्छति क्यनिच्चि

पितमोदामलिट् ॥ कदाराविरुदेष्यति येन प्रभाति कंदेवपूजादि धर्मकृत्यं करोमी तिरवेरुदयमिच्छन्नित्यर्थः ॥ ४६॥ ॥
धत्थस्ममानं भ्रुकुटिंस्म धात्थ धात्थस्म धैर्यं यदुतापि धध्वं ॥ संधात्थ कांतानभिधात्थ चोषःशंखोभिधत्तेन्विति मानिनी
नां ॥ ४७॥ ॥ उषः शंखः प्रभाते राजद्वारादौ वाद्यमानः शंखो मानिनीनां पुरोभिध त्तेनुवक्तीव ॥ किमित्याह हे मानिन्योभ
र्तृकृतापराधकुपितत या भर्तृषु पयूयं मानमहंकारं धत्थस्म धृतवत्यो, तएवचाद्दत्त्यादिना प्रसादयत्सु भर्तृषु यूयं भ्रु
कुटिं भ्रूविकारं धात्थस्मात्यर्थं धृतवत्यस्तथा यद्धैर्यमेषां भर्तृणां मुखमपि नेक्षिष्यामहे इति चित्तावष्टंभं धात्थस्मात्यर्थं
धृतवत्यस्तन्मानादिधरणं पिधध्वं स्थगयत परित्यजतेत्यर्थः ॥ किंतु सं धात्थ भृशंसं धयत ॥ धेट् धातुः पानार्थोपि
संपूर्वः संधाने वर्तते ॥ यदुक्तं ॥ उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ॥ नीहाराहार संहार प्रतीहार प्रहारवत् ॥ स्वकांतैः सहसं
धानं कुरुतेत्यर्थः ॥ तथा कांतानभिधात्थ भृशं वदत ॥ यद्यपि युष्माभिरवज्ञाता तथा, प्रमाने न कांता युष्मान्न संभाषंते तथापि
यूयमुपेत्य तान् संभाषयध्वमित्यर्थ इति ॥ प्रातर्हि राजद्वारादिषु शंखवाद्यं तेतच्छब्दं श्रुत्वा रात्रिर्विभातेति मानिन्यो मानं मु-
त्सृज्य रिरंसौत्सुक्येन कांतान् भजंते इत्येवमुत्प्रेक्षा ॥ अभिधत्तेन्विति वचनसंभावनया शंखस्यानुक्तमपि वाक्यमानत्वं प्रती
यते ॥ याभिः षट्पद अब्जिनीत्यत्र धुटस्तृतीय इति तृतीयः ॥ केचित्तु विसर्गजिह्वामूलीयपोरप्यला क्षणिकयो स्तृतीय त्वंग
त्यमिच्छंति तन्मते सुदुकूप र्णपुट् तुं दिब् गोधुक् वियोगभुत् सादौ प्रभो त्स्यते ध्वादाच न्यग्रुद्धं इत्यत्र मड देत्यादिना आ
देश्चतुर्थः ॥ गजडदबादेरिति किं शोत्स्यति ॥ चतुर्थांतस्येति किं दास्यति ॥ एकाच्स्वरः स्येति किं तमोदामलिट् ॥ सध्वोरिति किं
बोद्धा अभिधात्त धत्थ विधित्सु पिधध्वं इत्यत्र धागस्तथोश्चेति चतुर्थः ॥ गकारः किं धयते र्माभूत् धेर्यङ्लुगि संदात दधाते
रपि यङ्लुबंतस्य माभूत् ॥ तिपाशपानुबंधेनेत्यादिना यातदात ॥ केचि दौलुबंतस्यापीच्छंति अभिधात्त धात्थ ॥ ४७॥ ॥
नि ३ दुग्धंस्म दुग्धस्म धत्थपायों पिधत्थ धात्थस्मनु धात्थवापि ॥ नक्षाणि वाधात्थ किमंबु धात्थेत्याहुः समं संप्रति पोषवद्धाः ॥ ४८॥
संप्रति प्रातर्घोषवृद्धा गोकुलेवृद्धनराः समं युगपत्स्वपुत्रा दीनाहुः ॥ कथमित्याह ॥ हे पुत्रादयो यूयं दुग्धं क्षीरं दुग्धस्म क्षारि
तवंतः ॥ तथा पायों दोहिन्यां दुग्धं निधत्थस्म निक्षिप्तवंतश्च ॥ तथा यूयं पायों निहितं दुग्धं पिधत्त वस्त्रादिनास्थ गयत ॥

तथायूयं दुग्धं धात्थ स्मात्यर्थं पीतवंतोयाथ वापि पुनरप्यत्यर्थं पिबत वा यथवा यूयं तक्राण्युदश्विंति धात्थात्यर्थं पिबत यदि दुग्धन्नरो
चते तदा तक्राणि पिबतेत्यर्थः॥ किमंबु धात्थ किमिति जलं पिबथेति॥ दुग्धदुग्धेत्यत्राभ इत्यादिना तयोर्द्वः॥ अभइति किं दधा
तेर्यङ्लुबंत धयतेश्च माभूत् पिधत्त निधत्थ दात्त दात्थ॥ केचित्तु यङ्लुबंत धयतेरिछंति दात्थ धात्थ॥४८॥ ॥अथपंच
रत्या मूलराजमुप श्लोकयंतः प्राभातिकविध्युपदेशगर्भमाशासनश्चाहुः॥ ॥ लक्ष्मीमयद्वं पृथिवीं वयद्वे स्तीर्द्वं द्विषः लक्
रवमासिषीध्वं॥ स्तुध्वं गुरून्सांध्य विधिंकृषीद्वं स्तीर्षीद्वमेतद्भुवनं यशोभिः॥४९॥ हे राजन् यूयं लक्ष्मीं शक्तित्रयरूपांश्रियम
यद्वमनवरतं स्वीकृतवंत इत्यर्थः॥ अतएव द्विषः शत्रून् स्तीर्द्वं माच्छादितवंतो जितवंत इत्यर्थः॥ अएवच पृथिवीं वयद्वे साधि
तवंत इत्यर्थः॥ तत्तस्मान्निष्कंटक सर्वसंपत्तिसंपूर्णमहाराज्यावाप्ति रूपाद्धेतोः सुखं पंचेंद्रियानुकूलमासिषीध्वमवस्थेयास्त॥
तथा गुरून् मातापितॄन् धर्मोपदेष्टॄन्वा स्तुध्वं स्तुमारस्तु॥ आशिषि पंचम्यंतं॥ प्रभाते हि विशेषतो मंगलत्वान्पूज्याः स्तुत्याः॥ त
था सांध्यविधिं संध्यावंदनदेवपूजादि प्राभातिककृत्यं कृषीद्वं॥ ततश्चैतद्भुवनं जगत्त्रयं यशोभिः कृत्वा स्तीर्षीद्वं माच्छा स्यास्त व्या
प्यास्तेत्यर्थः निष्कंटकसमृद्ध राज्यप्राप्तिलक्षणस्य पुमर्थस्यैतान्येव फलानि यत्सैरं कामसेवनं गुरुस्तवनादि धर्मानुष्ठानस्यकरणं
यच्च यशसा जगद्व्यापनमिति॥ एतानि चाशीर्भिर्बंदिभिर्नृपेउपदिश्यतीत्यर्थः॥ स्तीर्द्वं स्तीर्षीद्वं अयद्वं वयद्वे कृषीद्वं इत्यत्र नाम्यं
तादिना धस्यढः॥ नाम्यंतादिति धातोर्विशेषणं किं आसिषीध्वं परोक्षाय तन्त्याशिषइति किं स्तुध्वं॥४९॥ ॥धियाग्रहीद्वंनि
शिनि द्रयानाग्राहिद्वमुयुरुन याग्रहिध्वं॥ नवाजडिम्नाजगृहिद्व आन्वग्राहीध्वमुत्कृष्टगुणैः सदाहि॥५०॥ हे राजन् यूयं
धियाकर्त्र्याऽग्रहिद्वमाश्रिता इत्यर्थः॥ अतएव जाडिम्नाप्रखर्वत्वेन कर्त्र्यायूयं न वाजगृहिद्वे नाश्रिताः॥ तथोत्कृष्टयोत्तमगुणेनयू
यमग्रहिध्वमाश्रिताः॥ अतएव निद्रयानाग्राहिद्वं नाश्रिताः॥ हियस्मादुत्कृष्टगुणावुध्धुत्साहादयोयेषां तैर्गुणाधिकैर्गुरुभिः
सदायूयमन्वग्राहिध्वं सदुपदेशदानादिना समंतादनुगृहीताः॥५०॥ ॥किमन्वकारिद्वमुतान्वसारिध्वं किं तु मेहिध्व इनेन
भाभिः॥ तमोलविद्वं द्विषतोलविध्वं यूयं हि विश्वं पुपुविद्वमलतान्॥५१॥ ॥हे राजन् हियस्माद्यूयं नीतिशास्त्रादिसकलशास्त्र
वेदितृत्वान्तमोऽज्ञानमलविद्वं॥ तथा द्विषतोरीन लविध्वं॥ तथैतद्विश्वं भूलोकं पुपुविद्वे अन्यायमलापनयनेन पवित्रितवंतः॥

तस्माद्धेतोरिनेन रविणा कर्त्र्या भाभिस्तेजोभिः कृत्वा तमोलवनादि स्वकार्यनिष्पादनाय यूयं कर्म किमन्वकारिद्वं तनर्भ्रताणीगर्थत्वा
त्कृञः॥ किं यूयं रविणात्मानमनुकारिताः स्वसदृशीकृता इत्यर्थः॥ उत किं वेनेन भाभिः कृत्वा यूयमन्वसारिध्वमनुसृताः र
विणा किं तेजोभिर्भवतां साहाय्यं कृतमित्यर्थः॥ किन्तु किं वा यूयं भाभिर्मेहिध्वे तेजोदानेन सम्मानिताः॥ इदमुक्तं स्यात्तमोलवना
द्वै ४ दीनि हि रविकार्याणि एतानि च यूयमपि चक्रुं ततो बांदिभिरेवमाशंक्यते॥ योपीनेन स्वामिना स्वकार्यकरणक्षमतया स्वसद
शः कृत्वा लोके स्थाप्यते साहाय्याय सैन्यादिनाऽनुगम्यते विभूतिदानादिना सत्क्रियते वा स स्वामिकार्याणि कुरुते॥५१॥ ॥
पयज्ञविघ्नांश्छुलुविध्व एत्यानुग्राहिषीद्वं ननु तैरिदानीं॥ संस्कारिषीद्वं परिवारिषीध्वं द्राग्याहिषीध्वं च गुणे स्तदीयैः॥५२॥
॥ ॥हे राजन् पयज्ञविघ्नान् येषां मुनीनां यज्ञेषु विघ्नान् दैत्यादिकृतोपद्रवान् यूयं लुलुविध्वे॥ नन्विति संबोधने॥ तैर्मुनिभि
रिदानीं प्रातरेत्याश्रमेभ्य आगत्यानुग्राहिद्वमाशिषानुगृह्यध्वं॥ मुनयो हि राज्ञः प्रातराशिषं ददति तथा तैर्यूयं संस्कारिषी
द्वं मंत्रपाठपूर्वं तिलककरणेन विशिशीकृषीद्वं॥ तथा तैर्यूयं परिकारिषीध्वं परिवार्यध्वं॥ तथा तदीयैर्मुनिसत्कैर्गुणैरुपशमा
दिभिः कर्तृभिर्द्राक् यूयं ग्राहिषीध्वं चाश्रीयध्वं॥ परिवारस्य गुणाः स्वामिन्यध्यारोहंति॥ ५२॥ ॥ सिंहासनायोत्सहिषी
द्वमाभ्यां हरेर्ग्रहीषीध्वमथाधिसानोः॥ सदोऽयिषीद्वं द्युलिडं शकरत्नप्रो द्याश्रियंजंभभिदोऽयिषीध्वं॥५३॥ ॥हे राजन् यू
यं द्युलिहो व्योमस्पृशोऽशवः॥ किरणा येषां तानि तथाविधानि रत्नानि यत्र नत् सद आस्थानमंडपमयिषीद्वं गम्यास्त॥
तथा सिंहासनायोत्सहिषीद्वमुद्यम्यास्त सिंहासने उपविशतेत्यर्थः॥ अथासिंहासनोपवेशानंतरमधिसानो गिरिप्रस्थम
ध्यारूढस्य हरेः सिंहस्याभां शोभां ग्रहिषीध्वमाश्रयिषीध्वं॥ एवं च योद्भयानभिभवनीया कारेण जंभभिद इंद्रस्य श्रिय
मयिषीध्वमाश्रयत॥५३॥ ॥दुग्धोज्वला मुग्धदृशोऽंबुरुण्मान्धङ् मु ग्द्रि षांदानवलिट्ट्रियोथ॥ अमूढधीः कृ
त्य विधावनुन्मुड्रत्र धुगार्तिध्रुडसावुदस्थात्॥ ५४॥ ॥अथैवं बंदिभणनानंतरमसौ मूलराज उदस्थात्तल्पादुत्थि
तः॥ कीदृक् दुग्धवद्दुज्वलाऽमुग्धाऽमूढा विगतनिद्रा या दृक् दृष्टिस्तया कृत्वा जाता वेकचननात् दुग्धोज्वलामुग्ध दृग्भ्यामि
त्यर्थो वुरुह्ाअस्य स्तः॥ सोंबुरुण्मानिवांबुरुण्मान्॥ प्रभाते हि निद्राप्राणतयाक्षीणि दुग्धोज्वला नि विनिद्राणि च स्युः कमलानि

चेत्यु भयोरपि साम्यात् प्रबुद्धकमलतुल्याक्ष इत्यर्थः ॥ तथा मुग्द्विषां मुत्युं नि मुहो मृदा अन्यायकारिण इत्यर्थो ये द्विषो दैत्या दृय
स्तेषां दहतीति धक् विनाशयिता अतएव स्त्रा मद्रुत्यनि यत्र धुगिंद्रस्तस्याति दैत्यो पद्रवजनिता पीडा न स्येद्रुह्यन्ति जिघांसन्तिय:
सतथा ॥ अतएव दानवालिहं दैत्यघातिनं विष्णुमिच्छन्ति दानवालिहो देवास्तेषां प्रियः ॥ तथाऽमूढधीः पटुबुद्धिः ॥ अतएव स्तस्य विधो
नोन्मुत्यति अनुन्मुट् शंभुना स्वमेऽतिगुरुकार्यमुपदिष्टं तत्कथं करिष्य इति किं कर्तव्यतामूढो न बभूवन्निन्त्यर्थः ॥ ५४ ॥ ॥
दुग्धास्निगद्रूढमनः स्निडेप स्नुग्धामृतस्नूदवचाः श्रुतिस्नुक् ॥ स्नीदैर्द्विजैः स्निग्धतनुः सुमंत्रस्नुग्भिर्वृतः सांध्यविधिं व्यधत्त ५५
॥ ॥ दुग्धाजिघांसिता अस्निहो द्विषो येन स द्रुग्धानू निजिघांसुरित्यर्थः ॥ तथाऽद्रूढं मनो येषां तेऽमूढमनसोऽवंचकास्तेषु स्निह्य
ति यः सः शिष्टपालक इत्यर्थः ॥ एष मूलराजः सांध्यविधिं संध्यावंदनादि व्यधत्त ॥ कीदृक् सन् द्विजैर्वृतः ॥ किंभूतैः स्नीदैः स्नाता
सांध्यविधिर्विधीयत इति स्नानजलार्द्रत्वात्स्नि ग्धतनुभिः ॥ तथा सुमंत्रस्नुग्भिः प्रभातसंध्योचितप्रधानवेदमंत्रानुच्चार
यद्भिः ॥ तथा स्निग्धतनुः स्नानजलार्द्रांगः ॥ तथा मधुरत्वात् स्नुग्धं क्षरितमभृतं येन तत्स्नुग्धामृतमिव स्नूदमुद्गीर्णं वचो येन
सतथा सन् ॥ तथा श्रुतिं वेदं स्नु स्न त्युद्गिरति श्रुतिस्नुक् प्रभातसंध्याविध्युचितानि वेदवाक्यानि मधुरमुच्चारयंश्चेत्यर्थः ॥ अग्रा भिः
हिढ्वं अन्वग्राहिध्वं अनुग्राहिषीढ्वं ग्राहिषी ध्वं अन्वकारिढ्वं अन्वसारिध्वं संस्कारिषीढ्वं परिकारिषीध्वं इटः जगृहिढ्वे मेहिध्वेअ
ग्रहिढ्वं अग्रहिध्वं उत्साहिषीढ्वं ग्राहिषीध्वं पुपुविढ्वे लुलुविध्वे अलविढ्वं अलविध्वं अयिषी अयिषीध्वं इत्यत्र हातस्थाद्वीड्वा ढ्वं
वेति वादः ॥ परोक्षायां प्रिर्न संभवतीति नोदाहृतः प्रोद्ध्या पदांते धुलिडित्यत्र हो धुट्पदांत इतिहस्य दः ॥ असत्पर इत्येव
अंबुरुण्मान् अचदत्वतृतीयत्वयोरसत्वान्मावर्णेत्यादिना मतो मो वत्वं न स्यात् ॥ दुग्धपदांते धिगिति अत्र भ्वादेर्दादेर्घ इति
घः ॥ भ्वादेरिति किं दानवालिट् ॥ दादेरिति किं प्रोद्ध्या अंबुरुण्मान् अमुग्ध अमूढ मुग् अनुन्मुड् दुग्ध अद्रूढ स्त्र धुग् आर्त्ति
धुड् स्नुग्ध स्नूद श्रुतिस्नुक् मंत्रस्नुग्भिः स्निग्ध स्नीदैः अस्निक् स्निडित्यत्र मुहद्रुह इत्यादिना वा हस्य घः ॥ ५५ ॥ ॥ सभ
क्तिभाग्वाङ्नृपनद्धमौलिरत्नांचितोपानदुपोढरत्यः ॥ द्वाःस्थे किमात्थेति जनेषु वक्रे र्गात्स रोजं बकजेहुलाभ्यां ॥ ५६ ॥ ॥
समूलराजो जंबकजेहुलाभ्यां जंबको नाम मूलराजस्य महामंत्री जेहुलश्च रवईशलूराणको मूलराजस्य महाप्रधानं ताभ्यां सह मंत्र

मंडपमध्यात् यत उपोढमनयोः पुरो भणनाय चित्ते धारितं कृत्यं शंभुपदिष्टं दैत्यवधकार्यं येन सः ॥ क्व सति द्वाःस्थे प्रतीहारे ॥
क किंभूते जनेषु विज्ञापलोकेषु विषये वक्रे रिव वदति ॥ किमित्याह ॥ किमात्थ किमिति भूषेऽधुना विज्ञापनावसरइति तूष्णीं
तिष्ठेत्यर्थ इति निषेध्यानां जनानां बहुत्वेपि प्रत्येकं निषेधस्य विवक्षितत्वादात्थेत्यत्रैक वचनं ॥ कीदृक् सः भक्तिभाग् विनयान्विता
वाग् वाणी येषां तैस्तथा भूतैर्नृपैर्नद्धाः परिहिता ये मौलयो नृपचिन्हमुकुटानि तत्रत्यानि रत्नानि तैरंचिते पूजिते उपानहौ पादुके य
स्य स तथा सुकुट बद्धनृपैः कृत प्राभातिक सेवावसर इत्यर्थः ॥ नहउपानत् आत्थेत्यत्र नहाहोर्धतावितिधतौ ॥ वक्रे रिवा कजः
भक्तिभागित्यत्र चजः कगमितिकगौ ॥ ५६ ॥ ॥ विभ्राट् स यष्टेव शतं क्रतूनां मार्ष्टा गुणानां गुणराशिसृड्भ्यां ॥ संम्राड
मृभ्यामरिवर्गभृड्भ्यां स्त्रष्टेव विभ्राड्विधिकंसमृड्भ्यां ॥ ५७ ॥ ॥ संम्राट् नृपेशोऽमृभ्यां जंबकजेहुलाभ्यां सह विभ्राट्
शोभमानो भवत् ॥ कीदृक् क्रतूनां शतं यष्टेव शतक्रतुरिव विभ्रा न्यजते पूजयति क्विपि विभ्राट् ॥ यथेंद्रः क्रतूनां शतं कारयन्नृपि
प्रानिष्टवां स्तथा यजन् ॥ तथा गुणानां भौमित्वकांतत्वादीनां मार्ष्टा यथोचितं व्यापारणेन निर्मलीकारकः ॥ कीदृग्भ्याममृभ्यां
गुणराशि सृड्भ्यां राशीराजनं शोभां सृजतः कुरुतो यौ ताभ्यां गुणैः शोभनाभ्यामित्यर्थः ॥ अतएवारिवर्गं स्वस्य राज्ञ श्चबा
ध्यमानं रंच शत्रुसमूहं भृज्जतः पचतो विनाशयतो यौ ताभ्यां ॥ यथा स्त्रष्टा हरो विधिकंसमृड्भ्यां विधिर्ब्रह्मा कंसं मार्ष्टि शोध
यति विनाशयतीत्यर्थः कंसमृट् विष्णुस्ताभ्यां सहितो विभ्राजते ॥ ५७ ॥ ॥ विरुद्धकार्ययोरुपनिपाते हि मंत्रः स्यादिति
ते यत्तद्द्वयेनाह ॥ ॥ दंनांशुजालैः परिभृष्टशंखक्षोदैरिवोद्भ्राष्टिसदः प्रकुर्वन् ॥ सविट्पतिः प्राहतयोर्निविष्टः प्रभासवृ
ड्व्रष्टृनिदेशमैशं ॥ ५८ ॥ ॥ निविष्टः सिंहासने उपविष्टः सविट्पतिर्विशां पतिर्नृपस्तयोर्जंबकजेहुलयोरैशं शांभवं
प्रभासन्तीर्थ वृश्चंत्युपद्रवंति प्रभासवृश्चो ग्राहाद्यादयस्तेषां व्रष्टा छेदको यो निदेश उपदेशस्तं प्राह ॥ तत्कालापेक्षया वर्त
मानकालता ॥ कीदृक् सन् दंतांशुजालैरतिश्वेतत्वात् परिभृष्टशंखक्षोदैरिव परिभृष्टः परिपक्वो यः शंखस्तस्य ये क्षोदाः क्षुद्रस्मा
नावयवा अर्था दुर्वीभूतास्तैरिव कृत्वा सदो मंत्रमंडपमुद्भृष्टसंतीभ्रादिर्भ्राजनं शोभायस्य तत् शंखद्रवविलिप्तमिवेत्यर्थः प्र
कुर्वन् ॥ राजसभाहि शंखद्रवविलिप्तास्यात् ॥ ५८ ॥ ॥ कृतोमयाग्रा हरिपुः सजज्ञे परं परिभ्राट् तडल कुलग्नः ॥ प्र

श्चास्मिन ष्टास्य कथं त्वहंस्यां स्वरोपिते कः प्रजि हीः पुमानूर्क ॥५९॥ ॥ ग्राहरिपुर्मयाकृतः प्रतिष्ठितः परं केवलं
सग्राहरिपुः कुत्सितं लग्नं राश्युदयो यस्य स कुलग्नः कुमुहूर्तजातः ॥ अत एव न लज्जते ऽ लग्निर्लज्जः सन् परिव्राजकस्तप
स्विनस्तक्षति हिनस्ति परिव्राट्तट् तापसहिंसको जज्ञे ॥ अस्म्यहं तु प्रष्टा युवां पृच्छामि ॥ किमित्याह नुइतिवितर्के युवां
वितर्कैर्थां कथमस्य ग्राहरिपोरुष्टाविनाशको हं स्यां भवेयं ॥ अथ भणिष्यथो यद्यन्याय्ये पतञ्छिक्ष्यनां किमनेनम
भ्भेनेत्याह ॥ स्वरोपिते आत्मसंस्थापिते जने ऊर्जयतीत्यूर्क् सात्विकः पुमान् पुरुषगुणोपेतः कः प्रजिहीः प्रहर्तुमि
च्छन् को पीत्यर्थः ॥ एवं चास्य वध्यत्वावध्यत्वरूपयोर्विरुद्धकार्ययोरुपस्थितयोः किं कार्यमित्यहं युवां प्रष्टा तस्माद्युवां
यद्विधेयं तद्ब्रूतमित्याह ॥ ५९ ॥ ॥ त्वमभ्यपास्या गुरुणाभ्यजर्षा स्त्वं चोशनस्त्वं रिपुहा महात्मन् ॥ भियाम धामन्
मतिधामकृत्सं युवां ब्रुवाथामनहर्विलंबं ॥ ६० ॥ ॥ हे महात्मन् विपुलाशय भियां भयानां अधामन् अस्थान ॥ मति
धाम बुद्धिगृह जंबकरिपुहा त्वं गुरुणा बृहस्पतिना सहाभ्यपास्या भृशमस्पर्द्धा बुध्यात्वं बृहस्पतितुल्य इत्यर्थः ॥ त
था हे महात्मन् भियाम धामन् मतिधाम जेहुल रिपुहा त्वमुशनस्त्वं शुक्रकत्वमभ्यजर्षाः भृशमगृध्यो भृशमकांक्षो बुध्या
त्वं शुक्रसम इत्यर्थः तस्माद्युवां नास्त्यन्हो विलंबो यत्र तन् शीघ्रकृत्यं विधेयं ब्रुवाथां ॥ यजयश विभ्रेट् सृज् स्त्रश सृड्
भ्यां मृज् मार्ष्टि कंसमृड्भ्यां राज् राड्संम्राड् भ्राज् उद्भ्राड् विभ्राड् भ्रस्ज परिभ्रट् वर्गभृड्भ्यां व्रश्च् व्रट्
प्रभासवड् परिव्राज् परिव्राट् शकारांत निविश् विट् छादेशोपि शोग्रह्य ते ॥ प्रष्टेत्यत्र यजसृजेत्यादिना षः ॥
लग्न अलक् तष्टा तट् इत्यत्र संयोगस्येत्यादिना स्कोर्लुक् ॥ संयोगस्येति किं कृतः ॥ पुमानित्यत्र पदस्येति सं
योगस्य लुगंतादेशः ॥ पदस्येति किं स्या प्रजिहीरित्यत्र रात्स इति सस्यैव लुक् ॥ पूर्वेणैव सिद्धे नियमार्थं वचनं तेन रा
त्परस्य सस्यैव लोपो नान्यस्य ऊर्क् अभ्यजर्षाः अपास्याः ॥ रिपुहेत्यत्र नामिन इत्यादिना नस्य लुक् ॥ अन्ह इति किं अ न २
नहर्विलंबं अत्र पराविधौ रेफस्यासत्वान्नलोपः स्यात् ॥ महात्मन्नित्यत्र नामंत्रे इति नलोपाभावः ॥ मतिधाम अधाम
न्नित्यत्र क्लीबे वेति वा नस्य लुक् ॥ ६० ॥ ॥ नृपे च तूष्णींवति जेहुलो लक्ष्मीवान्यशस्वान्नयवत्सु धीमान् ॥ मुद्वान्दोही

वतिकासुनीवत्यृषीवतीधाः शुचिवाग्बभाषे ॥ ६१ ॥ ॥ अथैवमुक्त्वा नृपे मूलराजे तूष्णींवति मौनस्थिते जेहुलो ऽ दो
वक्ष्यमाणं बभाषे ॥ उपादेयवाक्यो हि मंत्रे भाषेतेत्युपादेयवाक्यताहेतुगर्भविशेषणान्याह ॥ लक्ष्मी राज्यकोशादि श्रीरस्या
स्ति लक्ष्मीवान् हि प्रायेण सर्वमान्यतयोपादेयवाक्यः स्यात् ॥ लक्ष्मीवानप्यन्यायी अन्यायोपदेशितया ऽग्राह्यवागेवेत्याह नय
वत्सु मध्ये यशस्वान् श्लाघ्यो ऽतिन्यायित्वात् ॥ न्याय्यपि निर्बुद्धिरग्राह्यवागेवेत्याह ॥ धीमान् बुद्धिमानपि शोकातुरो विप
टमानवाक्यतया ऽग्राह्यवागेवेत्याह मुद्वान् हर्षान्वितः ॥ मुद्वानप्यश्लीलवाक्यो ऽसुखकर्त्वादग्राह्यवागेवेत्याह ॥ अत्रा ता ऽ र
हीवत्यहीवति कांकपिञ्जादीङ्गनः कइति ह्रस्वः तस्याश्च मुनीवत्याश्च ऋषीवत्याश्च नदीनां यद्वार्जलं तद्वच्छुचिः पौनरुक्
त्यासत्यत्वादिमलरहितत्वेन निर्मला वाग्वाणी यस्य सः ॥ मकारांतात् तूष्णींवति ॥ मकारोपांतात् लक्ष्मीवान् ॥ अवर्णांतात्
नयवत्सु अवर्णोपांतात् यशस्वान् ॥ अपंचमवर्ग्यात् मुद्वानित्यत्र मावर्णेत्यादिना मतोर्मस्य वः ॥ मावर्णांतोपांतापंचम
वर्गादिति किं धीमान् ॥ अहीवतिका मुनीवती ऋषीवतीत्यत्र नाम्नीति मस्य वः ॥ ६१ ॥ ॥ चर्मण्वतीकर्तृ सदृक् रु
मण्वदुत्तुंग कक्षीवदनत्य धर्मन् ॥ युक्तं नता ष्ठीवदिलेश शंभु राभीरचक्रीवति यन्न्यदिक्षत् ॥ ६२ ॥ ॥ हे चर्मण्व
तीकर्तृ सदृक् चर्मण्वती नदी तस्याः कर्तारंतिदेवः तेन हि मैगोध यागः कारितस्तत्र चानेक गोवधेन गोरक्तैर्नदी प्रवर्तिता
तस्याश्चानेक गोचर्मयुक्तत्वेन चर्मण्वतीति नाम प्रसिद्धं तस्य सदृक् महायाग कारित्वात्तत्तुल्य ॥ तथा हे रुमण्वदुत्तुंग ल
वणम स्यास्ति रुमण्वान्नाम पर्वतस्तद्वदुत्तुंगोन्नताशय ॥ तथा हे कक्षीवदनत्य धर्मन् कक्ष्या शब्दो यो पांतः सादृश्यो
द्योगयोर्वर्तते ॥ कक्ष्या धर्मोद्योगो स्यास्ति कक्षीवान्नाम र्षिस्तद्वत् अभृतधर्म ॥ तथा स्थीनि संत्येषामष्ठीवंतो जंघोरुसंध
यो नता अष्ठीवंतो येषां ते नथ ले शा यस्य तत्संबोधनं हे प्रणम्यानेकभूप ॥ आभीर आभीरजाति र्ग्राहरिपुः चक्रं मंडलं
मे हनांते ऽस्यास्ति चक्रीवान् गर्दभ आभीर एवान्यायित्वेनानिंद्यत्वाच्च क्रीवांस्तस्मिन् विषये शंभुर्यदनुशासनं न्यदिक्षत्त
द्युक्तं ॥ धार्मिकस्य सैन्यादि सर्वशक्तियुक्तस्य तथान्यायिनि ग्राहरिपोविषये यः शांभवो ऽनुशासनादेशः स कर्तव्यो मे
प्रतिभातीत्यर्थः ॥ ६२ ॥ ॥ अथ राज्ञो मन्यूद्दीपनाय जगच्च यसंतापकानि ग्राहरिपोरनेकान्यन्याय पदानि चलानि च

यत्त चतुर्दिशत्या यद् नीशा देशस्यै बसुक्त नांद्र द यति ॥ ॥ औदन्वनद्रोह करेण चर्म वत्यस्थि मत्यर्दिततीर्थ पांथैः ॥
कक्ष्यावताम प्यगमाभ्युदन्वत्प्रभासभूश्चक्रवतामुनाभूत् ॥६२॥ ॥ उदन्वंतं समुद्रमभि ॥ लक्षणेनाभीत्यादिनाव्य
यीभावे ऽभ्युदन्वदुदन्वंतं लक्षीकृत्याभिमुखा प्रभासभूः प्रभासतीर्थभूमिः ॥ प्रभासतीर्थं हि समुद्रसमीपेस्ति ॥ यद्वा
भि अभित उदन्वती समुद्रोदकं बिभ्राणा या प्रभासभूः साकक्ष्यावतामापि कर्तरिषष्ठी उद्यमवद्भिरपि अगमा अग
म्या भूत् केन हेतुना ऽमुना याहारिणा ॥ कीदृशेनोदकमस्यास्त्युदन्वानृषिस्तस्यापत्यमौदन्वत ऋषिस्तस्य ॥ यद्वौदन्वान्ना
माश्रमस्तत्र भवा ऋषयस्तेषां द्रोहकरेण जिघांसुना ॥ तथा चक्रवता सुराष्ट्रादेशस्वामिना ॥ कीदृक् सतीभूरर्दिता ऽ
मुनैव विनाशिता ये तीर्थपांथा यात्रिकास्तैः कृत्वा चर्मवती चर्मान्विता ॥ तथास्थिमती कीकसान्विता च ॥ अनेनानेकान्
यात्रिकानृह तान्दृष्ट्वा यात्राभद्रालवोपि भयेन प्रभासे न गच्छंतीत्यर्थः ॥ चर्मण्वती अष्ठीवत् चक्रीवति कक्षीवत् रु
मण्वदित्येने चर्मण्वतीत्यादिना निपात्याः ॥ नाम्नीत्येव ॥ चर्मवती अस्थिमती चक्रवता कक्ष्यावतां ॥ अब्धौ अभ्युद
न्वत् उदन्वते त्येन उदन्वानब्धौ चेति निपात्याः ॥६३॥ ॥ राजन्वती याहरिणा सुराष्ट्रा तां दल्मिमानूर्मिमदब्धिभीमः ॥
शौर्योष्मकंडूक्रमिमानिवाद्य स भूमिमान्राजवतीं व्यधत्त ॥६४॥ ॥ या सुराष्ट्रादेशो हरिणा विष्णुना कृत्वा शोभनो
राजास्त्यस्यां राजन्वती आसीत्तां सुराष्ट्रामद्य सांप्रतं स भूमिमान्भूपति र्यो हरिपुर्निघो राजास्त्यस्यां निंद्य यांमतो
राजवतीं व्यधत्त ॥ कीदृक्सन् शौर्योष्मकंडूः शौर्यस्य य ऊष्मा तीव्रता तेन या कंडूः खर्जूर्युद्धविधाने ऽतिरेक स्तया क्र
मयः संत्यस्य क्रमिमानिव क्रमिमान्हि कंडू युक्तः स्यात् तएव दल्मिमान् शस्त्रविशेषान्वितो ॥ तएव चोर्मिमदब्धिभी
मो यथा कल्लोलान्वितः समुद्रो रौद्रः स्याद् एवं दल्मिधारणा द्रौद्रः क्रूराकृत्या या मति रौद्रो ऽयं कुराजी भूत इत्यर्थः ॥६४॥
॥ ॥ गोहत्मुनीनां यवमत्करांणां माहिष्मतीन्रोत्तककुद्मदंसः ॥ पुरे गरुत्मध्वजहनुमत्स्व जार्हैवसत्सोभानुम
तीन्द्राकल्पः ॥६५॥ ॥ असौ याहारिः पुरे वामनस्थल्यां वसति ॥ कीदृक्सन् माहिष्मान्द्रं द्रासतत्र भवा माहि
ष्मती पुरी तस्या इंद्रः सहस्रार्जुनोनु ॥ यथा सहस्रार्जुनो मुनीनां गोहत् नो न हि जमदग्निमुनेः कामधेनुर्हृता

दपहृतेति पुराणं ॥ तथा यवमंतो हो मार्थं गृहीतयवाः करा येषां तेषां यागविधान व्यग्राणामित्यर्थः ॥ मुनीनां गाहव्यं
गवीन हवनार्थं संगृहीता धेनूर्हरति चोरयति गोहृदपि ॥ अपिरत्राध्याहार्यः ॥ ककुद्मतो वृषभस्येवांसौ स्कंधौ य
स्य स ककुद्मदंसो ऽतिबलिष्ठः ॥ किंभूते पुरे ॥ गरुत्मान्नारुडो हनुमान्मारुतिस्तयो रुकृत्या नन्वित्यादिनाकनिषे
धे गरुत्मध्वजहनुमंतौ गरुड हनुमदादिरूपकालंकृतादृत्सर्थो ये ध्वजास्तेषां मर्हैर्योग्ये ऽनेककोटिप्रहनुमहेत्याधिष्ठि
तहर्म्यरम्यत्वात् ॥ यद्वा गरुत्मध्वजहनुमतौ ध्वजौ चिन्हभूतौ ययोस्तौ गरुत्मध्वजहनुमत्ध्वजौ वासुदेवार्जुनौ तयोरहो
वासयोग्ये वामनस्थल्यां हि वासुदेवार्जुनावुषिताबभूतां ॥ चौरा हि दुर्गपल्ल्यादिस्थान एव बसंत्ययं तु तथाभूतो
पिबलिष्ठत्वेन सर्वथा ऽकुतोभयत्वान्महर्धिके पुरे एव सकृत्याबसतीत्यर्थः ॥ अतश्च महापन्यायित्वाद्भानुमती
न्द्राकल्पो भानुमत्या ईन्द्रो भर्ता दुर्योधनस्तत्तुल्यः ॥ सोपि यवमत्कराणां महापुरुषलाय वाकारस्वप्रभासलक्षणा
न्वितहस्तानां मुनीनामुपरामेन मुनितुल्यानां पांडवानां गोहृत यतः खलेन भूमेरपहर्ता स न गरुत्मध्वजहनुमत्ध्व
जार्हे पुरे गजपुरे उवास ॥ राजन्वती ति राजन्वान्सुराज्ञीति निपात्यं ॥ सुराज्ञीति किं ॥ राजवती ऊर्मिमत् दल्मिमान्
भूमिमान् क्रमिमान् यवमत् गरुत्मत् ककुद्मत् माहिष्मती हनुमत् भानुमती त्यत्र वस्य नोर्म्यादिभ्य इति नि
षेधः ॥६५॥ निरुत्त स्वबस्त्रादि निनिरयत्राणि न्यासन्यनासीन इहोग्रदोषि ॥ मासार्धमासेन सन्यासनायमन्ये ऽनु
जो बिंद्रातिदोष्मेड हेतु ॥६६॥ ॥ इह याहरिपौ सतिमन्ये सद्योयादिगुणैः प्रसिद्धो विद्राति दोष्मो रावणस्यानु
जो बिभीषणो ऽर्धमासेन मसा मासेन वासनायोपवेशनायेखेत ॥ यतः ॥ कीदृशीह ॥ निरुत्त स्वबस्त्रादिनि धाटी
प्रदेत्वन्य परेड इत्यर्थः ॥ तथा निरयपि ॥ आविरत्रयोज्यः ॥ अत्राथिनि सदोषत इत्यर्थः ॥ तथोग्रदोषि प्रचंडबाहुप
राक्रमे ॥ अत एवासानिपीठे ऽनासीने स दात्रा कृतास्कंदतेचेत्यर्थः ॥ मास्मायं खलास्कंदनेन मामुपद्रवेदित्यस्माद्धे
व्यद्विभीषणः कुत्राप्यवस्थितिं न बध्नाती त्य हं संभावयामीत्यर्थः ॥६६॥ ॥ दुष्टोहृदाक्ष्माहृदयस्यत्रात्यं
पदार्धपादेन सरावणोनः ॥ उद्वानिधेरप्युदकैरराध्यः प्रियास्रजोसाव पृणाद्विडस्रा ॥६७॥ ॥ सप्रसिद्धो ऽ
सौ याहारिः प्रियमस्रग्रुधिरं येषां तान् राक्षसान् द्विडस्रान्रामुरत्के नापृणात्प्रीणयत् ॥ कीदृक् ॥ हृदा चेतसा
दुष्टो मायावी अत एव क्ष्मायाहृदयं चित्तमिव हृदयं वक्षस्तत्स्य त्रात्यमिवत्रात्यं ॥ लोकानां हृदये निविष्टं शल्यमि
वव्यथाकारीत्यर्थः ॥ तथास्त्रा भाविकबलेन विद्याबलेन चोद्वानं जलानां निधेः समुद्रस्याप्युदकैरप्यराध्यो रोद्धुमशक्यो ऽ
तएव पदश्चतुर्थभागेनार्धपादेनाष्टमभागेन वा रावणादूनो हीनो रावणोनः ॥ सापेक्षत्वेपि गमकत्वात्समासः ॥ रावणतुल्य इत्यर्थः ॥

॥ लुलद्यकृत्युच्छकृति द्विडैभे भलुच्च दंते यमद्द्विरस्त्रै: ॥ समद्यपूषेणनु रक्तपूष्णा यक्ष्मापशक्ता मदयाप्पिशाची: ॥ ६८॥
॥ सयाहरिपु: रक्तपूष्णा रुधिररसेनमद्यपूषेणनु सुरारसेनेव ॥ तथा: पगतं निर्गतं शल्कदिक्षा यस्मात्तेन यक्ष्मा कालखं
डेन पिशाची र्व्यंतरी विशेषा नमदयन्मत्तीचक्रे ॥ यतो यमदद्विर इति रौद्रत्वात् शत्रूणां मृत्युहेतुत्वाच्चानकदंत तुल्यैर
स्त्रै: कृत्वोच्चदंते उन्नतदशाने द्विडैभे शत्रूणां गजौघे भ्रमन् प्रहरन्नतएव किंभूते द्विडैभे लुलत्पीप्रहारवशात्पतद
कृन् कालेयं यस्य तस्मिन् तथा भयेनोद्गतं शल्कदिक्षा यस्य तस्मिन् ॥ शत्रुसैन्यानि हत्वा नेपारक्तेन मांसेन च कृत्वा
सोपि शाची रपोषयादित्यर्थ: ॥ लुलदित्यत्र लुडो धातो कफिडादित्वाडुस्य ल: ॥ लुलिति धात्वं तरं केचित् ॥ ६८॥॥
गिरास्फुरन्नासिकयान्यकार्षीन्निसीत दृष्टिं द्विपदी: सृजंतं वैय्याघ्रपद्यां द्विपदीय बुद्धिं तीर्थे पदां स द्विपदामभिनं ॥ ६९॥
सयाहारिपुर्व्याघ्रस्येव पादावस्य व्याघ्रपान्मुनिस्तस्य वृद्धमपत्यं गर्गादित्वाद्यञि वैय्याघ्रपद्यं मुनिं स्फुरंत्य वक्त्र
या मुयंती नासिका यस्यां तया गिरादुर्वाक्येनन्यकार्षीन् निर्भर्त्सितवान् ॥ ननु वैय्याघ्रपद्ये नापि का यस्य वाचोम
नसो वा तदनभीष्टकुव्यापारेणायमपराद्धो भविष्यति नेत्याह ॥ महायोगित्वान्नसि नासिकायामितं प्राप्तं दृष्टी यस्य
तमित दृष्टिमनेनास्य कायकुव्यापारनिवृत्तिरुक्ता ॥ तथा द्वौ पादौ यासु ता द्विपदीर्गाथा विशेषान् सृजंतं कुर्वंतं एते
नवच: कुव्यापारनिवृत्तिरुक्ता तथा द्वौ पादौ यस्यासोद्विपान् मनुष्यस्तस्मै हिता द्विपदी या सा बुद्धिश्चेतोवृत्तिर्यस्य
तं एतेन मन: शुद्धिरुक्ता ॥ नर्हि किमित्येनंन्यकार्षीदित्याह ॥ यत्तत्तीर्थे प्रभासादि पुण्यक्षेत्रे विषये पदां प्रद्यमानं
गच्छंतं जनमुपदेशदानेन प्रयुंजानानां णिच् क्विप् ॥ द्विपदामुक्तासाधारण विशेषणान्मुनीनाममित्रं शत्रु: ॥ ६९॥
॥ ॥ द्विपात्सु दुष्टेनुपपादुके ऽस्मिन् व्रत्तानि बिभ्रत्यनिगूढपादि ॥ लोका चतुष्पाद्यतिचैकपादितादप्यपाद्येन कथं न ध
र्म: ॥ ७०॥ ॥ धर्म: कथं नापाद्येत ॥ अत्र पादसमानार्थ: पाच्छब्दो ऽविद्यमान: पाच्चरणो यस्य सो ऽपान् पंगु: स इव कथं ना
चरेत् ॥ कसति अस्मिन् याहारौ ॥ किंभूते ऽनुपपादुके ऽनुपपदनशीले ऽनुपपन्ने कार्याकार्यविचाररहिते इत्यर्थ: ॥ अत ए
व द्विपात्सु नृपु विषये दुष्टेवंचकाभिप्राये ऽतएव च लोक: कर्मतापन्नएकं पादं भागमारव्याय तेस्माणि चिक्के चैकपादितस्त

स्मादपि लोका च्चतुष्पाद्यतिपादसमानार्थ: पाच्छब्दोत्र ततश्चतुष्पाच्चतुर्णां पदां भागानां समाहारमिच्छतिविश्वासनाय चतु
र्थभागं ग्रहीष्यामीत्युक्तादपि लोकाच्चतुरोपि भागान् ग्रहीतुकाम इत्यर्थ: ॥ अत एव चानि गूढपांदि गूढपादं सर्पमपि रौद्रत्वे
न कोटिल्येन चातिक्रांतानि वृत्तानि लोकदंडनादीनाचारान् बिभ्रति ॥ कलिमाहात्म्यात्तावदधुना धर्म एकपादेनैवावतिष्ठने
महापापिष्ठेन याहरिपुणा तु धर्मैकपादस्याप्युच्छेदितत्वाद्धर्म: पंगुरेवाभूदित्यर्थ: ॥ च: पूर्ववाक्यार्थापेक्षयासमुच्चये ॥
मासामासेन निशासु आसनिआसना येत्यत्र मासेत्यादिना लुगंतादेशो वा ॥ दद्भि: दंते पदापादेन नासिनासिकया हृदाहृदय
स्य हिड स्याभियासृज: पूष्णा पूषेणउ द्गा उदकै: दोष्णा: दोषै: यक्ना यकृति शक्ना उच्छकृति इत्यत्र दंतपादेत्यादिना दादि
त्यायादेशा वा ॥ वैय्याघ्रपद्यं द्विपदां द्विपदी द्विपदीयपदामित्यत्र यस्वर इत्यादिना पद् ॥ यस्वर इ निकिं द्विपात्सु ॥ अणिक्य
घु यिनि किं अति गूढपांदि एकपादिता न् ॥ क्यिति क्यन्क्यडोर विशेषेण ग्रहः ॥ चतुष्पाद्यति अपाद्येन ॥ नाम्न इत्येव अनु
पपादुके ॥ ७०॥ ॥ कृत्वा तिरश्चोनु पुर: पदाञ्चो पाच्यानुदीच्यान्सनृपान हंयु: ॥ भ्रुवाप्युदीचो ऽति हृदाप्युदीचादिवं जिगी
पुर्नृपति: प्रतीच्या: ॥ ७१॥ ॥ स प्रतीच्या: पश्चिमदिश: पति र्याहरिपुरपाच्यान् दक्षिणदेशसंबंधिन उदीच्यानुत्तरदेशसंबं
धिनश्च नृपांस्तिरश्चोन्वजादिपशून्निव पुरोपन: पदचारिण: कृत्वा भ्रुवाप्युदीच्योत्पाटितया हृदापि चेतसा चोदीचोत्पाटिते
नैति गच्छति यतो हं युरनेक नृपपदानि भावनयनेन संजातस्वबलवीर्यसंपत्युत्कर्षाद्गर्वाध्मात: गर्वाध्मानत्वात् कमपि च
क्षुषा नेक्षते चेतसा न स्मरतीत्यर्थ: ॥ उत्प्रेक्षते नायं गर्वानिरेका दुत्पाटितभ्रूहृदय: किं तु दिवं स्वर्गं जिगीषुर्नु ॥ यो हि
यज्जिगीषति स तदभिमुखं मन: श्चक्षुश्च निक्षिपति ॥ उदीच्यान् उदीचा उदीच्येत्यत्र उदच उदीचित्युदीच् ॥ अपाच्या
न्पदाञ्च: प्रतीच्या इत्यत्राच्च प्रागुदीर्घश्चेनि चादेश: प्रागुदीर्घश्च ॥ अन्वार्चैशिष्टत्वाद्दीर्घत्वस्य तदभावेपि चादेशस्या य
न् तिरश्च ॥ ७१॥ ॥ विदुष्मत: पुंविदुषोप्यधर्मोपेयुष्मत: पापनिषेदुषोस्य ॥ रौद्रास्त्रवेदुष्यजुषोतिभाराद्विषेदुषी
क्ष्माविदुषीचरित्रं ॥ ७२॥ ॥ अस्य याहरिपोरतिभाराद्विषेदुषी विषण्णा दु:खितासती क्ष्मास्य जनप्रंगनिरतस्य चरि
त्रं पापस्वरूपं वृत्तं विदुषी ज्ञात्री ॥ एतन्महापापभराक्रांता पृथ्व्यैवेन दुर्वृत्तं जानाति नान्य: कोपीत्यर्थ: ॥ यतो विद्वांसोभू

DR BHAU DAJI

म्नासंत्यस्यतस्य विदुष्मतोपि॥ अपिरत्रापि योज्यः॥ अधर्मेपिसुवांसोऽधर्ममुपगताः पापिष्ठाः प्रशस्याः संत्यस्यतस्याध
र्मोपेयुष्मतः प्रभृतविद्वत्संगमेनैपि पापिष्ठजनसंगनिरतस्येत्यर्थः॥ अतश्च पुंविदुषोपि नृषुमध्ये जानतोपि पापनिषेदुषः पापे
न्यायकर्मणि तस्थुषो विद्वज्जनसंगत्या धर्माधर्मादिविवेकं जानतोपि पापिष्ठजनसंगानिप्रसंगेन पापकर्मनिरतस्येत्यर्थः॥
तथा रौद्राणि भीष्माणि रौद्रदेवतानि वा यान्यस्त्राणि शस्त्राणि तद्विषयं यद्वैदुष्यं नैपुण्यं तज्जुषते सेवते यस्तस्य रौद्रास्त्रबलि
ष्ठत्वात् पापकर्मणः केनापि निवर्तयितुमशक्यस्येत्यर्थः॥ वैदुष्य विदुषः विदुषि निषेदुषः विषेदुषी विदुष्मतः उपेयुष्मत इ
त्यत्र क्वसुष्मतौ चेति उष्॥ ७२॥ ॥ नृशंसतारण्यशुनोस्य यूनो जिघृक्षतो माघवनीं नु लक्ष्मीं॥ मतिः शुनीपुच्छनिभाति यू
नी शल्यं मघोनीं भजतो मघोनः॥७३॥ ॥ यूनस्तरुणस्यास्य याहरिपोर्नृशंसतया क्रूरत्वेनारण्यशुनो वृकतुल्यस्य सतो
मतिरस्ति॥ किंभूता अतियूनी युवानमतिक्रांता॥ युवा हि प्रायो यौवनेन मदोद्धतः स्यात् तस्मादपि मदोद्धतेत्यर्थः॥ शुनी
पुच्छनिभा कुर्कुरीपुच्छवत् कुटिला च॥ उत्प्रेक्षते॥ नास्य मतिर्मदेनोत्ताना वक्रा च किंतु माघवनीं शक्रसत्कां लक्ष्मीं जिघृक्षतो
नु ग्रहीतुमिच्छोरिव॥ योहि उच्चतर्वादिस्थं फलं जिघृक्षति तस्योच्चफलोत्तारणायोत्ताना वक्रा चोंग यष्टिः स्यात्॥ अतएव
मघोनीं शचीं भजतोपि अपिरत्रज्ञेयः॥ मघोन इंद्रस्य शल्यं रतिसुखसागरावगाहकालेपींद्रस्य तन्मतिर्हृदयस्था शल्य
मिव दुःखाकरोतीत्यर्थः॥७३॥ ॥ स यौवनाद्यौवनमत्तताभृल्लोलो युवत्यां मघवत्यभीरुः॥ कीलालपेष्वाविनिह
त्य राज्ञो राज्ञीरुदस्नानिदधे वरोधे॥७४॥ ॥ स याहारिः कीलालपेष्वारक्तंपिबताशरेण राज्ञो विनिहत्य तेषां राज्ञीरु
दस्राः कष्टादुदतीः सतीरवरोधेंतःपुरे निदधे॥ यतः कीदृक् यौवनाद्यूनो विकाराद्धेतोः शौवनमत्तताभृत् शुन इयं शौ
वनी या मत्तता मदस्तां बिभर्ति यः सः श्ववन्मदनोन्मादीत्यर्थः॥ अतएव युवत्यां जातावेकवचनं युवतिषु लोलो लंपट
स्तथा मघवत्यपि अपिरत्रज्ञेयः इंद्रस्य शक्त्यादिभ्योपीत्यर्थः॥ अभीरुर्महाशक्तित्वात्॥ शुनी शुनः अतियूनी यूनः मघो
नीमघोनः इत्यत्र श्वन्नित्यादिना वस्य उः ङीस्या द्युघुङ्क्सर इति किं शौवन यौवनान् माघवनी॥ नकारांतनिर्देशादिहन
स्याद्युवत्यां मघवनिमघवदित्यत्र प्रकृत्यंतरं शक्रवाचकं॥ कीलालपेत्यत्र लुगातोनापइत्यातोलुक् अनाप इति किं उद-

स्राः राज्ञीः राज्ञ इत्यत्रानोस्येत्स नोऽतोलुक्॥ ७४॥ ॥ साम्नीव साम्नी इह ताक्ष्ण वार्त्रघ्न स्थामनी राजनि धार्तराज्ञे॥ दु
ष्कर्मणि स्वर्वणि वीक्ष्य भूम्नाम् भ्रानके: घ्नप्रतिदीव्निनेमुः॥७५॥ अघप्रतिदीव्न्यपि अघस्य पापस्य प्रतिदीव्नी वा रिपुसतुल्ये
पापैकप्रवर्तकेपीत्यर्थः॥ धार्तराज्ञे धृता राजानो येन स धृतराजा याहारिपिनातस्यापत्ये इह राजनि याहारौ भूम्ना बाहुल्येन भ्रू
भ्रार्लूत्वाकेननेमुः॥ यतः स्वर्वणि शोभनाश्वे॥ एतेन सैन्यसंपदुक्तिः॥ तथा दुष्कर्मणि निस्त्रिंशक्रिये॥ तथा किंकृत्वा इ
हानिरीक्ष्य॥ केताक्ष्ण वार्त्रघ्न स्थामनीतक्ष्णोदेभयद्धिके रपत्यं ताक्ष्णो वृत्रासुरः तथाप्यत्र घ्नो घ्नोषन्निणोऽपत्यं वार्त्रघ्नोऽर्जुनो द्व
द्वृत्तयोः स्थामनीपराक्रमौ॥ वृत्रार्जुनयोरिवाखिलजगज्जैत्रबलमवलोक्य चेत्यर्थः॥ यथा साम्नि साम वेदे साम्नी रथंतरबृ
हद्रथंतराख्यौ सामविशेषौ जिज्ञासादिना केचिन्निरीक्षंते॥ एतेनाघप्रतिदीव्न्यपि तस्मिन् यतः सर्वेपि नेमुः स्तवास्य सैन्यसं
पन्निस्त्रिंशताऽतिबलवत्ताजनितं भयमेव हेतुर्नांतरंगो बहुमान इत्यर्थः॥ साम्नी स्थामनि सामनि राजनीत्यत्र इडौ वेति वा
नोऽतोलुक्॥ ताक्ष्ण वार्त्रघ्न धार्तराज्ञेत्यत्र षादिहन्नित्यादिनाऽतोलुक् स्वर्वणि दुष्कर्मणीत्यत्र न वमंतेत्यादिनाऽनोऽतोलुक्
॥ संयोगादिति किं प्रतिदीव्नि भूम्ना॥ वमंतेति किं मूर्ध्नी॥ ७५॥ ॥ द्विजान् शतघ्न्यात्र मखघ्नि पृथ्वी प्लीह्नि प्रतिद्राक्
स्पृहयन्हविर्भ्यः॥ अद्यैव मन्ये क्षुधितो बलारिः सृष्टिं धिगस्मिन् कुमतौ विधातुः॥७६॥ ॥ प्लीहोदररोगभेदः पृथ्व्याः
प्लीह्नि प्लीहव्याधियज्वनानां दुःखकेऽत्र याहरिपौ शतघ्न्या आयुधविशेषेण द्विजान् द्राक् प्रतिहिंसति अतएव मखघ्नि
यागोच्छित्तिकारिणि सति मन्ये अहमद्यैव सांप्रतमेव न त्वद्यापि बलारिरिंद्रः क्षुधितः यतो हविर्भ्य इंद्रोद्देशेन संप्रदेयमंत्र
पूतहव्यवसुभ्यः स्पृहयन् तस्मात् कुमतौ पापबुद्धौ वस्मिन् याहरिपौ विषये विधातुः स्रष्टुः सृष्टिं निर्माणं धिग्गर्हामहे॥
शतघ्न्या मखघ्नि घ्नतीत्यत्र हनो घ्नो घ्नि प्र॥ हन इति किं प्लीह्नि॥ स्पृहयन् मन्य इत्यत्र लुगस्येत्यादिना स्यलुक्॥ अपद
इति किं बलारिः अद्यैव कुमतौ विधातुरित्यत्र ङित्स्यं त्येत्यादिनाऽत्यस्वरादेर्लुक्॥७६॥ ॥ भातीप्रथिम्ना मदतो विभांतीस
मुन्मिषंतीमिषतीयमेन॥ गलिष्यतीद्यां नु भुवं गलिष्यंतीत्वस्य नेत्रे सदृशी तनुश्च॥७७॥ ॥अस्य याहरिपोर्नेत्रे सदृशी
समाने प्रस्तावात्तन्वा तनुश्च मूर्तिः सदृशी समाना प्रस्तावान्नेत्राभ्यां॥ तथाहि॥ नेत्रे तावत्प्रथिम्ना विस्तारेण भाती शोभमाने

तथामदनः क्षीबनया घुर्णमानत्वारक्तत्वादिनेत्यर्थः विभांती ॥ तथासमुन्मिषंती मदवशादेवांतरांतराविकस्वरं विकसंती ॥ अत
एव यमेन सह मिषतीस्पर्द्धमानेयमवद्दीक्ष्मइत्यर्थः ॥ अत एव उत्प्रेक्षते न स्वभावतो यमेन मिषती किंतु पांसवर्गं गलिष्य
तीनु संहरिष्यमाणे इव ॥ तथा भुवं गलिष्यंतीनु ॥ तनुरपिप्रथिम्नास्थौल्यात्ज्जनितविस्तारेण भातितथामदतो हुंकारा
न् फुरफुरायमाणा अत एव समुन्मिषंतीउच्छ्वसंती ॥ शेषविशेषणानामर्थ एकवचनेन प्राग्वत् ॥ ७७ ॥ ॥ यदास्यपार्श्वे
धुनतीदलंती स्यंतीपरांश्चापलथानतूणे ॥ तदैवसाद्योर्दिविषत्सुमुक्तयुषु पुसयू र्युभवेत्कथन्नु ॥ ७८ ॥ ॥ यदास्य ग्राहा
रेः पार्श्वे चापलतास्यात् कीदृक् धुनती ज्याकर्षवशेन कंपमाना ॥ तथापरान् शत्रून् दलंती शरक्षेपिकात्वेन विदारयंती ॥
स्यंतीपराने वांतं नयंतीच ॥ अथ तथा यदा तूणे तूणीरे धुनतीशराकर्षवशात् कंपमाने ॥ शरक्षेपहेतुत्वात् परान् दलंती
स्यंतीचस्यात्तां तदैव दिविषत्सुमुक्त्युषु भयवशात्यक्तस्वर्गेषु सत्सु द्युसद्देवान्दीव्यतीछ्विक्षिपिकुचिन्द्युसयू दे
वानिच्छंतीसतिं सादीव्यति क्रीडति देवैरित्यन्वर्थेन प्रसिद्धा द्यौः स्वर्गलोकः कथंनु अद्यौर्द्यौर्भवेत् द्युभवेत् दीव्यति देवैरि
त्यन्वर्थयुक्ता कथन्नाम स्यान्नस्याद्वेत्यर्थः ॥ समुन्मिषंती मिषती गलिष्यंती गलिष्यती विभांती भाती अत्राचर्णादि
त्यादिना वानुरंतादेशईङ्यो ॥ अप्रेइतिकिं धुनती स्यंती दलंती अत्र स्यशव इत्यनुरंतादेश ईङ्योः ॥ द्यौरित्यत्र दिव औः
सावित्योः ॥ निरनुबंधग्रहणेनसानुबंधकस्येति धातोर्नसा ॥ द्युसयूः मुक्त्युषु द्युसदित्यत्र उरित्यादिना उः ॥ पदांत
इति किं दिविषत्सु ॥ अनुदिति किं द्युभवेत् अत्र दीर्घश्चीत्यादिना वो दीर्घत्वन्नस्यात् ॥ ७८ ॥ ॥ इति पंचमः पादः ॥ ॥
महेनसां कारकवत्क्रियाणांहेतुः स्वतंत्रः स कुकर्मकर्ता ॥ विश्वंततापाट दिशो ललंघेऽध्यीनासदुर्गाणि भयन्नलेभे ॥ ७९ ॥
॥ ॥ स ग्राहरिपुर्विश्वं ततापोद्वेजितवान् ॥ कीदृक् सन् स्वतंत्रः सर्वोत्कटत्वात् कस्याप्यनायत्तः ॥ तथा कुकर्म द्रोहवं
चनादिकानिद्यांक्रियांकर्तास्वयंकुर्वन् तथा कारकवत् यथाकारकं कर्त्रादि क्रियाणां धात्वर्थानां पाकादीनां हेतुस्तथै
नसां महापापानां द्रोहवंचनादीनां हेतुरन्यैरपि महापापानि कारयंश्चेत्यर्थः ॥ विश्वतापप्रकारानेवाह आट दिशो लोक
लुंटनाद्यर्थं सर्वाशाभ्रांतवान् तथा ललंघे अध्यीं स्तथा आसदुर्गाण्यद्रिकोट्टादिदुर्गस्थानानि बभंज ॥ दिक्षु पलायितोप्य्यद्यौ

र्गे वा प्रविशोपि न कोप्यस्माद्देत्याच्छुटित इत्यर्थः ॥ तथा भयन्नलेभे एवं विश्वं संतापयन्स्वतंत्रत्वात् कस्माद्दपिन भीतइत्यर्थः ॥ योपि
कुकर्मरूपः कर्तविधाना कुदेवंस्यात्सोपि स्वतंत्रोमहेनसां क्रियाणां हेतुः सन् दुर्भिक्षडमरयुत्पादनेन लोकं तपती दिगब्धिदुर्गाण्या
श्रयन्नपि तस्मान्नच्छुटती त्युक्तिः ॥ ७९ ॥ ॥ केत्यापारन् भापयनेसभूपान् वसूनि गांदोग्ध्यनुशास्त्यधर्मं ॥ मुनीन्ससामाह रुण
द्धिवृ त्तिं नसत्पथं पृच्छति याचतेर्थं ॥ ८० ॥ ॥ केत्यापि राजपाद्याप्यटन् गच्छन्सन् स ग्राहरिपुर्भूपान् भापयते राजपाद्या मप्ये
सा चताबलेन याति यावता अश्वखुरोत्खात धूलिधूसरितां यरोसौ न नमस्मानास्कंदितु मेतीत्याशंकातंका कुलान् करोतीत्यर्थः ॥ एतेन उ
भ्रपरत्वं बलसंपदतिशयश्चोक्ते ॥ तथा गां पृथ्वीं वसूनि द्रव्याणि दोग्धि क्षारयति ॥ एतेनामुनोर्वीकरपीडिता कृतेत्युक्तं तथा गामे
वा धर्मं पापमनुशास्ति शिक्षयति पापे आपारयनीत्यर्थः ॥ तथा मुनीन् सामम धुरवाक्यं नाह निर्भर्त्सयतीत्यर्थः ॥ तथा मुनीने
य र्त्तिं भिक्षाचर्योञ्छेदिकां जीविकां रुणद्धि निवारयति तथा मुनीन्सत्पथं न्यायमार्गं न पृच्छति न कथापयतीत्यर्थः ॥ तथा मुनी
नर्थं द्रव्यं याचते ॥ ८० ॥ ॥ रत्नानि रत्नाकरमुज्झितोतिनिधीन् कुबेरं विजिगीषतेसौ ॥ प्राणान्विपक्षैर्युधि भिक्ष्यते च स्वभर्तृभावं
वनतीयते च ॥ ८१ ॥ ॥ असौ ग्राहारिः रत्नाकरं सागरं रत्नान्युज्झितो तिवियोजयतीत्यर्थः ॥ एतेन कोशसंपदुक्तिः तथा कुबेरं ध
नदं निधीन् धनानि विजिगीषते ॥ एतेन संपूर्णे पि कोशे नद्दृष्टो निरुद्य मत्व निरासउक्तः ॥ तथासौ युधि विपक्षैः प्राणान् भिक्ष्यते
चास्मान् जीवतो मुंचेति जीवितव्यं याच्यते च ॥ एतेन पराक्रमित्वोक्तिः ॥ तथा वनेतिखेदेविपक्षैरेवा सौ स्वभर्तृभावमात्मस्वामि
तां नीयते च आत्मनः स्वामी क्रियत इत्यर्थः ॥ एतेन प्रभुसंपदुक्तिः ॥ एतेन सर्वेणास्य दुःसाध्यत्वोक्तिः ॥ ८१ ॥ ॥ जन्हे न्यदारान्
स्वपुरीं दशास्यो गां कार्तवीर्योयतिनं मुमोष ॥ भ्रूणानकर्षद्भगिनीं च कंसोऽयहीत्किमेनान सकान नीतिः ॥ ८२ ॥ ॥ दशा
स्यो रावणोऽन्यदारान् रामभार्यां सीतां स्वपुरीं लंकां जन्हे निनाय ॥ तथा कार्तवीर्यः सहस्रार्जुनो यतिनं जमदग्निं गां काम
धेनुं मुमोषापजहार ॥ तथा कंसः कंसाख्यो दैत्यो भगिनीं देवकीं भ्रूणान् गर्भानकर्ष द्देवकीपार्श्वाद्दधार्थं भ्रूणान् गृहीतवानित्य
र्थः ॥ कंसस्यापितोग्रसेनो देवकी पिता देवकश्चभ्रातरावितिकंसभगिनीत्वं देवक्याः ॥ एतान् दशास्यादीन नीतिरन्यदारापहारादि
कानन्यायानसकोग्राहारिः किमग्रहीद्देषां पार्श्वाद्देना अनीतीः किमसौ जग्राहेत्यर्थः एतासां सर्वासामप्यनीतीनामत्रदर्शनादि

॥ ॥ गजाश्वगाः सिंधुपतिममंथमहीभृतो भेदमुवाह चेत्थं ॥ इंद्रं गुणानूदंडिवौ तेत्तु कालं स घातयामासननेन कालः ॥ ८३॥
॥ सयाहारिः सिंधुपतिं सिंधुदेशाधिपं गजाश्वगाः हास्तितुरंगवृषभान्ममंथ मथित्वाग्रहीत्‌ दंडितवानित्यर्थः॥ तथा महीभृतो
नृपान्‌ भेदं संहत्यभाव मुवाहत्व प्रापितवान्‌ ॥ अन्यान्नृपान्‌ कूटमयोगेण भेदितवानित्यर्थः॥ इत्थमनेन प्रकारेणेंद्रं शक्रं
गुणान्‌ सिंधुपतिमंथनादीन्‌ धर्मान्‌ दंडितवांस्तु किं हग ज्जेयाह ॥ इंद्रो हि सिंधुपतिमब्धिमैरावणं गजमुच्चैःश्रवसमश्वं
कामधेनुं गां च ममंथ ॥ तथा महीभृतोद्रीन्‌ भेदं पक्षच्छेदमुवाहेते चेंद्रगुणा अत्रापीक्ष्यंत इत्येव माशंका॥ तथा स कालं
यमं घातयामास॥ कर्माविवक्षायां जघानकालस्तं जघ्निवांसं प्रयुयुजे युद्धादिविधानेन स स र्वं घातितवानित्यर्थः॥ न
तु कालः कर्ता तेन याहारिपुणा प्रयोजककर्त्रा घातयामास हनने कालस्यापि सप्रयोक्तानु तस्य काल इत्यर्थः॥ इदमुक्तं स्यात्‌
यत्रायं रुष्टः तमसमयेपि यमो हंति यत्र त्वयं प्रसन्नः तं समयेपि यमो दूरान्नमस्करोति ॥ क्रियाणां हेतुः कारक नदित्यनेन
क्रियाहेतुः कारकमिति सूत्रं सूचितं स्वतंत्रः कर्तेत्यनेन स्वतंत्रः कर्तेति सूत्रं सूचितं॥ प्रयोजको पि कर्तैवेति भापयते सः क
र्मेत्यंशेन कर्तुर्व्याप्यं कर्मेति सूत्रं व्यंजितं ॥ तत्कर्म त्रेधा ॥ निर्वर्त्य १ विकार्य २ प्राप्यं च ३॥ निर्वर्त्यं यथा कुकर्म कर्ता विकार्यं
यथा विध्वंसताप ॥ प्राप्यं यथा आटदिशः ॥ त्रिविधमप्येतत्पुनस्त्रिविधं इष्टमनिष्टमुभयं च ॥ तत्रेष्टं कुकर्मादी अनिष्ट
मब्धीनूलुलंघे दुर्गाण्यासभयन्न लेभे॥ उभयं केत्याप्यरनू भापयते स भूपान्‌॥ पुनस्तत्कर्म द्विविधं प्रधानेतरभेदात्‌ तत्र
द्विकर्मकेषु धातुषु दुहिभिक्षिरुधिप्रछिचिञ्ब्रूशास्त्वर्थेषु या विजयति प्रभृतिषु च भवति ॥ दुस्त्यर्थस्य निगां दोग्धि॥
भिक्ष्यर्थ मुनीन्याचते . थं एवं मुनीन्‌ रुणाद्धि रत्निं मुनीन्सनूपथं पृच्छति रत्नानि रत्नाकरमुच्चिनोति मुनीन्सामाह गां ध
र्ममनुशास्ति॥ याचेरनुनयार्थस्योदाहरणं स्वयं ज्ञेयं॥ जयति प्रभृति॥ निधीन्‌ कुबेरं जिगीषते जन्हेन्यदारान्‌ स्वपुरीं गां
याति नं मुमोष भूणानकर्षद्रुगिनीं अयहीदेतान नीतीः गजाश्वगाः सिंधुपतिं ममंथ महीभृतो भेदमुवाह इंद्रं गुणान्‌ दं
डितवान्‌ ॥ तत्र दुहादीनामप्रधानकर्मणि प्रर्मजः प्रत्ययः॥ असौ प्राणान्‌ विपक्षैर्भिक्ष्यते॥ नीप्रभृतीनां तु प्रधाने कर्मणि
असौ स्वभर्तृभावं नीयते॥ कालं स घातयामास ननेन काल इत्यत्र वा कर्मणामित्यादिना णिगवस्थायां यः कर्ता स णौ सति वा कर्म ८३

॥ ॥ सोजीगमत्खेदमिलां बलौघैरबोधयद्भाररुजं फणींद्रं॥ अदर्शयत्कालपुरीमरातीनभोजयत्तत्पिशितं पिशाचान्‌ ८४
॥ सयाहारिर्बलौघैः कृत्वा तिबाहुल्यादिलां महीं खेदं कष्टमजीगमत्प्रापितवान्‌॥ अत एव बलौघैः फणींद्रं शेषाहिं भा
ररुजं भारपीडामबोधयत्‌॥ तथा बलौघैररातीन्‌ कालपुरीं संयमन्याख्यां यमपुरीमदर्शयत्‌ व्यापादि तवानित्यर्थः॥
अत एव पिशाचांस्तत्पिशितमभोजयत्‌॥ एतेन दिग्विजय उक्तः॥ ८४॥ ॥ आश्रावयन्नियहगर्भवाचं बंदीकृतान्‌
दंडमथीवदत्सः॥ संस्थापयन्वैरिशिरस्सु पादं तेजोभिरुग्रैः कमपीपचन्न॥ ८५॥ ॥ सयाहारिः हतापहृतानरावंदा
अबंदा बंदाः कृतास्तान्‌ निग्रहगर्भा यदि तावन्न दास्यथ नदाहं युष्मान्‌ मारयिष्यामि इति विनाशप्रधाना या वाक्‌
तामाश्रावयन्‌ शृण्वतः प्रयुंजानः सन्‌ बंदीकृतानेव दंडमथीवदत्‌ भाणितवान्‌ अंगीकारितवानित्यर्थः॥ एतेन म्ले
छाचारो स्योक्तः॥ तथा वैरिशिरःसु पादं संस्थापयन्‌ शत्रून्‌ नतिं च कुर्वन्नित्यर्थः॥ स उग्रैः प्रचंडैस्तेजोभिः प्रतापैः
कर्तृभिः कं नापीपचत्कं नादीदहत्‌॥ ८५॥ ॥ सउज्जयंते चमरीर्मृगव्येष्वानाययन्नादयते श्ववृंदैः॥ आक्रं
दयन्‌ खादयति प्रभासतीर्थाश्रमैणीरपि चित्रकायैः॥ ८६॥ ॥ सयाहारिरुज्जयंते रैवतकाद्रौ मृगव्येष्वाखे
टकेषु श्ववृंदैः कुक्कुरौघैः कर्तृभिश्चमरीः गोविशेषानानाययन्‌ सन्‌ श्ववृंदैरेव कर्तृभिश्चमरीरादयते खाद
यति॥ तथा चित्रकायैर्द्वीपिभिः कर्तृभिः प्रभासतीर्थे ये आश्रमा मुनिस्थानानि तेषां या एण्यो मृग्यस्ता अपि आलं
तावद्भनस्था मृग्यः प्रभासतीर्थाश्रमावस्थितास्तु तिपाविन्यादवध्या अपीत्यपेरर्थः॥ आक्रंदयन्‌ क्रंदिरत्रां तर्भु
तण्यर्थः स कर्मकस्तीर्थाश्रमैणीरप्याक्रंदतः कर्णावयवग्रहेण राटयतश्चित्रकायान्‌ प्रयुंजानः सन्‌
चित्रकायैरेव कर्तृभिः प्रभासतीर्थाश्रमैणीरपि खादयति॥ ८६॥ ॥ तदेवमस्यात्यपन्यायकारितामतिवलिष्ठ
तां च प्रतिपाद्याधुना कार्यमाह॥ ॥ शब्दायय च्छ्रायययमाय दूतैस्तं भक्षयंतं जगतामभक्ष्यं॥ शारीद्विपान्‌ वाहय
वाहयाज्ञांत द्दंडचंडां ननु दंडनेत्रा॥ ८७॥ ॥ तत्तस्माद्धेतोर्नन्विति संबोधने हे राजन्न भक्ष्यं गोमांसादि कर्म ज
गतापि आस्तां तावद्दारमनालोके नापि कर्त्रा भक्षयंतमुपलक्षणत्वाद भक्ष्यभक्षणादन्याये षु जगदपि प्रवर्तयंतं

९ ननु यदि ग्राहारि महापन्यायो ज भक्ष्य भक्षणादन्यायेन न पापप्रवर्तयति तदा तस्य वदा ...

संतमित्यर्थः॥ तं ग्राहारिं दूतैः कर्तृभिर्मा शब्दाययमावादय तथा दूतैर्मा ह्वायय मा कारय किंतु द्विपान् शारीर्हस्तिपर्याणा निवाहय शारीर्धारयतो द्विपानू प्रभुं स्वयुद्धाय सन्नाहयेत्यर्थः॥ तथा दंडनेआसेनान्याकर्तृदंडचंडातान्नियहेरौद्रामाश्रा वाहय आपयतं विनाशयेत्यर्थः॥ गत्यर्थअजीगमत्स्वेदमिलां॥ सामान्य बोधार्थ अबोधयद्धाररुजं फणींद्रं॥ विशेषबो धार्थअदर्शयत्कालपुरीमरातीन्॥ आहारार्थअ भोजयाशिशितंपिशाचान्॥ शब्दक्रियवंदीकृतान्दंडमवीवदन्॥ शब्दन्याय्य आश्रावयन्याचं वंदीकृतान्॥ नित्याकर्मक संस्थापयन् पादं॥ इत्यत्र गतिबोधेत्यादिना ऽणिकर्ताणौ कर्म॥ गत्यर्थादीनामिति किं तेजोभिः कन्या पीपचत्॥ नयत्यादिवर्जनं किं भवं दैश्वमरीरानाययत्॥ चित्रकायेरणीः खादय तिभयं दैश्वमरीरादयति दूतैस्त्वं माह्वायय चित्रकायैरणीराक्रंदयन्॥ भक्षेर्हिंसायामित्यत्र हिंसायामेवेति नियमोऽहिं सायामणिकर्तुः कर्मसंज्ञाप्रतिषेधफल एवेत्यस्य सूत्रस्य जगताप्यभक्ष्यं क्षैभयंतमिति कर्मव्यारत्युदाहरणमेव द र्शितं॥ शारीर्द्विपान्वाहयेत्यत्र वहेःप्रवेयइत्यणिकर्ता णौ कर्म॥ प्रवेयइति किं दंडनेत्रास्तांवाहय॥८७॥ ॥ विहारयेद्योजनतां कुवर्त्म विहारयेन्मृत्युपथं हितेन॥ उनहारयंस्तं किलदंडमीशः स्वं हारयेद्धर्ममघेन तस्य॥८८॥ ॥ यः कोपिजनतां जनौघं कुवर्त्मान्यायमार्गं विहारयेद्भ्रमयेत्तेन कर्त्रा हि स्फुटमीशः समर्थो मृत्युपथं मरणं विहारयेत् मृत्युपथं वि हरंतं प्रयुंजीत गमयितुमर्हतीत्यर्थः॥ एतदेव व्यतिरेकेण द्रढयति॥ किलेत्याप्तवादे आप्ताएवं वदंति योजनतां कुवर्त्म विहारयेत्तं नरं दंडं निग्रहमहारयन्प्रापय न्नीशः समर्थस्तस्य जनतां कुवर्त्म विहारयितुर्येन पापेन कर्त्रा स्वमात्मीयं धर्मं हारयेच्चोरयेत्॥ एतेन यदि त्वमीशः सन् पापिष्ठमेतं जगत्पापे प्रवर्तयंतं न निग्रहीष्यसि तदैतत्पापेन त्वमपि ग्रही ष्यस इत्युक्तं॥८८॥ ॥ एवमसावनिगृहीतः परलोके हित इत्युक्त्वा यथेहलोकेप्यहितस्तथाह॥ ॥ अप्यंतकं स्था मनिकारयेत्तं निकारयेत्तं यदिनात्मदंडैः॥ उपेक्षिताः स्वं स्वविकारयद्भिः सद्भिः खलाः कैर्न विकारयेयुः॥८९॥ ॥ यदित्वं तं ग्राहारिमात्मदंडैः स्वसैन्यैः कर्तृभिर्न निकारयेर्निग्रहेण न तिरस्कारयासि तदासयाहारिः स्थामबलेनांतकमपि आत्मानमन्येयुष्मादृशान्नृपाः सर्वत्रास्त्वलित् बलंयममपि निकारयेद्ग्राहरिपुः स्वस्थामांतकं निकुर्वन्प्रयुंजीत स्वस्था

न्नायममपि पराभवेदित्यर्थः॥ संभावने सप्तमी॥ एतेनास्मिन्ननिगृहीते महारोगवद्वर्द्धमानेः साध्यतां गते त्वमपि विनं क्ष्यसीत्युक्तं॥ एतदेवार्थांतरन्यासेन द्रढयति हि यस्माद्धेतोः स्वमात्मानमविकारयद्भिरविकुर्वाणं स्वं प्रयुंजानैरविकृतीभव द्भिरित्यर्थः॥ सद्भिरुपेक्षिताः संतः खला दुर्जनाः कैः कर्तृभिर्न विकारयेयुः कान्नविकुर्वाणान्प्रयुंजीरन् किंतु सर्वानपि स्वपद प्रच्यावनादिना विकृतान्कुर्युरित्यर्थः॥ विहारयेज्जनतां कुवर्त्म विहारयेन्मृत्युपथं तेनेत्यत्र गत्यर्थत्वात्प्राप्तोऽस्त्वमपिका रयद्भिः कैर्न विकारयेयुरित्यत्राकर्मकत्वात्प्राप्तो अहारयंस्तंदंडं हारयद्धर्ममघेन अंतकं स्थामनिकारयेत् दंडैस्तं नि कारयेदित्यत्रचाप्राप्तोहृक्रोर्न्वेत्यणिकर्ताणौ कर्म वा॥८९॥ ॥ एवं च दंडमवश्यकार्यं तयोरकानत्वप्रतिकूलां क्षमां नि रस्यं स्तद्धेतुं रुषं रुत्तद्वयेनाह॥ ॥ दुर्नीतिभिर्दर्शयमानमेतमद्यापि किं दर्शयसे प्रसन्नः॥ मामायिनं जात्वभिवादयस्व न्यायेर्नयज्ञाह्यभिवादयंते॥९०॥ ॥ हे राजन्नद्याप्येतावियद्दोषविनकालउपस्थितेप्येतं ग्राहारिं त्वं प्रसन्नो नीरोषः सन् किं दर्शयसे एषत्वां प्रसन्नं पश्यति जानातितं पश्यंतं त्वमेवानुकूलाचरणेन किमिति प्रयुंक्षे आस्मिन्प्रसन्नं स्वं मादर्शये त्यर्थः॥ यतः किंभूतमेतं दुर्नीतिभिः कर्त्रीभिः दर्शयमानं दुर्नीतीरेतं पश्यंती रेतमेवानुकूलाचरणेन प्रयुंजानमपन्यायान्त्रय मित्यर्थः॥ तथैनं मायिनं छद्मपरं संतं जातु कदाचिदपि माभिवादयस्व एतं त्वां मायया ऽभिवंदंतं प्रणमंतं त्वमेवानुकूलाच रणेन मा प्रयुङ्क्ष्व॥ हि यस्माद्धेतोर्नयज्ञा नीतिवेदिनो न्याय्यैर्न्यायिभिः कर्तृभिरभिवादयंते न्याय्यानभिवंदतः प्रणमतो नुकूलाचरणेन प्रयुंजते नान्याय्यानिति॥ एतं दर्शयसे दुर्नीतिभिर्दर्शयमानं एतमभिवादयस्व न्याय्यैरभिवादयंते इत्यत्र दृ श्यभीत्यादिना ऽणिकर्ताणौ कर्म वा॥९०॥ ॥ न नाथयस्त्वां निशिनाथनाथं तन्नाथसे चेद्यशसामथोच्चैः॥ स्ववंशधर्मं स्मर सिस्मृतेर्वा चेत्तद्दयस्वेह रुषां क्षमां मा॥९१॥ ॥ हे नाथ निशि यस्त्वां न नाथ याहरिप्वादि दैत्यवधं याचिनवांस्तं शंभुं ना थं प्रभुं चेन्नाथसे नाथो मे भूयादित्याशंससे॥ अथाथवोच्चैरुन्नतानां यशसां दैत्यवधोत्थकीर्तीनां चेन्नाथसे यदि यशोर्थ यासि चेत्यर्थः॥ तथा स्ववंशस्य चौलुक्यान्वयस्य धर्ममपन्यायुच्छेदनरूपमाचारं स्मृतेर्वाः न्यायिनो निग्राह्या इत्याद्युपदे शरूपाया राजधर्मसंहिताया वा चेत् स्मरसि तत्तदा इह ग्राहारौ विषये रुषां कोपानां दयस्व गच्छ कोपं कुर्वित्यर्थः॥ क्षमां मा क्षांतिं मादयस्व तद्वधाय नाहं शक्त इति माज्ञासीरिति॥९२॥ ॥ तद्वधशक्तौ हेतुमाह॥ ॥ त्वमेव तस्येशिषइत्यादि ईशा

नइइत्यां तदुपस्कुरुष्व ॥ बलं धियां चास्य वधे रुजेद्धि राज्यस्य राष्ट्रं द्विडुपेक्षमाणो ॥ ९२॥ ॥ हे राजं त्वमेव नान्यस्तस्य ग्रा-
हारेरीशिषे प्रभवसि तं वशीकर्तुं शक्तो पीत्यर्थः ॥ इति हेतोः स्वामी शानात्त्वं स्वामी भवन् सन्नीदृशं भुक्त्वा नदिस ग्राहा
रिवधायादिशत् ॥ यदि त्वं तद्वधाय शक्तो नाभविष्यस्तदा शंभुस्त्वां तद्वधं नोपादिक्ष्यत् तस्मात्त्वं तद्वधे शक्त इत्यर्थः ॥ तत्तस्मा
दस्य ग्राहारेर्वधे बलं सैन्यमुपस्कुरुष्व संनाहादिसामग्र्या विशिंढि ॥ तथास्य मायित्वेन केवलबलेन हंतुमशक्यत्वाद्धियं चो
पस्कुरुष्व मंत्रविशेषेण बुद्धीर्विशिंढि विशिष्टबुद्धिप्रयोगं चेह कुर्वित्यर्थः ॥ असौ स्वपापपरिपाकेनैव पक्ष्यते तदस्योपेक्षे
वयुक्तेति न वाच्यं ॥ हि यस्माद् द्विडुपेक्षमाणो शत्रूपेक्षमाणः शत्रूपेक्षणमेवामो रोगो राज्यस्य राष्ट्रं देशं च रुजेत् पीडयेत् ॥ अन्यो
रोगः किल रोगिणमेव विनाशयति शत्रूपेक्षा रोगस्तु राज्यं राष्ट्रं च विनाशयतीति ग्राहारिवधोपेक्षां मा कृथा इत्यर्थः ॥ ९२ ॥॥
अथ राज्ञस्तद्वधे विशेषेणोत्साहनाय यत्स्वयं सर्वविधेयोपदेष्टृ न पि युष्मान् प्रति मयैवमुपदिष्टं तत्सर्वं निरर्थकमिति दर्शय
न्नाह ॥ ॥ संतापयंतं ज्वरयंतमुर्वीं तमामयं छेत्तुमलं निदेशैः ॥ भुवः किलोज्जासयदद्रिचक्रं केनेंद्र उज्जासयितुं नियुक्तः
॥ ९३॥ ॥ तं ग्राहारिं छेत्तुं निदेशैर्युष्मान् प्रति भणनैरलंकृतं ॥ उर्वीं पृथ्वीं संतापयंतं प्रभृतकरादिभिरुपद्रवंतं ॥ निर्निमि
तं ज्वरयंतं सर्वापहारादिभिः पीडयंतं च ॥ अतएवामयं रोगतुल्यं ॥ ज्वर आमयोपि हि संतापयति ज्वरयति चांगभंगादिना बाध
ते च ॥ यस्मात् किलेत्याप्तवादे ॥ भुव उज्जासयत् पातेन हिंसदद्रिचक्रमुज्जासयितुं विदारयितुमिंद्रः केन नियुक्तो व्यापारितो न
केनापीत्यर्थः ॥ ९३॥ ॥ अथासौ संप्रत्येव निशात्य इति दर्शयन्नाह ॥ ॥ लोकस्य पिंषंतमरिं त्वनुन्नाटयन् नृपो नाटयति क्ष्मा
माया ॥ पेशनचेत्ता मासि तत् प्रजानामुत्क्राथयंतं कथयैनमद्य ॥ ९४॥ ॥ हि यस्माल्लोकस्य पिंषंतं हिंसंतमरिं रिपुमनु
न्नाटयन्नहिंसन् नृपो नराणां पाता राजा क्ष्मायामत्यानाटयति हिनस्ति ॥ सर्वशक्तिमत्त्वेन यथार्थाभिधानः स नृपो यदि
पृथ्वीध्वंसिनो हि शत्रून् न निन्हौति तदा वस्तुतः स एव पृथ्वीं विनाशयतीत्यर्थः ॥ तत्तस्मादयासि त्वं तां क्ष्मां नपेक्षा न हिंसि
ता तदा प्रजानामुत्क्राथयंतं हिंसंतमेनं ग्राहारिमद्य सांप्रतमेव कथय विनाशय मा कालविलंबं काषीरित्यर्थः ॥ ९४॥ ॥
अथैवमेतद्वधहेतुवादेन द्रढयित्वावसरप्राप्तैर्महापुरुषदृष्टांतैर्द्रढयन्नाह ॥ ॥ जंभं यथाजीजसदुग्रधन्वा मधुं यथा
नीनरदब्धिशायी ॥ पुरं यथाचिक्रथदीशस्त्वं निघ्नंतमुर्व्याः प्रणिजह्यमुं त्वं ॥ ९५॥ ॥ यथोग्रधन्वेंद्रो जंभं जंभाभिधं दै

त्यमजीजसत् जघान ॥ यथाब्धिशायी विष्णुर्मधुं मधुदैत्यमनीनरद्धिंसितवान् ॥ यथा चेशो हरः पुरं पुराख्यं दैत्यमचिक्रथ
द्धिंसितवान् एवमुर्व्याः पृथ्व्याः निघ्नंतममुं ग्राहारिं त्वं प्रणिजहि हिंद्धि ॥ ९५॥ ॥ श्रुत्वेति वाचं द्विषतां प्रहंतुं राज्ञा खरादी
निव निग्रहंत्रा ॥ मंत्री दृशाप्रेरित इत्यवोचत् सजंवकोजांबवदग्र्यबुद्धिः ॥ ९६॥ ॥ जंबको नाम मंत्री इति वक्ष्यमाणमवोच
त् ॥ यतइति पूर्वोक्तां वाचं जेहुलवाणीं श्रुत्वा द्विषतां ग्राहरिप्वादीनां शत्रूणां प्रहंतुं राज्ञा मूलराजेन दृशाप्रेरितो व्यापारितः शत्रवः
कथं हंतव्या इति दृक्संज्ञया पृष्ट इत्यर्थः ॥ कस्मात् पृष्ट इत्याह ॥ यतो जांबवान् सुग्रीवमंत्री तस्येवाग्र्या बुद्धिर्यस्य सः खरादीन् नि
प्रहंत्रेव यथा खरदूषणादीन्निग्रहंत्रा राज्ञा रामेण द्विषतां रावणादीनां प्रहंतुं दृक्संज्ञया पृष्टो जांबवान् वोचत् ॥ यशसां
नाथसे लभ्यायसे इत्यत्र नाथ इति याकर्म ॥ आशिषि नाथ इत्यात्मनेपदं आसनेइत्येव ननाथ त्वां ॥ स्मृते. स्मरसि धर्मस्म
रसि रुषां दयस्व क्ष्मां नादयस्व तस्येशिषे त्वामीशानः इत्यत्र स्मृत्यर्थेत्यादिना याकर्म ॥ धियामुपस्कुरुष्व बलमुपस्कुरु
ष्व इत्यत्र रुग इत्यादिना याकर्म ॥ राज्यस्य रुजेत् राष्ट्रं रुजेत् इत्यत्र रुजार्थस्येत्यादिना याकर्म ॥ ज्वरिसंतापिवर्जनं किंउ
र्वींज्वरयंतं संतापयंतमामयं भुव उज्जासयत् अद्रिचक्रमुज्जासयितुं क्ष्मायामानाटयति अरिमनुन्नाटयन् प्रजानामुत्क्राथयं
तं एनं कथय लोकस्य पिंषंतं तां पेष्टा इत्यत्र जासनाटेत्यादिना याकर्म ॥ जासनाटक्राथानां मा कारोपांतनिर्देशो यथाकार
श्रुतिः तत्र यथास्यादित्येवमर्थः ॥ तेन इहनस्यात् जंभमजीजसत् मधुमनीनरत् पुरमचिक्रथत् ॥ अतएव चक्राथः क्र
मे संज्ञाप्रतिषेधपक्षे ह्रस्वत्वाभावः कर्मत्वेतु ह्रस्वत्वमेव च ॥ उर्व्या निघ्नंतं द्विषतां प्रहंतुं इत्यत्र निप्रेभ्यो घ्न इति याकर्म ॥
पक्षे खरादीन्निग्रहंता अमुं प्रणिजहि ॥ ९६॥ ॥ नके पणायन् सुहृदां सुतांश्च व्यवाहरन्नाविभवान् सूनां ॥ कार्ये प्रभो जे-
हुलवत्यथा दृत्तिरथ्यं च पथ्यं च न कश्चिदित्थं ॥ ॥ प्रभोः कार्ये नैमित्तिके आधारे सप्तमीयं ॥ स्वामिकार्यार्थे के स्वामिभक्त भृ
त्याः सुहृदां मित्राणां सुतांश्च मित्रेभ्यः प्रियतराण्यपत्याणि च नापणायन् ॥ वा अथवा विभवान् ॥ वाह्याः प्राणा नृणामर्थ इति सु
तेभ्योपि प्रियतराणि द्रव्याणि असूनां विभवेभ्योपि प्रियतराणां प्राणानां च न व्यवाहरन् क्रयविक्रये द्यूतपणत्वेवा न नियुक्तवंतः
किं त्वनेकेपि प्रभुकार्यार्थं सुहृदादिव्यापितवंत इत्यर्थः ॥ तु विशेषे ॥ केवलं भोः प्रभोः कार्ये जेहुलवत्तथ्यं च पथ्यं च हितं चेत्थमुक्तरी
त्या न कश्चित् कोप्यवादीत् ॥ एतेन जेहुलस्यात्यंतिकी स्वामिभक्तिः प्रज्ञातिशयश्चोक्तः ॥ सुहृदामपणायन् सुतानप

णायनू असत्नांव्यवाहरन्तु धिभवानृव्यवाहरन्तित्यत्र विनिमेयेत्यादिनाचाकर्म॥ ९७॥ ॥अथप्रभुकार्येयेःसत्यमहितंचभाषंते तानू दुषयति॥ ॥कीर्तेःप्रदीव्यंति कुलंचदीव्यंत्यात्मोऽन्नतेत्ताकिलयेत्रमंत्रेदीव्यंतिकूटंचटुनाच लोभमध्यासिताःपापमधिष्ठिताश्च॥९८॥ ॥येमंत्रिणो मंत्रेकूटमलीकेनचटुनाचचाटुकारेणच दीव्यंतिव्यवहरंति॥ कीदृशाःसंतोहिस्फुटं लोभं धनादिगार्ध्यमध्यासिताआश्रिता अतएवपापंवंचनाप्रयोगमधिष्ठिताश्चश्रिताश्च लोभान्मंत्रेसत्यंहितंचन भाषंतइत्यर्थः॥ ते किलेतिसत्येकीर्तेः कुलंचप्रदीव्यंति॥तथात्मोऽन्नतेः स्वमहत्त्वस्यदीव्यंति क्रयंति क्रयेधूनपणत्वेवाविनियुंजते॥ कीर्तिंकुलंभात्मोऽन्नतिंचनिर्गमयंतीत्यर्थः॥ तन्मंत्रो हिकिंपाकफलमिवमुखमधुरआयतौनाशकस्यमहाविपद्धेतुरित्येतेषांकीर्त्यादिघुद्धिनन्ति॥९८॥ ॥अथयः प्रभुकार्येसत्यवादीतंवर्णयति भर्तुःसचेतोधिशयीतसोधिवसेत्सभामावसनांचमौलिं॥गुरोःसमीपंसउपोषितश्चब्रूयात्सदोन्नृषितवान्स्फुटंयः॥९९॥ ॥सदोमंत्रमंडपमनूषितवानध्यासितोयःस्फुटंसत्यंब्रूयात्सनरोभर्तुःस्वामिनश्चेतोधिशयीताध्यासीत॥तथासभामावसतामाश्रयतांसभासदांमौलिमुत्तमांगंमुकुटंवासोधिवसेदारोहेत्सर्वकार्येप्रष्टव्यतयासभ्येषुमौलिरिवोत्तमस्स्यादित्यर्थः॥ तथासगुरोःसमीपमुपोषितश्चगुरुकुलंसेवितवांश्च तेनैवविद्यासम्यगधीतेत्यर्थः॥ कीर्तेःप्रदीव्यंतिकुलंप्रदीव्यंतिइत्यत्रोपसर्गादिति वाकर्म॥ उपसर्गादितिकिं आत्मोऽन्नतेर्दीव्यंतिअत्रनेत्यनेनानित्यंकर्मसंज्ञान॥ कूटंदीव्यंतिचटुनादीव्यंतिइत्यत्रकरणंचेति दीव्यतेःकरणंकर्मकरणंचतेनकर्मत्वेद्वितीयाकरणत्वेचतृतीया॥ चेतोधिशयीतपापमधिष्ठिताःलोभमध्यासिताः इत्यत्राधेःशीङ्स्थादिनाकर्म॥ समीपमुपोषितःसदोन्नृषितवान्मौलिमधिवसेत्सभामावसतांइत्यत्रोपान्वित्यादिनाकर्म॥ ९९॥ ॥अथासत्यदोषान्सत्यस्यचगुणानुक्त्वासत्यमेववक्तुमुपक्रमते॥ ॥तत्तेर्थशास्त्रेभिनिविष्टबुद्धेर्वदाम्यमिथ्याभिनिविश्यपार्श्वं॥ गोदोहमीशेत्रुटिमप्युदास्तेयआस्यतेदाग्नरकंहितेन॥ १००॥ ॥यस्मात्सत्यासत्यपूर्वोक्तगुणदोषावेतेततस्माद्धेतोरर्थशास्त्रेनीतिशास्त्रेऽभिनिविष्टबुद्धेःक्षुण्णमतेःसततंतेतवपार्श्वमभिनिविश्याश्रित्यामिथ्यासत्यमहंवदामि॥ वर्तमानकालनिर्देशोधुनैववदामीतिभणनस्यातिशैघ्र्यज्ञापनार्थः॥ शीघ्रवदनेहेतुमाह॥ हियस्मादीशे

२०

स्वामिनिस्वामिकार्यविषयइत्यर्थः गोदोहंयावताकालेनगौर्दुह्यते तावंतंकालमित्यर्थः॥ त्रुटिमपि॥ प्रयत्नेनविमुक्तस्ययवस्यपतनोंबरान्॥ द्वियवंयावद्ध्वानंयःकालःसत्रुटिर्मतः॥ इतिसूक्ष्मकालमपियोभृत्यउदास्तेउपेक्षतेतेनद्राक्नरकमास्यतेस्थीयते॥ स्वामिनोद्रोहस्येवोपेक्षायाअपिमहापापहेतुत्वात्॥ १००॥ ॥अथप्रतिज्ञातंसत्यमेवयत्तनवकेनवदन्प्राक्याहारेदुर्गसंपद्बलसंपदादिबलिष्ठतमाद्दुःसाध्यत्वप्रतिपादनेनयाहारिंहंतुंससैन्यंदंडनेतारंप्रेषयेतिजेहुलवाक्यमाक्षिपंरुत्स्यस्वयमास्कंद्यतांरत्तत्रयेणाह॥ ॥क्रोशेगिरियोंजनमब्धिरस्यदुर्गंस्वपुर्यांवसतोस्त्यमुंतनू॥समुत्थितंनित्रयपिशालिपाकेप्यशायिनंभास्त्वमथात्कसाधम॥ १॥ ॥अस्ययाहारेःस्वपुर्यांवामनस्थल्यांवसतःक्रोशेगिरिरुज्जयंतादिः॥तथायोजनेक्रोशचतुष्टयेऽब्धिश्च दुर्गंदुर्गस्थानमस्तिगिरिरब्धिश्चास्यानिनिकटंदुर्गमस्तीत्यर्थः॥तत्तस्माद्धेतोरमुंयाहारिंसुसाधंसुखजेयंमास्ममथामाज्ञासीः॥ कीदृशंसंतंनिश्यापिसमुत्थितमुद्यतंमनएवशग्लिपाकेपियावताकालेनशालिःपच्यतेतावत्यपिकाले॥ शालिर्हिस्तोककालेपच्यतइतिस्तोककालमपीत्यर्थः॥अशायिनंदुर्गबलयुक्तत्वात्सदोद्यतत्वाद्दुःसाधंजानीहीत्यर्थः॥ क्रोशेयोजनमित्सत्रैकवचनमस्यगिरिसमुद्रदुर्गयोरतिनैकट्यज्ञापनार्थमन्यथावामनस्थलीतोगिरेःक्रोशसप्तकेऽब्धेश्चपंचयोजन्यांवर्तमानत्वात्तदनुपपन्नंस्यात्॥ यद्वावामनस्थल्यांतदावास्तव्यानांलथावाहुल्यात्तथावासाच्चैतदुपपन्नं॥यद्विपुनर्याहारेरन्याकाचिद्राजधानीयस्याःसकाशात्क्रोशेगिरियोंजनेचाब्धिस्तांनवेद्मि॥ १॥ ॥गोदोहमप्युद्यममत्यजंतोभजंत्सहोरात्रममुंनृपास्तत्॥क्रोशान्शतंसैन्यपतिर्दिशंस्तद्धायदात्रेणनरुंलुनासि॥ २॥ ॥गोदोहमपिगोदोहकालमप्युद्यममत्यजंतःसंतोनृपाअमुंयाहारिमहोरात्रं॥ एतेनभत्त्यतिशयोक्तिःभजंति॥ एतेनबलसंपदतिशयोक्तिः॥ततस्मात्तद्धायद्याहारिहतयेक्रोशान्शतंक्रोशशतेदूरदेशइत्यर्थः॥ एतेनयादिसेनानीःकथमपितेनभज्येतनदाःत्रस्थैर्भवद्रिरस्यसाहाय्यंकर्तुंदुशशकमित्युक्तं॥ सैन्यपतिंदिशन्नाज्ञापयन्त्वंदात्रेणतरुंलुनासियथामहत्वात्तरुदात्रेणच्छेत्तुंनशक्यतेतथात्वंदंडेशेनापियाहारिरित्यर्थः॥ अभिनिविश्यपार्श्वमित्यत्रचाभिनिविशइतिकर्म॥ व्यवस्थितविभाषेयंतेनक्वचित्कर्मसंज्ञैवक्वचिदाधारसंज्ञैवशास्त्रेभिनिविष्टः॥ कालस्त्रुटिमुदास्तेनिशि

MEMORIAL

मुत्थितं ॥ अध्वायोजनमस्ति क्रोशोस्ति ॥ भावगोदोहमुदास्ते शालिपाके प्यशायिनं ॥ देशेनरकमास्पते स्वपुर्मीवसतः इत्यत्र कालाध्वे
त्यादिना कालादिराधारः कर्मना अकर्मश्च ॥ यत्रापि पक्षे कर्मसंज्ञा तत्राकर्मसंज्ञा निवाभवती त्यर्थः ॥ तेन नरकमास्यते इत्यत्र सक
र्मकत्वाद्द्वितीया अकर्मकत्वाच्च भावे आत्मनेपदं ॥ अन्येतु सकर्मकाणामकर्मकाणां च प्रयोगे कालाध्वभावानामत्यंतसंयो
गे सति नित्यं कर्मत्वमिच्छंति ॥ भजंत्यहोरात्रममुं क्रोशान्सैन्यपतिं दिशन् गोदोहमुद्यममत्यजंतः दात्रेपनरं लुनासिइत्य
त्र साधकेत्यादिना करणसंज्ञा ॥ तद्रूधा यदिशन्नित्यत्र कर्मणीत्यादिना संप्रदानसंज्ञा ॥ २ ॥ ॥ जयायचेत्वं स्पृहयेर्यशो
या लोकायकुप्यंतमसूयमानं द्रुह्यंतमीर्ष्यंतममुं स्वयंतत् भद्रोग्धुमुत्क्रुध्य कृताभियोगः ॥ ३ ॥ ॥ जयायचेत्वं स्पृहयेर्यशो
वा जयं कीर्तिं वाय दीप्सितं तदाऽमुं ग्राहारिं भद्रोग्धुं जिघांसितुं स्वयं कृताभियोगो विहितो द्यमः संस्त्वममुं मेवोत्क्रुध्योत्क्रो
धविषयं कुरु मा सहस्व तं स्वयमभिषेणयेत्यर्थः ॥ कीदृशं लोकायकुप्यंतमसृष्यंतमसूयमानं लोकस्यैव गुणेषु दोषानावि
ष्कुर्वाणं द्रुह्यंतमपचिकीर्षंतमीर्ष्यंतं लोकसंपत्तौ चेतसाव्याकुप्यंतं ॥ जयायय शोवा स्पृहयेरित्यत्र स्पृहयेर्प्याप्यं वे तिवासंप्रदानं
॥ लोकायकुप्यंतं द्रुह्यंतमीर्ष्यंतमसूयमानमित्यत्र क्रुद्रुहेत्यादिना संप्रदानं ॥ अमुमुत्क्रुध्य अमुं प्रद्रोग्धुं इत्यत्र नोपसर्गात्क्रु
द्रुहेति न संप्रदानं ॥ ३ ॥ ॥ अथदृष्ठांतोक्त्या राज्ञानस्य स्वयमास्कंदनं द्रढयति ॥ ॥ सिंहोनिकुंजादभिसृत्य यूथाद्वंतीभमु
द्दामतमं मृगेभ्यः ॥ यानात्स्वयं माविरम प्रमाद्य मा मा जुगुप्सस्व जगत्ततो वन् ॥ ४ ॥ ॥ सिंहो निकुंजाद्गनगह्वरादभिसृत्य
निर्गत्य मृगेभ्य आरण्यपशुभ्य उद्दामतमं बलादिनोत्कृष्टतममिभं यूथान्मृगगणाद्वाकृष्य हंति तस्मात्त्वमपि ततोग्राहारेर्जग
द्वन् रक्षन् सन् स्वयं यानान्माविरम दुःखहेतुरिदमात्मन इति विरज्य मानिवर्तस्व ॥ तथा मा प्रमाद्य यत्कार्यं नद्वंडनेनैव करि
ष्यतीत्यालस्यं कृत्वा मा निवर्तस्व ॥ तथा मा जुगुप्सस्व नीचोयं स्वयमास्कंतुं मनुचित इति निंदित्वा मा निवर्तस्व ॥ ४ ॥ ॥ ननु
साहाय्यकृन्मंत्रसंप्रहारहितोयं सैन्ये शेनापि सैन्यैरवष्टब्धो दुर्गस्थोपि निरुद्धधान्यादिप्रवेशस्थानः सुसाधएवतत्किंतत्सा
धनाय स्वयमभिषेणनेनेति शजामास्मवददित्यस्य महामित्रसंपदमप्याह ॥ ॥ युद्धे पराजिष्णुररेरभीरुस्त्वा तानुरुष्का

नपि कच्छदेशात् ॥ कुतोप्यनंतर्दधदस्य सोस्ति लक्षः सखाजा नइवैकमातुः ॥ ५ ॥ ॥ सोनेकावदानैः प्रसिद्धो लक्षो नाम
कच्छदेशस्वाम्येकमातुर्जात इव सहोदर इवाति स्निग्धः सखास्य ग्राहारेरस्ति ॥ कीदृक् अरेरभीरुरत्रस्तुरतएव युधोरणाद
ति पराजिष्णुर्दुःसेयं पुदिंतामसहमानोऽनिवर्तिष्णुरतएव च कच्छदेशात् तुरुष्कान प्यास्तामन्येनृपाः सर्वे जगद्वयंकरान् म्ले-
च्छानपि त्रातारक्षन्नतएव च कुतोपिकस्मादप्यनंतर्दधदनिलीयमानोऽनश्यन् ॥ ५ ॥ ॥ ननु सखास्य दूरे भविष्यति नतः
सन्नप्यसत्प्राय एवेति न वाच्यमित्याह ॥ ॥ कच्छात्सुराष्ट्राष्टसु योजनेषु दीपोत्सवः पक्षइवाश्वयुज्याः ॥ फुल्लात् प्रभूतो
ननदस्य दूरे स्यान्नाधिको भूमिपतिभ्य उर्व्यां ॥ ६ ॥ ॥ यथाश्वयुज्या आश्विनपूर्णिमाया आरभ्य पक्षे गते दीपोत्सवो दीपा
लिका स्यात्तथा कच्छात् कच्छदेशाद्गतेष्वष्टसु योजनेषु सुराष्ट्रादेशो भवति तत्तस्माद्धेतोः फुल्लात् फुल्लाख्यान्महाराजात् प्रभू
तो जातो लक्षाख्यः सखास्य ग्राहारेर्न दूरे ॥ कीदृक् उर्व्यां पृथ्वीविषये भूमिपतयः तेभ्यः सकाशात् स्थाम्ना बलेनाधिकः ॥ ६ ॥
ननु तथापि द्वावेव शत्रू तौ चानेक महाराजान्वितः सैन्यपतिरेव नियहीष्यति तत् किं स्वयमास्कंदनेनेति न वाच्यमित्यनेकान्
द्विष आह ॥ ॥ येद्वीपसमुद्रेच नृपा दधानाः क्षत्रत्वमात्मन्युषिता दृगग्रे ॥ तेप्यस्य संवर्मयिता रआज्नो नैको न च द्वौ बहवो द्वि
षस्तत् ॥ ७ ॥ ॥ आत्मनि स्वे क्षत्रत्वं क्षात्रधर्मं दधानाः शौर्यादिक्षत्रियगुणान्विता इत्यर्थः ॥ ये नृपा अद्वीपे समुद्रे चाब्धिस
मीपे योषिताः स्थिताः संति ये चास्य ग्राहारेर्दृगग्रे दृष्टिपुरउषिताः संति सदा समीपस्था येनु सेवंते इत्यर्थः ॥ ते पि न केवलं
स्वयं लक्षश्चेत्यप्यर्थः ॥ अस्य ग्राहारे राज्ञो रणनिमित्तं संवर्मयितारः सन्नह्यंते तत् एवत्वान्तेपि त्वया सह योत्स्यंते इत्यर्थः
॥ तत्तस्मान्नैको ग्राहारिर्द्विट् न च द्वौ ग्राहारिलक्षौ द्विषौ किंतु बहवोऽनेके द्विषः ॥ अपाये वधिरपादानं तं भिविधं ॥ निर्दिष्ट
विषयं उपात्तविषयं अपेक्षितक्रियं च ॥ निर्दिष्टविषयं यथा निकुंजादभिसृत्य ॥ यत्र तु धात्वंतरार्थांगस्वार्थमाह तदुपा
त्तविषयं ॥ यथा यूथाद्धंति ॥ अत्रह्याकर्षणांगे हनने हंतुर्वर्तते ॥ अपेक्षितक्रियं यथा मृगेभ्य उद्दामतमं ॥ अपायश्च का
यसंसर्गपूर्वको बुद्धिसंसर्गपूर्वको वा विभाग उच्यते तेन यानान्माविरम यानान्मा प्रमाद्य यानान्मा जुगुप्सस्व इत्यत्र दुःखहेतु
यानं बुध्वा प्राप्य नानेन कृत्यमस्तीति यानान्निवर्तमानो राजाजंबके न निषिध्यत इति निवृत्तिरंगेषु विराम प्रमादजुगुप्सास्वेते

ध्या तवो वर्तनइति बुद्धिपूर्वको ऽपायः ॥ तथाज्ञ गन्तती नन्दित्यन्नराजांदीदं नगाहारिः पन्ये नन मस्य सर्वस्वमपह
रेदिति बुध्या ग्राहारिणा संयोज्यत सा निवर्तयतीत्यपाय एव ॥ तथा युधोऽपराजितमुरित्यत्रापि युधमसहमानस्ततो
ननिवर्तइत्यपाय एव ॥ अरे रभीरुरित्यत्रापि वधबंधकूराकारिणमरिं बुध्या प्राप्यते तानानिवर्तत इत्यपाय एव ॥
यद्यपि निवृत्तेरपेक्षया ऽपादानस्यात्सा चात्र न आनिषिध्य तद्दूसपादानं न प्राप्नोति तथापि निवृत्तेरपेक्षयाऽप्रथम
मपादानं ततः सान आनिषिध्यत इति सर्वमु पप न्नं ॥ एवमन्यत्रापि ॥ त्रा नातुरुक्का तकछेदनादित्यत्र तुरुकेर्द
ृा संपर्क बुध्या स्वमात्क्ष्यदेहस्य विनाशापन्नयनं तुरुकान्देहान्निवर्तयतीत्यपाय एव ॥ कुतोप्यनंतर्दधादित्यत्र भयेनमा
मा कोपि द्राक्षीदिति नातिरोभवतीत्यत्राप्यपायः ॥ एकमातुर्जात इत्यत्रापि एकमातुः पुत्रो निष्क्रामतीति स्फुट एवापायः ॥
कुल्लाल भूत इत्यत्रापि कुल्लाल्लुसः संक्रामतीति अपायोऽस्ति ॥ कल्लास्कराष्ट्रा इत्यत्र यो जनेषु स नकल्लात्सगते
षुयोजनेषु भवतीत्यर्थः ॥ आयुष्मन्त्यादौ पाल्सवः पक्षे ततः प्रभृति पक्षेगते भवतीत्यर्थः ॥ उभयत्रापायः प्रतीयते ॥
भूमिपतिष्वाधिक इत्यत्र लक्षः पुरुषादिनां भूपः सहसं स्पृष्ट आधिक्य तद्धर्मणाततो विभक्तः प्रतीयत इति सर्वत्राप्यपा
य विवक्षा ॥ वैषयिकः उर्व्यां भूमिपतिभ्यः ॥ औपश्लेषिकः अद्रौ ॥ अभिव्यापकः आत्मनीत्यत्र ॥ सामीप्यकः समुद्रे ॥
नैमित्तिकः आलोकवमेधितरे ॥ औपचारिक इत्यत्र उषिता इत्यत्र क्रियाश्रयस्येत्यादिनाधिकरणत्वं ॥ एकः द्वौ
कवइत्यत्र नाम्न इत्यादिना प्रथमा विभक्तिः ॥ ७ ॥ ॥ अथ एवमुक्तदुर्गमित्र सहायसंपद्बलेनयाहारिर्बलिष्ठस्तावत्महारा
जस्य वाच्यसाध्यानान्यस्येति निर्धारयति ॥ ॥ मित्रेन्द्रंपद्रसमयानिकषा धदुर्गयः सोप्यलं भवति किं पुनरतरां ते ॥ नन्निह
तुमवनीदिवमंतरेण त्वामंतरेण नहि कश्चिदीनाः ॥ ८ ॥ ॥ हे नृपेंद्रयः राजा मित्रसमया मित्रसमीपे स्यादथवा दुर्गनिक
षा पर्वताद्यादि दुर्गमस्थानसमीपे स्यात्तावत्तयोरन्यतरसमीपस्थो प्यलं समर्थो भव
ति किं पुनस्तमित्रदुर्गंञ्यन्तरा मित्रदुर्गयोर्यो मध्यवर्ती स नितरां बलिष्ठ इत्यर्थः ॥ तत्तस्माद्यतो ग्राहारिं निहंतुमवनीदिवमंत
रेण द्यावापृथिव्योर्मध्ये त्वामंतरेण विना संप्रत्यस्मिन्काले न कश्चिदन्यः पत्यारि कदुः समर्थः ॥ वसंततिलका छंदः ॥ ८ ॥
योयमित्रदुर्गसंपद्भ्यामतिबलिष्ठतया कस्याप्यन्यस्यासाध्यः स कदाचिन्ममाप्यसाध्यः स्यादितराजाभावाकिंस्यादाह
॥ ॥ तेनाभीराग्येन स राष्ट्रामतिवृद्धः पार्थ रखाम्ना लचलितश्च समराय ॥ हा प्राणनाथ विधिं विधिनैवमत्ये युवेरिस्त्र
णानीति विभो मे प्रतिभाति ॥ ९ ॥ ॥ हे विभो स्वामिन्नसुराष्ट्रा सुराष्ट्रादेशो येन तेन लसीकृतस्येआभीराआभीरजातिस्त्रि
याग्राहारिणादुरत्तान ते न लसीकृतस्य च यदि त्वसमराय चलितः कृतप्रयाणस्तदाहा प्राणनाथ कष्टं वह्ननानां
मृत्युकालं वाधिरतएवाविधिं दैवं पिगर्हा मेह इत्येवं प्रकारं वैरिस्त्रैणानाम्भावित्वपतिमरणनिश्चयेनप्रलपे
युरात्कंदेयुरित्येवं मे प्रतिभाति मम प्रतिभासते इत्याहतानाममीत्यर्थः ॥ ननुग्राहारिप्राग्यस्योक्तिश्रुता स्त
त्वाप्रति मयि रणायोद्यते पि त्तत्पत्नीनां स्वभर्तृमृत्युनिश्चये नविलापः कथं न नूयते त्वयेत्याह ॥ यन्न स्वपार्थ
मतिरखाम्नाबद्धः अर्जुनस्यातिक्रमेण बलेन स्फीतो ऽर्जुनादपि बलिष्ठ इत्यर्थः ॥ नृपेंद्रत्वनामंत्र्ये इति प्रथमा ॥ मि

२२

त्रंसमया दुर्गनिकषाहाप्राणेशान्नधिक् विधिं अंतरा ते अवनिं दिवमंतरेण पार्थमतियेन सुराष्ट्रां तेनाभीरान्
इत्यत्र गौणादित्यादिना द्वितीया बहुवचनादन्येनापि युक्ताद्भवति मां प्रति भाति धातुसंबंधोत्र प्रतिस्तेन भागि
न्चेत्यादिना न सिध्यति ॥ मत्तमयूरं छंदः ॥ ९ ॥ ॥ अथ मंत्रमुपसंहरन्नाह ॥ ॥ उपर्युपरि भूभृतोऽध्यधि
वनान्यधोऽधोऽबुधीन् द्विषोभि गदिते मुनापुकैले भृद्वपुः सर्वतः ॥ भुजावुभयतः क्षिपन्दृशमथोदस्थान्नृ
पः स्थितौ तमभितश्च तौ परित उत्थितस्तान्जनः ॥ १० ॥ ॥ नृपो मूलराज उदस्थात् ॥ कीदृक्सन् वपुः सर्वतो
ऽगस्य सर्वेषु प्रदेशेषु पुलकभृत् ॥ कसति भूभृतो गिरीनुपर्युपरि वनानि काननान्यध्यधि अंबुधीनधोधः स
र्वत्र क्रियाविशेषणादमूस समीपा ॥ द्विष इत्यत्रेति शब्दोध्याहार्यः ततोयमर्थो भूभृद्वनांबुधीनां प्रत्यासन्नं द्वि
षो ग्राहरिपादि शत्रवो वर्तत इत्येतास्मिन्नमुना जंबकेनाभिगदिते भणिते ॥ यद्वा भूभृद्वनांबुधीनां समीपे वर्त
मानान् द्विषः शत्रूनभिलक्षीकृत्यामुना गदितपूर्वोक्तरीत्या भणने द्विषन्नामश्रवणोद्भूत वीररसोल्लासव
शेन सर्वांगीण रोमांचांचित इत्यर्थः ॥ तथा मद्दोर्दंडयोः सतोः के शापि शत्रवइत्यहंकारेणोत्पन्नरणकंडू भु
जावुभयतो दृशं क्षिपन् द्वयोरपि भुजयोरुपरि दृष्टिं व्यापारयन् ॥ अथो भिन्नक्रमे नृप इत्यनोज्ञेयो थो नृपो
त्थानानंतरं नृपमभित उभयपार्श्वयोः स्थितौ संतौ तौ जंबकजेहुलावुदस्थातां ॥ उदस्थादित्येवा अर्थवशाद्द्विव
चनांततया योज्यं ॥ तथा चोभिन्नक्रमे जन इत्यनोज्ञेयः तान्नृपजंबकजेहुलान् परितः सर्वतो मंत्रमंडपबहिः
स्थितो जनश्च परिवारलोकश्चोत्थितः ॥ नृप उदस्थादित्यनेन अग्रेतनसर्गे ग्राहारिं प्रति नृपस्य प्रस्थानं वर्णयि
ष्यत इति सूचितं ॥ अधोधोंबुधीन् अध्यधिवनानि उपर्युपरि भूभृतः इत्यत्र द्वित्वे धइत्यादिना द्वितीया ॥ वपुः
सर्वतः भुजावुभयतः तमभितः तान्परितः इत्यत्र सर्वोभेत्यादिना द्वितीया ॥ पृथ्वी छंदः ॥ ११० ॥ ॥ इतिश्री
जिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचंद्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौ द्वितीयः सर्गः समर्थितः ॥ ॥ ग्रंथसंख्या ११६४ श्रीरस्तु

॥ ॐ अर्हं ॥ ॐ नमः सर्वज्ञेभ्यः॥ अथ श्रीहेमचंद्राचार्यविरचितस्य द्व्याश्रयनामधेयस्य महाकाव्यस्य विं
शः सर्गः प्रारभ्यते ॥ श्रीः॥ पश्चास्य आततषडंगुलरूप्यरिक्थारंतुं वनेषु युरयश्रमजित्वसकथ्यः॥ निःशंकमू
षुरिह शासति गां द्विमूर्धा कः कस्त्रिमूर्धउत योपनयं विदध्यात्॥१॥ श्रीः॥ पश्चास्य स्त्रियः पुष्पाद्यादिक्रीड
यारंतुं वनेषु अयुः कीदृश्यः आननं विस्तीर्णं यत् षडंगुलं षडंगुलायामं यस्य तदं गुलीसदृशाव यवं धान्यकंटकादी
नां विक्षेपणकाष्ठं तेन रूप्यमतिबहुत्वात्कर्षणीयं रिक्थं धनं यासां ताः अत्यंतमीश्वर्य इत्यर्थः अयगमनानंतरं
श्रमजित्वसकथ्यः श्रांताः सत्यो वनेष्वेव निःशंकं निर्भयमूषुः॥ युक्तं चैतत् यस्मादिह भैमौ गां पृथ्वीं शासति को
द्विमूर्धा अथवा कस्त्रिमूर्धा यः अपनयं चौर्यलुंटनाद्यन्यायं विदध्यात् प्रचंडशासनत्वेनान्यायिनो मस्तकं य
हीतं यस्मिन् यो हि द्विमूर्धा त्रिमूर्धा वा स्यात् स एव हि मस्तकं हे वा मस्तके दत्वा एकेन शिरसा जीविष्यामीत्य
भिप्रायेणान्यायं कुर्यादित्यर्थः॥ वसंततिलकं छंदः॥ श्रीः॥ जायाप्रमाणजनताभिरगायि सत्रिमूर्धद्विमूर्धइव
देवउदात्तशक्तिः॥ प्रातस्त्यसत्कदिवस्त्रिदशेश्वरो वा श्रेणीपदाजपदभद्रपदादिराड्वा॥२॥ श्रीः॥ स भैमिः जा
या भार्या प्रमाणी मुख्या यासां ताः याजनताः जनोघास्ताभिरगायि गीतः यतः उदात्तशक्तिरुद्भटप्रभुत्वादि शक्तित्र
यस्तया शोभनं कर्म प्रातः प्रभाते भस्यसत्कं प्रभातस्तया शोभनं कर्मभ्वास्यसत्कं स्वस्तयाशोभनं कर्मदिवायस्य सत्
दिवस्तंता विशेषणकर्मधारयः सर्वदान्यायोचितसत्क्रिय इत्यर्थः त्रिमूर्धद्विमूर्धइव देवो यथा पंचशिराः स
दाशिवो गीयते यथा वा त्रिदशेश्वरो देवेंद्रो गीयते तथा एन्या इव पादावस्य एणीपदं मृगशीरः एवमजपदा मेषराशिः
सत्वाश्विनी भरणीकृत्तिके कपाद रूप इत्यश्विनी भरणीकृत्तिकाया एकपादश्वोच्यते तथा भद्राः पादा आसां भद्र
पदा उत्तरभद्रपदाश्च द्वंद्व आदिर्येषां नक्षत्राणां तेषां राट् चंद्रः श्रिया संपूर्णकलादिलक्ष्म्या युक्तो य एणीपदाजपद
भद्रपदादिराट् स यथा वा गीयते॥ श्रीः॥ अशारि कुक्षं चतुरश्रवक्षः स्थलं स्वयं प्रोष्ठपदाधिपं तु॥ नमस्यतां तं रज
निर्ध्रुवं कल्याणी द्वितीया समभूत्न कस्य॥३॥ श्रीः॥ तं भैमिं नमस्यतां प्रणमतां मध्ये कस्य नमस्यत्नरस्य रजनिः
प्रणामरात्रिः ध्रुवं न समभूत्॥ किं भूता कल्याणी भैमेः प्रसत्या सद्यः सर्वसंपद्लाभात्सर्वशुभहेतुर्द्वितीया प्रणा

मशांत्रेरनंतरगाराद्वियैस्याःसाकल्याणीद्वितीया॥ किंभूतंतंनशाखेरिवस्थूलःकुक्षिर्मध्यंयस्यतंकृशोदरंतयाचतस्त्रो
अश्रयायस्यतच्चतुरश्रंतद्वक्षस्थलंयस्यतंउपलक्षणात्वात्प्रमाणोपेतसर्वांगोपांगमित्यर्थः तथासकलजगदा
१ ह्लादकत्वात्स्वयंसाक्षात्प्रोष्ठपदाधिपंन प्रोष्ठोगौस्तस्येवपादाआसांप्रोष्ठपदापूर्वभद्रपदाउत्तरभद्रपदाश्चता
सामधिपश्चंद्रस्तमिवअथनंयंप्रोष्ठपदाधिपंप्रस्त्रावाद्वितीयेंदुंस्वयंनमस्यंति तेषांमध्येकस्यनरस्यद्वितीयाति
थिःकल्याणी॥ भ्रंभहेतुर्नस्यात द्वितीयायामिंदुदर्शनस्यसर्वसंपन्निबंधनत्वेनशास्त्रप्रगीयमानत्वादित्फक्कि
लेशः॥ षडंगुलत्यत्रबक्कित्यादिनाटःज़ित्प्रसक्थ्यःपद्मास्यः अत्रसक्थीत्यादिनाटःद्विमूर्धःद्विमूर्धात्रिमूर्धःत्रिमु
र्धेत्यादिनावाटः॥ जायाप्रमाणत्रिदशत्यत्रप्रमाणीत्यादिनाडःफप्रातफश्चफदिवशारिकुक्षंचतुरश्रएणीपद
अजपदप्रोष्ठपदभद्रपदंत्यत्रफप्रातत्यादिनानिपात्यःकल्याणीद्वितीयारजनिरित्यत्रपूरणीभ्यइत्यादिनाअप्र
॥ उपजातिश्छंदः॥ श्रीः॥ समप्रथितःसोचतुरःकषायैःसदाफचतुरोस्तवल्गितैःपुमर्थैः इहोपचतुरपुजगत्कपा
षंडिनांविचतुरंशतमर्चमानः॥ ४॥ श्रीः॥ सभेमिश्चत्वारिसमीपेयेषांसंख्यानांतेउपचतुरेषुत्रिषुजगत्कस
मप्रथितःप्रख्यातःयतःकषायैःकलासदाभचतुरःक्रोधादिकषायचतुष्टयरहितइत्यर्थःतथाइहपृथ्व्यांपा
षंडिनांविदृश्यानिविगतानिवाचत्वारियस्यतद्विचतुरंशतंषण्णवतिमर्चमानःकोलश्छंदः॥ ज्योस्याकोलइति
लक्षणात॥ श्रीः॥ अंतर्लोमंदधदथबहिर्लोमर्माणंत्रिचत्वाकर्षन्नदीनांस्त्रिचतुरपश्चनेकदापुष्यनेत्रे॥ आसे
व्येहन्यनृचसहितेर्बह्वृचैःपद्मनाभेद्युःसक्थ्यःपथ्यहल्लिरमुनाकोपिदुःसक्कएक्षि॥ ५॥ श्रीः॥ अथामुनाभेमि
नाकोपिग्राम्यनरादीनानबलादाकृष्यमाणत्वेनदीनमुखानत्रिचतुरपशूनत्रीश्चतुरोवाछागान पथिकर्षन्नविक्रे
तुंराजमार्गेनयनसनएक्षि॥ कएकदाएकस्मिन्कालेएकस्मिन्वर्षेइत्यर्थः पुष्यांनेतानायकोयस्यतस्मिनपुष्य
नेत्रेपुष्येणचंद्रयुक्तेनयुक्तेइत्यर्थः अहनिआमलकेकादशीत्यारव्ययाप्रसिद्धायांपौष्यांफाल्गुनशुक्लैकादश्यां १
महापर्वदिनइत्यर्थः दृसत्येक्षि॥ पद्मनाभेविष्णौकिंभूतनविद्यंतेऋचोयेषामनृचामाणवास्तैःसहितैःबह्व
ऋचोयेषांतेबह्वृचश्चरणरुपलक्षणत्वादन्यलोकेनाप्यासेव्येउपवासव्रतविशेषपूजाविशेषादिनाआग

ध्येपौष्यांफाल्गुनशुक्लैकादश्यांहिविष्णोराराधनंमहाफलं॥ यद्भुक्तांडपुराणं॥ यदातुशुक्लद्वादश्यांपुष्यंभवति
कर्हिचित॥ तदासातुमहापुण्याकथितापापनाशिनी॥ पुराणभाषयाद्वादशीशब्देनात्रैकादशीउच्यते॥ तस्यां
जगत्पतिर्देवःसर्वःसर्वेश्वरोहरिः॥ प्रत्यक्षतांप्रयात्येवतेनानंतंफलंस्मृतं॥ इमामेकामुपोष्येवपुष्यनक्षत्रसंयु
तां॥ एकादशीसहस्रस्यफलंप्राप्नोतिनान्यथा॥ तस्मादेषाप्रयत्नेनकर्तव्याफलकांक्षिभिः॥ फाल्गुनेचविशेष
णाविशेषःकथितानृप॥ एतेनचपर्वोपन्यासेनतदाराजाप्युपोषितोव्रतविशेषस्थोधर्मध्यानस्थश्चासीदितिवि
शेषेणोल्लसद्दयंबलादाकृष्यमाणान्नदीनानपशूनददर्शेत्यर्थोव्यंजितः॥ कीदृङ्नरः अंतर्लोमान्यस्य अंतर्लोम
शंतथाबहिर्लोमान्यस्यबहिर्लोमंचोभयपार्श्वयोर्लोमशमित्यर्थः ओर्णमूर्णामयंपटंदधततथामुग्धत्वात्रय
एवचत्वारोयस्यसत्रिचत्वातयानिःस्वत्वान्नास्तिहल्लिर्महडलमस्यअहल्लिरतएवदुष्टेकार्श्यकदोरत्वादिनाविरू
तेसक्थिनीयस्यसदुःसक्थस्तथादुष्टानिंद्यासक्तिःपशुविक्रयादिकुव्यापारसंसर्गोयस्यसदुःसक्तः॥ मंदाक्रां
ताछंदः॥ श्रीः॥ दुःसक्तिमूर्चेतमसौसूक्तिरनस्यसक्तिःस्फरुतेस्फमक्तश॥ अवीनसस्यान्गतावसक्तानहेनाःकु
तःकर्षसिभोःस्फसक्थ॥ ६॥ श्रीः॥ असौभैमिर्दुःसक्तिंपशुविक्रयरूपदुष्कर्मासक्तंतंनरमूचेकीदृक्सनृशोभनास
क्तिधार्मिकैःसहसंसर्गोयस्यसस्फसक्तिःअतएवएनसिपापकर्मविषयेअसक्तिस्तथास्फकृतेधर्मेस्फसक्तःकिमूचे
इत्याहशोभनेगमनदक्षेसक्थिनीयस्यभोःस्फसक्थअवीनछागानकुतोहेतोःकर्षसि॥ किंभूतानवीनअसक्थान्
यथासक्थिरहितानागतावसक्ताःस्फरेवंगमनेअसक्तानअसंसर्गानबलान्नीयमानत्वेनस्वयमगच्छंतइत्यर्थः॥ उ
पजातिश्छंदः॥ श्रीः॥ सप्रत्यवोचत्स्फहल्लोनदुर्हल्लोनचास्म्यहं किंत्वहल्लोनयामितव॥ असक्थिदुःसक्थिस्फस
क्थिकानमूनदातुंवस्फभ्यःप्रतिसौनिकापणे॥ ७॥ श्रीः॥ सनरःप्रत्यवोचत नयाहिदराजनअस्मिनस्फहल्लोनचदु
र्हल्लोनशोभनयानचअशोभनयाहल्यायुक्तः किंतुअहमहल्लोहल्लिरहितोअतिदरिद्रइत्यर्थःतत्तस्मादमून्पशून
वस्फभ्यःप्रतिदातुंधनानिगृहीत्वाअमूनदातुमित्यर्थःसौनिकापणेखाटिकशालायामसूल्लयामि॥ एकोअसक्थि
रल्पोरुःद्वितीयोदुःसक्थिस्तृतीयस्फस्फसक्थिकोविशेषणद्वंद्वेतान॥ इंद्रवंशावंशस्थयोरुपजातिः॥ श्रीः॥ दुह
ल्लिःस्फहल्लिनायथाहल्लिस्फप्रजस्तइवचाप्रजाःप्रजां॥ एतदीयपिशितानिसौनिकाःसंतिदुष्प्रजसईप्सवाधनैः॥ ८॥

व्या॰श्रय स॰ २० ॥श्री॥ यथाडुर्हेलिः कुहलितः सकाशात्वहलिं महत्वहलं यथावा अप्रजाः निरपत्यः कुप्रजस्त्रो बह्वपत्यात्सकाशात्प्रजा
मपत्यं धनेरी कुस्यात् ॥ उत्तरार्धस्पष्टं किंतु दुष्टा प्रजा येषां ते दुष्प्रजसो निंद्यलोकाः ॥ अचतुरः कुचतुरः विचतुरं उ
२ पचतुरेषु त्रिचतुरेत्यत्र नञ्कुवी त्यादिना अप् समासांतविधेरनित्यत्वादिह न स्यात् ॥ त्रिचत्वाः ॥ अंतर्लोमं वहिर्लोमं अत्रां
तरित्यादिना अः ॥ पुष्पनेत्रं अत्र भान्नेतुरित्यः पद्मनाभ अत्र नाभेर्नाम्नीत्यः ॥ अनृच बह्वृचः अत्र नञित्यादिना अप् ॥
अशक्तान् असक्तान् असक्थान् असक्तिः कुसक्तः कुसक्तिः दुःसक्तिः दुःसक्तः असक्थान् असक्थि कुसक्थान् कुसक्थि
कान् दुःसक्थः दुःसक्थिः अहलः अहलिः कुहलः कुहलिन् दुर्हलः दुर्हलिः अत्र नञ्त्वेत्यादिना वा अप् अप्रजाः कुप्रजस्तः
दुष्प्रजसः अत्र प्रजाया असित्यस् ॥ रथोद्धता छंदः ॥श्री॥ दुर्मेधसस्तस्य च चोल्पमेधसः श्रुत्वेति राज्ञा जगदे कुमेधसा ॥
अमेधसा धिग्वत मंदमेधसो हिंसंति जंतून् निजजीविकाकृते ॥ ९ ॥श्री॥ पूर्वार्धस्पष्टं वनेति खेदे धिङ् निंदायां ॥ खि
द्येहं निंदामि च ॥ यदमेधसो जीववधाद्यनमनस्कत्वेन निंद्यबुद्धयः खाटिकादिपापिष्ठलोकाः मंदमेधसः परलोकपरा
ङ्मुखत्वेन अल्पबुद्धयः संतो निजजीविकाकृते जंतून् हिंसंति ॥ मंदमेधसः अल्पमेधसः अमेधसः कुमेधसः दुर्मेधसः
अत्र मंदेत्यादिना वा अप् ॥ इंद्रवंशावंशस्थयोरुपजातिः ॥श्री॥ स्वजीविकायैन भवंति दुर्जातीयावरं सप्तकमासि
काः किं घ्नंतिश्वधर्माण इमे विधर्माः किं सोमजंभ्नस्तृणजंभ्नएतान् ॥ १० ॥श्री॥ दुष्टापशुवधादिपापकारित्वेन
निंदिता जातिः सामान्यं पुरुषत्वादिर्येषां ते दुर्जातीया इमे सौनिकादिलोकाः विधर्माः निर्धर्माः अतएव श्वधर्माणः कु
कुराचाराः संतः किं किमित्येतान् पशून् घ्नंति ॥ किंभूतान् सोमवल्लीरसो जंभो अभ्यवहार्यो येषां तान् सोमजंभ्नस्त
थात्तृणजंभ्नश्च निरपराधानित्यर्थः किंतु सप्तद्रम्मा भृतिरस्य सोस्य भृतिर्वस्नांशमिति कसप्तको मासो येषां ते स
प्तकमासिकाः भृत्याः संतः स्वजीविकायै स्ववृत्त्यर्थं किं किमिति न भवंति ॥ वरं श्लाघ्यमेतज्जीववधाद्धेतुत्वात् ॥ उप
जातिश्छंदः ॥श्री॥ व्याधावनेहरितजंभ्नि सुजंभ्न्यमंतौ यद्दक्षिणेर्मणि मृगे प्रहरंत्यघं तत् ॥ भूशासितुः सुरभि
गंधियशाः क्षणोति प्रत्यक्षमेव किमु ते पशुवधः पशूनां ॥ ११ ॥श्री॥ व्याधा वने मृगे यत्प्रहरंति किंभूते शोभना जंभा
दंष्ट्रा यस्य तस्मिन् सुजंभ्नि ॥ तथा हरितानि तृणानि जंभो भक्ष्यमस्य तस्मिन् तथा अमंतौ निरपराधे तथा ईर्मं व
कुव्रणं वा दक्षिणमंगमीर्मं बह्वस्य दक्षिणेंगे ईर्मं व्रणमस्येति वा दक्षिणेर्मा तस्मिन् लुब्धकामानां दक्षिणभागं बहू २

स्तस्य धनानुकूलं स्थितं व्याधेन वा दक्षिणभागे कृतव्रणे तद्धनेभवत्वेन परोक्षमप्यघं पापं कर्तृ भूशासितुर्नृपस्य सुर
भिगंधियशः कर्मक्षणोति क्षिणोति वा क्षयं नयति किमुत किं पुनः प्रत्यक्षमेव पशूनां वधः ॥ वसंततिलकं छंदः ॥श्री॥
उद्गंधि दुर्गंधकलमान् सुगंधीं स्त्यक्त्वा पलं कांक्षति पूतिगंधि ॥ लोको य दुर्गंधि सुगंधमत्तुं तच्छासितुस्त खलु दुर्विवेकः
॥ १२ ॥श्री॥ स्पष्टः ॥ किंतु पूतेरिव गंधो यस्य तत्पूतिगंधि स्वभावेन दुर्गंधं ॥ परं कर्पूरादि सुरभिद्रव्यक्षेपेण उद्गंधि
उल्लसद्गंधं सुगंधं च ॥ तत्पलं मांसमत्तुं ॥ तच्छासितुर्लोकं शिक्षयितुर्नृपस्य ॥ इंद्रवज्रा छंदः ॥श्री॥ उद्गंधमंबिह
सुगंध्यथ पूतिगंधि यद्वन्मरुत्सुरभिगंधिरुपूतिगंधः ॥ संसर्गतः सुरभिगंधमिदं वपुर्वा राजानुरूपगुणभृज्जन एष
तद्वत् ॥ १३ ॥श्री॥ उहे पशुकर्षिन् नर यद्वद्यथा इह जगति अंबु जलं संसर्गतः सुरभिद्रव्यसंसर्गाद् उद्गंधमुत्कृष्टगंधं
सुगंधि वा अथवा दुर्गंधद्रव्यसंसर्गात्पूतिगंधि दुर्गंधं स्याद्यथा वा मरुद्वातः संसर्गतः सुरभिगंधिः पूतिगंधो वा स्या
द्यथा वेदं प्रत्यक्षदौर्गंध्यं वपुः संसर्गतः सुरभिगंधं स्यात्तद्वत्तथैष जनः संसर्गतो नृपसंसर्गेण राजानुरूपगुणभृत्
राजशब्देनात्र राजगता गुणा उपचाराद्युच्यंते ततो राजानुरूपा राजगुणसदृशा ये गुणाः कृपादयो अकृपादयो वा
तद्बिभ्रत्स्यात् यथा राजा तथा प्रजेति वचनात् एतेन राज्ञ आत्मन्येव हिंसाकरणदोषः स्थापितः ॥ दुर्जातीयाः अ
त्र जातेरीय इत्यादिनेयः सप्तकमासिकाः अत्र भृतीत्यादिना कः श्वधर्माणः अत्राद्दिपदाधर्मादन्नित्यन् विकल्पमि
छंत्येके श्वधर्माणः विधर्माः ॥ सुजंभ्नि हरितजंभ्नि तृणजंभ्नः सोमजंभ्नः अत्र सुहृतेत्यादिना अन्वद् दक्षिणेर्मणी
त्ययं दक्षिणेर्मेत्यादिना अन्नंतः साधुः ॥ सुगंधि पूतिगंधि पलं उद्गंधि सुरभिगंधिः अत्र सुपूति इत्यादिना अन्
सुगंधि अंबु सुगंधं पलं पूतिगंधि अंबु पूतिगंधो मरुत् उद्गंधि पलं उद्गंधमंबु सुरभिगंधिर्मरुत् सुरभिगंधं व
पुः अत्र वा गंतावितीद्वा ॥ वसंततिलकं छंदः ॥श्री॥ नन्यायगंधोस्मि न धर्मगंधिः करीषगंधस्य पुरीषगंधिः कृ
ते शरीरस्य करं धिगेष गृह्णामि भूमेर्नतु रक्षणाय ॥ १४ ॥श्री॥ न्यायस्य गंधो यस्मिन् स न्यायगंधो अहं नास्मि
एवं निरपराधपशुवधस्य महापन्यायस्य अनिवर्तकत्वान्मयि न्यायस्य गंधोपि नास्तीत्यर्थः अतएवाहं न धर्म
गंधिर्वर्ते अतएवाहं पापानुलिप्तत्वात्पुरीषस्येव गंधो यस्य स पुरीषगंधिः सन्नेषोहं करीषगंधस्यानेकमलावि
लत्वाच्छागणचूर्णवद् दुर्गंधस्य शरीरस्य कृते करं राजभागं धिङ् निंदितं यथा स्यादेवं गृह्णामि न तु भूमेरक्षणाय

अनेकपशूनामेवंवधात्॥ धर्मगंधिः न्यायगंधः अत्रवाल्पेइतिइद्॥ पुरीषगंधिः करीषगंधस्येत्यत्रवोपमानादिति इद्॥ उपजातिश्छंदः॥ श्रीः॥ नोविष्णुपद्यामजपादहस्तिपादौसहव्याघ्रपदाकपादौ॥ मुनीद्विदत्कुंभपदीजडंमां कदन्वतुष्पाद्वधकंस्कनोधिक्॥ १५॥ श्रीः॥ कपादोपृथ्वीपवित्रकौनौसर्वत्रप्रसिद्धौअजपादहस्तिपादौनाममुनीव्या घ्रपदामुनिनासहसहितौमांधिकुस्कतःस्कतिंकुरुतः॥ कविष्णोःपादौकारणतयाअस्यास्तस्यांविष्णुपद्यांगंगा यांकुमारपालनृपोअत्यंतंन्यायीधार्मिकःकृपालुश्चेत्यादियन्मदीयंवर्णनंगंगातटस्थाअपिमुनयःकुर्वंतितद्धर्हे इत्यर्थः॥ यतःकिंभूतंकजाताःशोभनाःसमस्तावादंतायेषांतेकदंतोअतिक्रांतबाल्यावस्थायेचतुष्पादश्चतु ष्पदाःछागादयस्तेषांवधकंतद्वधकानांवधादनिवर्तकत्वात्॥ एतदपिकुतइत्याहयतोद्वौदंतौयस्यसद्विदन्बालः तथाकुंभस्येवपादौयस्याःकुंभपदीदासीद्वंद्वेतद्वज्जडंहेयोपादेयार्थेष्वज्ञं॥ व्याघ्रपदेत्यत्रपात्पादस्येत्यादिनापा दस्यपत्॥ अहस्त्यादेरितिकिंहस्तिपादःअजपादःकुंभपदी॥ विष्णुपद्यामित्येनौकुंभपद्यादिरितिनिपात्यौ॥ क पादौचतुष्पादित्यत्रककसंख्यादितिपाद्॥ कदत्द्विदित्यत्रवयसत्यादिनादंतस्यदत्॥ श्रीः॥ अत्ययोदतिर रोकदन्कुधाश्यावदंतयुगरोकदंतकः॥ श्यावदंश्चयमकिंकरोययाप्राणिभिन्मयिनृपेपिहीजनः॥ १६॥ श्रीः॥ मयिनृपेपिहीमयिराज्ञिसत्यपिहीखेदेजनःकुधाकृत्वाप्राणिभित्प्राणिनःपशून्भिनत्तिविनाशयति॥ कीदृक् सन्अयइववदंताअस्याअयोदतीनामराक्षसीनामतिक्रांतोराक्षसीतुल्यइत्यर्थः यथायमकिंकरःकुधाप्राणि भित्॥ किंनामेत्याहअरोकदन्तथाश्यावदंतयुगरोकदंतकस्तथाश्यावदंश्च॥ अरोकानिश्छिद्राःश्यावाःकपि शाःदंताअस्येतिव्युत्पत्तिः॥ अत्ययोदतिःअत्रस्त्रियांनाम्नीतिदत्॥ श्यावदन्श्यावदंतअरोकदन्अरोकदंतकः ॥अत्रश्यावारोकाद्वेतिवादत्॥ रथोद्धताछंदः॥ श्रीः॥ लोकोत्रमूषिकदतोहिदतःपशून्हंत्याःशुभ्रदन्खलुह सन्नतुशोचतिस्वं॥ वज्राग्रदन्छिखरदद्वृषदद्वराहदंताहिदंतयमदूतहनिष्यमाणं॥ १७॥ श्रीः॥ आःखेदेलो
कोअत्रभुविमूषिकस्येवदंतायेषांतान्मूषिकदतःएवमहिदतश्चपशून्खलुनिश्चयेनहंतिकीदृक्सन्पशु षुहतेष्वस्माकंप्राधान्यंभोज्यंभविष्यतीतिहर्षेणहसन्अतएवशुभ्रदन्हास्यश्चैत्येनउज्वलदंतः॥ नतुनपुनः

स्वंशोचतिकीदृशंसंतं॥ वज्राग्रदादिविशेषणोपेतायेयमदूतास्तैर्हनिष्यमाणं॥ वसंततिलकंछंदः॥ श्रीः॥ किंशुभ्रद न्छिखरदंतखराग्रदंतद्वुःशुभ्रदंतवृषदंतवराहदद्भिःदूतैरिहापियद्वमूषिकदंतकीटाःक्लिश्नंतिजंतुवधकंस्फुटशुभ्र दंतं॥ १८॥ श्रीः॥ खराग्राःप्रचंडाग्रभागाःदंतायेषांतेतथाशेषविशेषणव्युत्पत्तिःस्पष्टइवततोविशेषणद्वंद्वेतैःयमदूतैः कृतव्यथानांपरोक्षत्वात्तत्क्षणनेनकिंनकिंचिदित्यर्थःयद्यस्मादिहलोकेपिजंतुवधकंमांसभक्षणाययत्प्राणिनांघातुकं नरंमूषिकदंतायेकीटाल्लूतास्तएवक्लिश्नंतिपीडयंतिकिंभूतंस्फुटशुभ्रदंतंअभीष्टभोजनप्राप्तिहर्षोत्थहास्येनप्रकटो ज्ज्वलदंतं॥ मांसभक्षकाहिप्रायोल्लूतारोगमहाक्लेशेनविपद्यंते॥ वज्राग्रदन्खराग्रदंतशुभ्रदन्शुभ्रदंतवृषदन्वृ षदंतवराहदद्भिःवराहदंतःअहिदतःअहिदंतमूषिकदतःमूषिकदंतशिखरदन्शिखरदंतेत्यत्रवाग्रांतेत्यादिनावा दत्॥ श्रीः॥ संज्ञोसंज्ञःप्रज्ञुरप्रज्ञरूर्ध्वज्ञोनूर्ध्वज्ञःजानुनास्वेनभुंक्ते॥ पापंपापोपार्जितार्थंतुजंतुर्दुर्हृत्प्रायैःस्वैःकल द्विश्चसार्धं॥ १९॥ श्रीः॥ संगतेगुर्वादौविनयेनरोगादिनावामिलितेजानुनीयस्यसंज्ञोअसंज्ञर्वाअसंगतजानुर्वा तथाप्रगतेप्रवृद्धेप्रणतेप्रकृष्टेवाजानुनीयस्यसप्रज्ञुःरप्रज्ञोवातथाऊर्ध्वेजानुनीयस्यसऊर्ध्वज्ञःऊर्ध्वस्थःअनूर्ध्वज्ञः र्वासर्वोपीत्यर्थःजंतुःस्वेनआत्मीयेनजानुनाउपलक्षणत्वात्स्वकायेनेत्यर्थःपापमशुभंकर्मभुंक्तेअनुभवतिपापोपा र्जितार्थंतुपापेनजीववधादिनाउपार्जितोयोअर्थोद्रव्यंतंस्वैर्ज्ञातिभिःकलत्रैश्चमित्रैश्चसार्धंभुंक्तेकिंभूतैःदुर्हृत् प्रायैःपापोपार्जितद्रव्यविभागस्यग्राहकत्वेनदुःखहेतोःपापविभागस्यचग्राहकत्वेनचनरकादिमहादुःखहेतुत्वा दरितुल्यैःतस्मादेतदर्थमज्ञानांधएवप्राणिवधादिमहापापकर्मकरोतीत्यर्थः॥ शालिनीछंदः॥ श्रीः॥ उत्कोर्ध्वजा नुमितितंद्रुणसंसजैत्रधन्वाथगांडिवधनुःशातधन्वतुल्यः॥ इत्यादिशात्खरणसंखुरणस्तनूजमायोगिनंखुरण संखरणःकृतंच॥ २०॥ श्रीः॥ स्पष्टःकिंतु॥ ऊर्ध्वजानुमूर्ध्वस्थंतंपशुकर्षिणंनरंद्रुवंन्नासिकास्यद्रुणसंनाम॥ जैत्रं जिष्णुंधनुर्यस्यसजैत्रधन्वाअतएवगांडिवधनुषाअर्जुनेनशातधन्वनाचनृपभेदेनतुल्यःखरानासिकास्यखरण संनामआयोगिनमधिकारिणंखुरवन्नासिकास्यखुरणसंनाम॥ वसंततिलकंछंदः॥ किमादिशदित्याह॥ श्रीः॥ विखोविखुर्नखलुकिंतुमृषाभिभाषीस्यात्स्थूलनासिकइवप्रणसोपिविग्रः॥ शिष्यस्ततोपिपरयोवनजानिरस्माद

प्यत्रजंतुवधकः प्रसभंभवद्भिः ॥२१॥ श्रीः॥ विख्रो विगतनासिकः पुमान् खलु निश्चयेन न विखुर्न विगतनासिकः
किंतु स्थूलनासिक इव यथा स्थूलनासिकः प्रणसः स्यादेवं प्रणसोपि प्रवृद्धनासिकोपि मृषाभिभाषी विग्रो विगत
नासिकः साधुवादरूपस्य परमार्थवक्तृत्वस्याभावात् ॥ अतएवायं महापापिष्ठत्वाद्भवद्भिः शिष्यः शिक्षणीयः ततो पि मृ
षाभिभाषणतोपि सकाशात्परयौवनं परस्त्रीसमूहो जायायस्य स परयौवनजानिः पारदारिकः परदारसेवनेनैतदप
लाप महालीकेन च मृषाभिभाषकाद्द्विगुणमहापापिष्ठत्वाद्भवद्भिः प्रसभं हठाद्विशेषेणेत्यर्थः शिष्यो स्मादपि परयौ
वनजानितोप्यत्र जगति जंतुवधको मृषावादादिसर्वमहापापमूलेन जंतुवधेन मृषाभिभाष्यादिपापिष्ठेभ्योप्यति
महापापिष्ठत्वाद्भवद्भिः प्रसभं शिष्यः ॥ संज्ञुः संज्ञः प्रज्ञः अत्र संप्रादित्यादिना ज्ञुर्ज्ञो अनूर्ध्वज्ञुः ऊर्ध्वज्ञुः ऊर्ध्वजा
नुः अत्र वोर्ध्वादिति ज्ञुर्ज्ञो वा ॥ सुहृद्भिः दुर्हृदित्येतौ सुहृदित्यादिना निपात्यौ ॥ जैत्रधन्वेत्यत्र धनुषो धन्वन्निति
धन्वन् ॥ शतधन्व गांडिवधनुः अत्र वा नाम्नीति वा धन्वन् ॥ खरणः खुरणः अत्र खरेत्यादिना नस् ॥ द्रुणसं खरणसं
अत्रास्थूलाच्च नस इति नसः ॥ अस्थूलादिति किं स्थूलनासिकः प्रणसः अत्रोपसर्गादिति नसः ॥ विखुः विग्रः विख्रः
अत्र वः खुख्रग्र मिति खुख्रग्राः ॥ परयौवनजानिः अत्र जायाया जानिरिति जानिः ॥ श्रीः ॥ विकाकुदुत्काकुदपूर्ण
काकुदं संपूर्णकाकुत्समम् एव तद्वचः प्रपस्यत पूर्णककुज्जनैरमायाघोषणा मा त्रिककुद्गिरेर्व्यधुः ॥२२॥ श्रीः॥ तेनि
योगिनः पूर्णककुदस्कंधा येषां ते ये जनास्तैस्तरुणलोकैः कृत्वा अमायाघोषणां व्यधुः कथं त्रीणि ककुदानि ककुदाका
राणि शिखराण्यस्य त्रिककुद्यो गिरिर्लंकाद्रिस्तस्मात् समभिव्याप्यतमवधीकृत्य वा ॥ किंकृत्वा तद्राज्ञो भैमेर्वचनं सम
मेव युगपदेव प्रपद्यांगीकृत्य ॥ किंभूतं विगतं काकुदं ताल्वत्र विकाकुत् तथा उत्काकुत् तथा अपूर्णकाकुदं तथा सं
पूर्णकाकुत् ॥ किंचित्तालुस्पर्शरहितं किंचिच्चोद्गततालुस्पर्शं किंचिच्चासंपूर्णतालुस्पर्शमित्यर्थः ॥ विकाकुत् उत्का
कुदित्र व्युदइत्यादिना लुक् समासांतः ॥ संपूर्णकाकुत् असंपूर्णकाकुदमत्र पूर्णाद्वेति वा लुक् ॥ पूर्णककुज्जनैरत्र
ककुदस्येत्यादिना लुक् ॥ त्रिककुदिति त्रिककुद्गिराविति निपात्यं ॥ वंशस्थेंद्रवंशयोरुपजातिश्छंदः ॥ श्रीः॥ जंतुं
घटोध्नीवद् हन्न कोपि जनः सुशास्त्रीकसुभोक्तृकोपि ॥ सुस्वामिकायां शुभदंडिकायां श्रेयस्तनूकेन भुवामनेन ॥

॥२३॥ श्रीः॥ कोपि जनो भुवां पृथ्व्यां जंतुं प्राणिनं घटोध्नीवद्गामिव नाहन् ॥ कीदृक् महाभटत्वाच्छोभना शास्त्री छुरिका य
स्य सः सुशास्त्रीकस्तथा शोभनो भोक्ता रक्षको राजादिर्यस्य स सुभोक्तृको विशेषणकर्मधारयेसोपि ॥ यतः कीदृश्यां
भुवां शुभाः पशुवधनिवारणाय नियुक्तत्वेन पशुवधस्थानेषु परिभावुकत्वाच्छुभव्यापारदंडिनो राजकांडिका यस्यां तस्यां
एतदपि कुत इत्याह यतः श्रेयस्तनूकेन न्यायादिसद्गुणपवित्रांगकेन अनेन भैमिना कृत्वा सुस्वामिकायां शोभनभर्तृ
कायां ॥ घटोध्नीत्यत्र स्त्रियामूधसो नीति नः समासांतः शुभदंडिकायामत्र नः कजिति कच् ॥ अनिनः स्मन् ग्रहणाद्दर्थ
वता अनर्थकेन च तदंतविधिं प्रयोजयंति ॥ सुस्वामिकायां केचित्तु सुभोक्तृकः नित्यदित् ॥ सुशास्त्रीक श्रेयस्तनूकेने
त्यत्र ऋदुङित्यदित इति कच् ॥ उपजातिश्छंदः ॥ श्रीः॥ सुशालिके सदधिके सुसर्पिष्के भोजने निर्मधुकोत्पयस्के प्रजो
दुरस्कार मतेस्म नत्वामिषेनुपानत्क इवापमार्गे ॥२४॥ श्रीः॥ स्पष्टं किंतु ॥ निर्मधुको त्पयस्के मधुनामद्यान्निर्गतं निर्म
धुकं तथा उत्प्राबल्येन पयो दुग्धं यत्र तदुत्पयस्कं विशेषणकर्मधारये तस्मिन् उदुरस्का अभीष्टामायाघोषणोत्थहर्षे
णउच्छ्वसितहृदया सती ॥ यथा अनुपानत्कः पादुकारहितो नरोपमार्गे कंटकाद्याकीर्णत्वान्न रमते ॥ श्रीः॥ भूभुजा
सदनडुत्कसुलक्ष्मीकादिदेवसदृशेन तदानीं ॥ इक्षुतान्धितरणे जितनौकेनैकपुंस्कममुना जगदासीत् ॥२५॥ श्रीः॥
तदानीममुना भूभुजा भैमिना कृत्वा जगदासीत् ॥ किंभूतं एकः कुमारपाल एव पुमान् पुंगुणोपेतः पुरुषो यत्र तदेकपुंस्कं
विक्रमाभयदानन्यायतपोदाक्षिण्यकारुण्यपालनादिभिः पुंगुणैर्जगति कुमारपालतुल्यः पुमान् अन्यो नाभूदित्यर्थः ॥
यतः किंभूतेन विक्रमादिगुणैः सदनडुत्कसुलक्ष्मीकादिदेवसदृशेन सदनडुत्कदेवेन शंभुना सुलक्ष्मीकदेवेन च वि
ष्णुना तुल्येन अप्रचंडशासनेनेत्यर्थः ॥ तथोर्व्याममारिप्रवर्तनया इक्षुताब्धितरणे जितानौस्तरी येन तेन ॥ स्वागता
छंदः ॥ श्रीः॥ योलीकदर्पात्पललादनश्रद्धिमान् स तं सलक्ष्मीकमपि व्यवासयत् ॥ अश्रद्धमुच्छ्रद्धकमाश्वनर्थकैतरै
र्वचोभिः करुणाविधोव्यधात् ॥२६॥ श्रीः॥ पूर्वार्धं स्पष्टं व्यवासयत् देशात्ताडितं चक्रे तथा करुणाविधो दयाकरणवि
षये नास्ति श्रद्धा आंतरः परिणामविशेषो यस्य तमश्रद्धं नरमनर्थकैतरैः सार्थकैर्वचोभिः धर्मनिवेशनादिभिः कृत्वा उ
च्छ्रद्धकमुल्लसच्छ्रद्धं व्यधात् ॥ सदधिक उदुरस्का सुसर्पिष्क निर्मधुक अनुपानत्कः सुशालिके अत्र दध्यादिना कच् ॥
एकपुंस्कं सदनडुत्का जितनौकेन उत्पयस्क सुलक्ष्मीके त्यत्र पुमित्यादिना कच् ॥ कचिल्लक्ष्मीशब्दाद्द्विलवकृत्वयोर

५

पिनित्यंकचमिच्छंतिसलक्ष्मीकं॥अनर्थकेत्यत्रनञोर्थादितिकच्॥उच्छ्रङकं॥अश्रङ्घमित्यत्रशेषाद्वेतिवाकच्॥इंद्र
वंशावंशस्थयोरुपजातिश्छंदः॥श्रीः॥स्फप्रेयसीकरुणयाबङ्कविष्णुमित्रग्रामेप्यभूत्सस्फत एवजनोनृपेस्मिन्॥स्फभ्रा
तृपुत्रसहितेकृत्तनाडिकृत्ततंत्रीगलाजबलिमापनदेवतापि॥२७॥श्रीः॥अस्मिन्भैमौनृपईद्दशिसतिबहवोविष्णु
मित्रायत्रसबङ्कविष्णुमित्रएवंनामायोग्रामस्तस्मिन्नपिस्फप्रसिद्धेस्फरादिस्थानेपिअप्रसिद्धग्रामादिस्थानेपीत्यर्थः
सस्फतएवउपलक्षणत्वात्सबांधवोपीत्यर्थः जनोभूत्कीद्दक्ककरुणयाकृत्वाशोभनांप्रेयसीप्रियतमायस्यसस्फप्रेय
सीग्रामेपिलोकोनजंतुवधंचकारेत्यर्थः तथादेवताप्यास्तांजनश्चंडिकादिदेव्यपिन्आपनलेभे॥कंकृताश्छिन्ना
नाड्योभंगवसायेषांतेकृतनाडयस्तथाकृत्ता छिन्नातंत्रीधमनीयेषांतेनयागलायेषांतेकृत्ततंत्रीगलाश्चयेअजाःदेव
तानांपुरोयेहिंसिताश्छागाइत्यर्थःतद्रूपोयोबलिस्तं॥किंभूतेतस्मिन्शोभनोभ्राताकुमारपालोयस्यसस्फभ्रातामा
हीपालदेवस्तस्यपुत्रोजयदेवस्तेनसहिते॥वसंततिलकंछंदः॥श्रीः॥व्याधोपितत्रालमनेकतंत्रीकामेकतंत्रिंध्वन
यन्विपंचीं॥स्तंबंस्फनाडीकमखंडनाडिंश्रित्वामृगान्नकर्षतिनस्महंतुं॥२८॥श्रीः॥तत्रभैमौसतिव्याधोपिमृगान्
हंतुंनकर्षतिस्मलक्षंनानयतिस्म॥कीद्दक्सन्ननेकवल्लकीगुणामेकतंत्रिंचविपंचींवीणामलमत्यर्थंध्वनयन्मृग
चित्तहरणायवादयन्॥किंकृत्वास्तंबंगुल्मंश्रित्वामृगाणांस्वमदर्शयितुंस्तंबेनांतर्हितोभूत्वेत्यर्थः॥शोभनाअख
ंडाश्चनाड्योवस्त्रसायस्यतंस्फनाडीकमखंडनाडिंच॥बङ्कविष्णुमित्रेत्यत्रननाम्नीतिनकच्स्फप्रेयसीत्यत्रईयसोरि
तिनकच्॥सस्फतइत्यत्रसहइत्यादिनानकच् स्फभ्रातृइत्यत्रभ्रातुःस्फुतावितिनकच्॥कृत्तनाडिकृत्ततंत्रीत्यत्रना
डीत्यादिनानकच्॥स्वांगइतिकिंस्फनाडीकंस्तंबं॥अनेकतंत्रीकांविपंचीं॥अन्येत्वाङ्कःनपारिभाषिकंस्वांगमिहगृ ५
ह्यतेकिंतुस्वमात्मीयमंगंस्वांगंआत्माचेहअन्यपदार्थस्तस्यांगमवयवस्तस्मिन्नितितेषांमतेअखंडनाडिंस्तंबंए
कतंत्रिंविपंचीं॥इंद्रवंशाछंदः॥श्रीः॥निष्प्रवाणिवसनाःकरभोरूस्फभ्वनस्तमनसःकतुपूर्चैः दाक्षिभार्गवमु
खाअतिकैकेय्यात्मजेपशुवधंजङ्कुरस्मिन्॥२९॥श्रीः॥कैकयस्यराज्ञोपत्यंस्त्रीकैकेयीतस्याआत्मजोभरतोअ
मार्याघोषणादिमहाधर्मेणतमप्यतिक्रांतोअस्मिन्भैमौसतिदाक्षिभार्गवमुखाःमुनयःक्रतुषुयागेषुउच्चैःपशु

वधंजङ्कुः तत्यजुःपशुवधपरिहारेणयज्ञंचक्रुरित्यर्थः किंभूताःसंतःप्रोयतेस्यामितिप्रवाणीतंतुवायशलाकासा
निर्गताअस्मादितिनिष्प्रवाणितंत्रादचिरोद्धृतमित्यर्थः क्लीबेइतिह्रस्वःयद्वाउयतेस्यांवानिर्देशाप्रसृतावानिःप्रवा
णिःसानिर्गतातंतुभ्योस्येतिनिष्प्रवाणिसदशमित्येकेतद्वसनंयेषांतेनिष्प्रवाणिवसनाःयागाचार्यत्वाद्यागक्रिया
कालेमांगलिक्यायपरिहितसदृशनूतनवस्त्राइत्यर्थः तथाकरभोरुभिःस्फभ्रूभिश्चस्त्रीविशेषैरनस्तमक्षिप्तमजि
तंमनोयेषांतेजितेंद्रियाश्चेत्यर्थः॥स्वागताछंदः॥श्रीः॥मैत्रेयिकाप्युग्रधियोपिदाविकाकूलैर्यपूर्वैर्दाविकपूर्वदाविकाः
॥तेदार्घसत्राङ्कतिमत्रचक्रिरेप्रालेयभश्चायसतद्वचोवशात्॥३०॥श्रीः॥अत्रजगतिदाविकपूर्वदाविकाःदेविकायां
नद्यांभवाःपूर्वदेविकानाम्निप्राच्यग्रामेभवाश्चतेदाक्षिभार्गवमुखामुनयोदार्घसत्रेदीर्घसत्रेचिरकालीनयागेभवाया
आङ्कतिराहवनंतांचक्रिरेकैःकृत्वादाविकाकूलैःदेविकायानद्याःकूलेभवैर्यवैर्नपशुभिरित्यर्थः॥कस्मात्प्रलयाद्धिमा
द्रेरागतंप्रालेयंहिमंविनयादिप्रधानत्वेनअतिशीतलत्वात्तद्धन्नातिप्रालेयभंतथाश्रेयसादयाप्रधानधर्मस्यइदंश्राय
संच धर्मसंबद्धं यद्वचोभैमिवचनंतस्यवशआयत्ततातस्मात्किंभूताःमित्रयुराद्यपुरुषोगोत्रस्यप्रवर्तयितातस्यक
र्मैमै त्रेयिकामित्रयुप्रवर्तितोयागेछागादिवधस्तस्याआमिःकार्यत्वेनलाभस्त्याउग्राहिंस्त्राधीर्येषांतेपिआम्नाया
याितयागच्छागवधकर्माणापीत्यर्थः॥इंद्रवंशाछंदः॥श्रीः॥सशांशपस्तंभभुजोतिनैयायिकोतिसौवागमिकोमृग
व्यात्॥ररक्षसत्वानिधनानिवैहीनराणिवैहीनरिवन्महोजाः॥३१॥श्रीः॥सभैमिर्मृगव्यादाखेटात्सत्वान्यारण्यान्प
शून्ररक्ष॥यतःकीद्दक्सर्वधर्मप्रधानदयाधर्मस्याख्यातृत्वेनपरस्परवाक्यविरोधादिदोषरहितत्वेनचसर्वागमेषु
शोभनआगमःस्वागमः॥श्रीद्वादशांगंतंसदार्हतमुनिपर्युपास्त्या अतिशयेनवाअस्यधीतेवातिसौवागमिकःएतेनस
म्यक्ज्ञानमुक्तं॥तथाअतिनैयायिकोअत्यंतंन्यायेनप्राणिवधरक्षादिनाधर्मन्यायेनचरन्॥एतेनसम्यक्क्रियापर
त्वोक्तिःतथाशिंशपायावृक्षभेदस्यविकारःशांशपोयस्तंभस्तद्वदतिसारोभुजोयस्यसःतथामहदोजःस्वबंधुमित्र
सैन्यादिजनितंबलंयस्यसःएतेनसर्वशक्तिसंपन्नइत्युक्तं॥यथावैहीनरि वैहीनरस्यापत्यंविज्ञोन्यायीशक्तश्चस
न्वैहीनराणिवहीनरस्यस्वपितुःसक्तानिधनानिररक्ष॥उपेंद्रवज्राछंदः॥श्रीः॥सौवश्विदौवारिकपैलिदौवारपालि

मौवस्तिकमुरव्यलोकः॥ मां सान्यति स्फे यक्रतोत्रनैयग्रोधंकषायं न्नुन भोक्तुमैछत्॥ ३२॥ श्रीः॥ स्पष्टं किंतु॥ शोभ
नो अश्वोस्य स्वश्वस्तस्यापत्यंसौवश्विः दौवारिको द्वारेनियुक्तः दौवारपालिर्द्वा रपालस्यापत्यं॥ अतिस्फे यक्रतोदयादिगुणैः
स्फारूतस्यपरपत्यमतिक्रांतः सन् अत्रभैमो सति॥ निष्प्रवाणीत्यत्र निष्प्रवाणिरिति कजभावो निपात्यः स्फ म्न्रू। करभोरू। अ
६ त्र स्फ भ्न्वादिभ्य इति न कच्च॥ इति सप्तविंशः पादः समर्थितः॥ दाक्षिभार्गवेत्यत्र हृद्धिरित्यादिना हृद्धिः कैकेयी मैत्रेयिका प्राले
येत्यत्र केकयेत्यादिना हृद्धिर्यादेश्च शब्दरूपस्य इयादेशः दाविक दाविका कूलैः पूर्वदाविकाः शांशपदार्घसत्र श्रायसेत्यत्र
देविकेत्यादिना हृद्धि प्रसंगे आकारः॥ त्रितिविहीनगणि विहीनरिः अत्र वहीनरस्येदित्येत् नैयायिकः सौवागमिकः त्रितिसौ
वश्वीत्यत्र य्व इत्यादिना औदौ तावागमौ॥ दौवारिकः सौवस्तिकः स्फे यक्रतः अत्र द्वारादेरित्यैदैतावागमौ॥ श्वादेरिति प्र
तिषेधाद्वारादिपूर्वाणामपिस्यात्॥ दौवारपालिः नैयग्रोधं अत्र न्यग्रोधस्येत्यादिना ऐदागमः। उपजातिश्छंदः॥ श्रीः॥ नै
य्यंकव्यासीन्न्यांकवत्वक्स्पटानां त्वग्डुः प्रापास्मिन् घोषयत्याश्वमारि॥ स्वांगिव्यांगिश्वाभस्त्रिभिर्व्यावभाषी निष्ठैः श्वाक
र्णेप्युत्त्वकैः पल्लिदेशे॥ ३३॥ श्रीः॥ न्यांकवीनां कुमृगभेदसक्तात्वकुचर्मपदार्थषां न्यांकवत्वक्स्पटानां मुनीनां शबराणां वा नै
यंकवीत्वकुड्डुष्प्रापासीत् मृगाणां मारणाभावात्। कसति अस्मिन् भैमो किंभूते व्यावभाषी निष्ठैर्विनिमयन अन्योन्यंभा
षणतत्परैः सद्भिः॥ स्वांगिव्यांगिश्वाभस्त्रिभिः स्वंगव्यंगश्वभस्त्राणामपत्यैः प्रयोज्यकर्तृभिरुच्चैरुदात्तस्वरेण आश्वमारि
घोषयति॥ क श्वाकर्णेश्वाकर्णः श्वकर्णापत्यस्य पल्लिपतेः संक्रपल्लिदेशेपि॥ नैयंकवीन्यांकवेत्यत्रन्यंकोर्वेतिवा पदागमः॥ व्या
वभाषीसांगिव्यांगीत्यत्र नञ्स्वंगादेरित्यैदौतौन॥ श्वाभस्त्रिभिरत्र श्वादेरितिइ इति नौत्॥ श्वाकर्णेत्यत्र न्यइत्यौत्॥ वै
श्वदेवंछंदः॥ श्रीः॥ न श्वापदं श्वापदिकोपिशौवापदामिषेप्सुः पलमाददे स्मिन्॥ न प्रौष्ठपादोप्यभवन्नृशंसो धर्मोत्तरदा
त्स्फत्तरभद्रपादः॥ ३४॥ श्रीः॥ अस्मिन्नृपे सति शुन इव पदमस्य श्वापदमारण्यकः पशुर्मृगचित्रकादिस्तेन चरति श्वाप
दिको पिव्याधोपि श्वापदस्य मृगस्य विकारं पलं मांसं नाददे श्वापदवधेन नाग्रहीत्॥ कीदृक् शौवापदामिषेप्सुः श्वापदस
क्तमांसमिछन् एतेन राज्ञो अतिप्रचंडाज्ञतोक्ता॥ तथा तदा भैमराज्ये प्रौष्ठपादोपि प्रौष्ठपदाभिः प्रचंडयुक्ताभिर्युक्ते काले
जातोपि न रो नृशंसो हिंस्रकर्मा नाभूत्॥ प्रौष्ठपदास्फहि जातो अतिनृशंसः स्यात्॥ यदुक्तं॥ परदारमद्यसेवी दारुणक ६
र्मा निशाचरस्तीक्ष्णः॥ विषमः प्रसह्यहर्ता प्राक्प्रोष्ठपदाभिजातः स्यात्॥ पूर्वभद्रपदा यत्र स प्राक्प्रोष्ठपदः॥ कालसत्र

॥ यतः कीदृक् धर्मादत्स्फत्तरभद्रपादः उत्तरभद्रपदास्फ जातमतिक्रांतः॥ उत्तरभद्रपदास्फहि जातो अतिधार्मिकः स्यात्।
उक्तंच॥ वक्ता स्फ खी प्रजावान् धार्मिको द्वितीयास्त्वित्यादि द्वितीयास्त्रूत्तरभद्रास्फ श्रीकुमारपालोत्यादितया अहिंसादिवि
षयया धर्मवासनया तस्मादप्यतिधार्मिक इत्यर्थः॥ श्वापदं शौवापदेत्यत्र पदस्यानितिवेतिवा औत्॥ अनितीतिकिं श्वा
पदिकः प्रौष्ठपादः उत्तरभद्रपादः अत्र प्रोष्ठेत्यादिना उत्तरपदस्य हृद्धिः॥ उपजातिश्छंदः॥ श्रीः॥ तंपूर्वनैदाघरविप्रतापम
नुव्रजन् सोपि न जातु हिंसां॥ चक्रे स्फपांचालकसर्वपांचालकार्धपांचालकलोक उच्चैः॥ ३५॥ श्रीः॥ सोपि हिंसकत्वेन सर्व
त्र प्रसिद्धोपि स्फपांचालक सर्वपांचालकार्द्ध पांचालकलोकः स्फपांचालेषु अर्धेषु पांचालेषु च भवो यो लोकः स जंतुहिंसामुच्चै
र्न चक्रे॥ यतः पूर्वनैदाघा निदाघस्य पूर्वस्मिन् भागे भवो यो रविस्तद्वत्प्रतापो यस्य तं॥ तथा तं भैमिमनुव्रजन् सेवकत्वात्तदा
ज्ञाप्रतिपालनेनानुगच्छन्॥ पूर्वनैदाघेत्यत्र अंशादृतोरित्युत्तरपदहृद्धिः॥ स्फपांचालक सर्वपांचालक अर्धपांचालकेत्य
त्र स्फसर्वेत्यादिना उत्तरपदहृद्धिः॥ श्रीः॥ पदातिभिः सोपरकार्ष्णमृत्तिक पूर्वपांचालकपौर्वमद्रैः॥ द्वालाम धौदारितभां
ड आस्य द्विवार्षिकींचाधिकवार्षिकींच॥ ३६॥ श्रीः॥ स्पष्टं किंतु॥ अपरकार्ष्णमृत्तिक पूर्वपांचालक पौर्वमद्रैरपरकृष्ण
मृत्तिकानाम्नि प्राग्ग्रामे पूर्वेषु पंचालेषु पूर्वेषु मद्रेषु च भवैः द्विवार्षिकीं द्वे वर्षे भूतामधिकवार्षिकींच अधिकानि द्वाभ्यां वर्षा
भ्यां सकाशादतिरिक्तानि वर्षाणि भूतांच॥ श्रीः॥ सीदता मदित धान्यमसौ त्रैवर्षिकं यदिह तेन कदापि॥ न द्विकौडविक
आढ्यगृहं कोप्यभ्यगादधिककौडविको वा॥ ३७॥ श्रीः॥ असौ भैमिर्यद्यस्माद्धेतोः सीदतां मांसादि विक्रयनिषेधेनाव
र्तमानानां सौनिककल्लालादीनां त्रैवर्षिकमतिबद्धत्वेन त्रीणि वर्षाणि भावि धान्यमदित ददौ॥ तेन कारणेन इह जगति
कोपि आढ्यगृहं धनिसदनं कदापि नाभ्यगात्॥ कीदृक् सन् द्वौ कुडवौ सेतिकेप्रयोजनमस्य द्विकौडविको धान्यसेति
का धान्यसेतिकाद्ययार्थी॥ एवमधिककौडविकः॥ स्वागताछंदः॥ श्रीः॥ नृपः स्वपत् पांचकलापिकाहर्तृत्रिद्विसांवत्स
रिकांगरक्षः॥ द्वैशाणशाणानिशितासिपार्श्वोशृणोन्निशीथे स्वरमन्यदार्तं॥ ३८॥ श्रीः॥ अन्यदा नृपो निशीथे आर्तस
दुःखं स्वरमशृणोत्॥ कीदृक्सः॥ द्वाभ्यां शाणाभ्यां मानभेदाभ्यां क्रीता द्वैशाणी श्रेष्ठत्वेन महार्घ्येत्यर्थः या शाणा तेजनो
पलस्तस्यां निशितस्तीक्ष्णीकृतो यो असिः स पार्श्वे यस्य सः॥ न जी विकार्य षांते पांचकला पिकाहर्तृत्वयः श्रूरत्वाचुकृता
दिगुणैर्महाद्वृत्त य इत्यर्थः॥ द्विसांवत्सरिकाश्च द्वौ संवत्सरौ भूता श्चिरकालीना इत्यर्थः ये अंगरक्षा निशीथस्य निद्राभरह

तुत्वात्स्वपंतरत्नेयत्रतस्मिन्॥ उपजातिश्छंदः॥ श्रीः॥ नृपोयदध्याविति कापिशोकापूरान्मुमूर्षत्यभिगोदितीह॥ विदीर्य
तेद्वैकुलिजिक्यु खात्यद्वैकोडविक्यभ्यधिकान्नपूरात्॥ ३९॥ श्रीः॥ पूर्वार्धस्पष्टं॥ युक्तंचैतद्यदसोशोकापूरादभिगोदि
ति हि यस्मादर्धकोडविकोकुडवस्याधनक्रीताउखास्यालीद्वैकुलिजोधान्यमानभेदोपचतिसंभवत्यवहरतिवासा अभ्यधि
कान्नपूराहिदीर्यंते॥ श्रीः॥ राजार्धकंसिकमथोपरिधायवस्त्रमात्रार्धकोडविकगुंठननीलवासाः॥ प्रावाहणेयपदिकान्
स्वपतःप्रवाहणेयेतरान्पिविहायतनश्चचाल॥ ४०॥ श्रीः॥ अथोराजाततनस्थानाच्चचाल॥ किंकृत्वाकंसोत्रीन्यादिमान
मर्ध्दकंसस्यार्धकंसःप्रयोजनमस्यार्धकंसिकमल्पमूल्यमित्यर्थः वस्त्रंपरिधायतयास्वपतःप्रावाहणेयपदिकान्प्रवा
हणःशस्त्राजीवीविप्रस्तस्यापत्यानिशुभ्रादित्वादेयणि प्रावाहणेयायेपदिकाःपत्तयस्तान्प्रवाहणेयेतरानपि विहाय
॥ कीदृक्सन्केनाप्यनुलक्षणार्थमात्रंगृहीतमार्धकोडविकंकुडवार्धनक्रीतंगुंठनंसकलशरीराच्छादकंनीलंवास्नोव
स्त्रंयेनसः॥ पूर्वपांचालकेत्यत्रामद्रस्यदिशइत्युत्तरपदवृद्धिः॥ अमद्रस्येतिकिंपौर्वमद्रः॥ अपरकाण्मृत्तिकेत्यत्रप्राग्ग्रा
माणामित्युत्तरपदवृद्धिः॥ द्विवार्षिकोअधिकवार्षिकोअत्रसंख्येत्यादिनाउत्तरपदवृद्धिः॥ अभाविनीति किं॥ त्रैवार्षि
कंधान्यमानद्विकोडविकः॥ अधिककोडविकः॥ संवत्सरद्विसांवत्सरिकेत्यत्रमानेत्यादिनाउत्तरपदवृद्धिः॥ अशाणकु
लिजस्येतिकिं॥ द्वैशाणद्वैकुलिजिकि॥ अनाम्नीतिकिं॥ पांचकलापिक॥ अर्धकोडविकीत्यत्रअर्धादित्यादिनाउत्तरपदवृ
द्धिः॥ वान्यादेःपरिमाणात्पूर्वस्यतुर्धशब्दस्यवास्यात्॥ अनतइतिकिं आर्धकंसिकंप्रवाहणेयेत्यत्रप्रादिनाउत्तरपदवृद्धिरा
देःपूर्वस्यतुप्रस्यवा॥ वसंततिलकंछंदः॥ श्रीः॥ समलक्षिसयान्प्रवाहणेयकृतोप्यप्रावाहणेयकः॥ तादृग्वेषःप्रवाह
णेयिभिरेकप्रावाहणेयिवत्॥ ४१॥ श्रीः॥ सराजाप्रवाहणेयकतापिप्रवाहणयानांप्रवाहणस्यापत्यानांसमूहादपि
यान्सन्बहूनांरक्षापालानांमध्यान्निर्गच्छन्नपीत्यर्थः॥ प्रवाहणेयिभिःप्रवाहणेयस्यापत्यैर्युवभीरक्षापालैःसमलक्षि
कइव॥ एकप्रावाहणेयिवद्कोप्येकोयंप्रावाहणेयस्यापत्यंयुवायातीतिज्ञातोननुराजेत्यर्थः॥ यतोनास्तिप्रावाहणेय
कंप्रावाहणेयानांसमूहःसहचरंयस्यसएकाकीत्यर्थः तथातादृग्वेषःपरिहितात्यमूल्यनीलवस्त्रत्वेनप्रावाहणेयिवेष
सदृशवेषः॥ प्रवाहणेयिभिःप्रवाहणेयिप्रवाहणेयकतःप्रवाहणेयकःअत्रएयस्येत्युत्तरपदवृद्धिः॥ आदेस्तुप्रस्यवा

॥ वैतालियंछंदः॥ श्रीः॥ आचापलेनैषजयन्नचापलंक्षितेरनैश्वर्यमनैपुणंविना॥ पथानशौचेनययोसतस्ययन्नाकोशलं
पथ्यपर्यत्यकौशलं॥ ४२॥ श्रीः॥ सएषराजाअनशौचेनअशुचित्वरहितेनपथारुत्याययौ कीदृक्सन्॥ आचापलेनस्थिर
चित्ततयाक्षितेःपृथ्व्याअचापलंस्थिरतांजयन्निर्भयइत्यर्थः तथाअनैश्वर्यमनैपुणंविनासामर्थ्येनादक्षनयाचरहितःशक्तो
दक्षश्चेत्यर्थः॥ युक्तंयदसोशुचिनापथाययोयद्यस्मात्तस्यभेमःपथिमार्गविषयेअकौशलमनिपुणत्वंनास्तिमार्गेत्यसो
कुशलएवेत्यर्थः॥ तथाहियस्मात्तस्यापथेअमार्गेअकौशलंअथचपथिसदाचारे अपंथेअनाचारेइत्यर्थः॥ शब्दछलेन
अयमर्थांतरन्यासः॥ इंद्रवंशावंशस्थयोरुपजातिश्छंदः॥ श्रीः॥ आनैश्वर्यानैपुणाशौचरुग्णोयल्लोकस्तत्किंमयेत्य
न्यदुःखेः॥ दुःखीव्याधीयन्नृपस्तेननाक्षेत्रज्ञेप्याक्षेत्रज्ञमेषान्वमंस्त॥ ४३॥ श्रीः॥ यद्यस्माल्लोकआनैश्वर्यदारिद्र्यमसा
मर्थ्यवाआनैपुणमज्ञताआशौचंरोगादिनाअशुचित्वंद्वंद्वेतेरुग्णःपीडितोवर्ततेकस्याअपिस्त्रियाएवंशोकेनरोदना
त्॥ तत्तस्माद्वेतोर्मयाकिमानैश्वर्यादिदुःखादरक्षकत्वेनव्यर्थनृपशब्दार्थत्वान्मयानृपेणनकिमपीत्यर्थः इत्येवंप्र
कारेणअन्यदुःखेरानैश्वर्यादिविषयैर्लोकस्यकष्टैर्दुःखीसन्नृपोभैमिर्यद्यस्मात्व्याधीदम्त्राम्यत्तेननहेतुनाएष
नृपाअक्षेत्रज्ञपिक्षेत्रज्ञआत्मानतयाअक्षेत्रज्ञःपरस्तस्यभावेपिलोकस्यपरत्वेपिआक्षेत्रज्ञंस्वस्माल्लोकस्यपरत्वं
नान्वमंस्त॥ प्रजादुःखदुःखितत्वादात्मनोभिन्नाःप्रजानाज्ञासीदित्यर्थः॥ अक्षेत्रज्ञ। आक्षेत्रज्ञ। आनैश्वर्यं अने
श्वर्यंअकौशलंआकौशलंअचापलंआचापलेन॥ अनैपुणंआनैपुणंअनशौचेनआशौचेत्यत्रनञइत्यादिना उत्तर
पदवृद्धिःआदेस्तुनभोवा॥ शालिनीछंदः॥ श्रीः॥ किंकौरुजंगल्युतवैश्वधेनवीनकौरुजंगल्युतवैश्वधेनवी॥ इयंहिसौ
वर्णवलज्यदोमृशंस्तरोरधःस्त्रींरुदतींददर्शसः॥ ४४॥ श्रीः॥ सभैमिस्तरोरधोरुदतींस्त्रींददर्शकीदृक्सन्अदएत
न्मृशंस्तस्यास्तथाविधरूपनपथ्यादिदर्शनात्परिभावयन्॥ तदेवाह॥ इयंस्त्रीकिंकौरुजंगलीकुरुसंबद्धाजंगला
निर्जलादेशाःकुरुजंगलास्तेषुभवाउतकिंवावैश्वधेनवीविश्वधेनादेशभेदभवाउताथवाइयंनकौरुजंगलीनापिवैश्व
धेनवीकिंतियंस्त्रीःस्फुटंसौवर्णवलजीस्कवर्णवलजपुरेभवा॥ इंद्रवंशावंशस्थयोरुपजातिश्छंदः॥ श्रीः॥ अथेत्यवा
चत्सपितववत्ससौवर्णवालज्यसिकिंसदुःखा॥ सौभाग्यदर्पादपसौत्हदेनसौहार्दिनीकिं विधुतासिपत्या॥ ४५॥ श्रीः॥

द्याश्रयसर्ग अथसराजापितेवभवोचत्॥तथाहि॥हेवत्ससौवर्णवालजिकिंकिमितिमङ्ःस्वासि॥किंचसौहार्दिनीस्कन्दस्क
२० त्हृदयस्यवेदंभावःकर्मवानस्यदमित्सणियुवाद्यणिवासौहार्दंपत्स्योप्रेमतइतीसत्यपिपत्या विधुतासिपराभूतासि।
यतःसौभाग्यदर्पादपसौत्हृदेनत्वय्यपगतस्नेहेन॥उपजातिश्छंदः॥श्रीः॥सौरसैंधवउसौत्स्नागरोवानुशाति
८ किरपारलौकिकः॥त्वांनडुर्व्रतिकआग्निवारुणींगामिवहविनिहंतुमाहरत्॥४६॥श्रीः॥उद्दे वत्समेसुरसिंधोः गंगायाः
समीपादेशापिसुरसिंधुः वाराणसी तत्रजातः कोपांत्याच्चाणित्यणि सौरसैंधवः सौत्स्नागरोवासुत्स्नगरेभवः एतद्दरोभ
वोत्युतिदांभिकाभववीतिदाभिकद्दत्यर्थः कोपिदुर्व्रतिकोदुष्टव्रतीकापालिकादिदुर्विद्यासाधनायत्वांविनिहंतुमिह
स्थाने आहरन्न किमानिनायन अत्रलोकभाषयाकिमर्थयतः कीदृगनुशातिकिः अनुशातिकस्य। चारस्यापत्यंकुल
कमागतचौरिकाबलेनहरणकुशलस्येइर्थस्तथापरलोकः प्रयोजनमस्य पारलौकिकः तथा अपारलौकिकः स्त्रीवध
महापापस्यचिकीर्षुत्वनपरलोकानपर्क्षायथासौरसैंधवः सौत्स्नागरोवाकोपिऋत्विगग्निवारुणीमग्निवरुणद
वतांगां अनडुहीं विनिहंतुं यागेयूपसमीपआहरति असाध्यराजयक्ष्ममहाव्याधिनिवर्तनायाग्निवारुणीमनडु
वाहीमालभेतइतिश्रुतिः कौरुजांगलिः वैश्वधेनवी वैश्वधेनवी सौवर्णवल्कमी अत्रजंगलेत्यादिना पूर्वपदस्य
नित्यंवृद्धिः उत्तरपदस्यतुवासौहार्दिनी सौभाग्यसौरसैंधवः अत्रहृदित्यादिना उभयपदवृद्धिः बहुलाधिकारान्मि
त्रामित्रार्थयोः सुहृद्दुर्हृदूशब्दयोरप्रसौहृदेनेत्यपिस्यात् दौर्हृदमित्यपिज्ञेयं सौत्स्नागरः अत्रप्राचांनगरस्येत्युभय
पदवृद्धिः आनुशातिकः पारलौकिकः अनुशतिकादिनाउभयपदवृद्धिः रथाद्दनावृत्तं॥श्रीः सौमेंद्रमैंद्रावरुणं
हविर्नुकिंत्वाच्छिनत्कोप्यसुरश्छलेन ऐक्ष्वाकदारान्नुहिरण्मयेणनाभ्रौणहत्यक्षुभितादरौस्यः॥श्रीः॥किंकाप्य
९ सुरोदैत्यश्छलेनत्वांत्वामाच्छिनत्रूपातिशायमूढत्वेनबलादग्रहीत् यथासौमेंद्रदेवतंऐंद्रावरुणंचहविर्हव्यंका
प्यसुरः छलेनऋत्विग्भ्यआच्छिनत्ति यथावादशास्योरावणः ऐक्ष्वाकदारांरामभार्यांसीतांहिरण्मयेणनस्वर्णमृगेण
कृत्वाच्छिनत् यतः कीदृक् भ्रूणघ्नोभावोभ्रूणहत्यातेनक्षुभितोभीतोभ्रौणहत्यक्षुभितोनतथामहापापिष्ठइत्यर्थः
उपजातिः ४७॥श्रीः॥मैत्रेयवाकसारवाः पवित्रामनंतमांतिक्यनिजप्रियांत्वां॥अनंतियोप्यंतितमोत्रविध्वंसितुं
कुधैवत्यउतानिनाय॥४८॥श्रीः॥उताथवाकुत्सितंधैवत्यं धीवनः पाडित्यंसयस्यसकुधैवत्यः कुधीः पारदारिकस्त्वां
विध्वंसितुंविध्वस्तशीलांकर्तुमत्रस्थानेआनिनाय कीदृक्सन् अनंतियोपिशीलभंगहेतुत्वादंतिकेसाधुरप्यंति

तिनमः शीलभंगायातिशयेनांतिकः किंभूतांसतींत्वांमित्रयोरपत्यंमैत्र्यादित्वादेयञि मैत्रेयो मुनिस्तस्ययावाक्
तथासरख्यांभवंसारवंयद्वार्जलंतद्वत्पवित्रांसुशीलत्वेननिर्मलां तथाअंतिकेनिकटेनतथानंतिमः शोषितत्वादिनादूर
स्थः अंतिकोनिजप्रियोयस्यास्तां॥श्रीः॥अप्यंतितोंऽतिकतएत्यनदैवमुत्काभूपेस्थितेंतिकतमेनिजबांधवेनु॥साथ्यां
तिषन्न्यगददंतिकसन्नृपांघ्रिद्वंद्वंस्त्रजिष्ठमिवदंतरुचादधाना ४९॥श्रीः॥अथांतिकेसीदत्यंतिकषत्निकटस्थासास्त्री
न्यगदद्भाषे कसतिभूपेकिंभूते अंतिकाद्दाहीयरुहोपादानेइतितसावंतितोपिनिकटादप्यंतिकेआद्यादित्वात्तसावंति
कतो अत्यंतंनिकटेइत्यर्थः एत्यागत्यतदैवमुत्कारीत्योत्कावस्थितेमौनमाश्रिते कस्मिन्निव अंतिकतमेअतिनिकटेनिज
बांधवेन्वतिनिकटमात्रकेपित्रादिस्वजनेइवेत्यर्थः कीदृक्सती सलज्जत्वेनाधोमुखंभाषणाद्दंतरुचारुत्वा अंतिकस
न्निकटस्थंनृपांघ्रिद्वंद्वंस्त्रजिष्टमिवबहूनांमध्ये अतिशायेनस्रग्वीव दंतकांतरतिविशदत्वाद्रतिप्राचुर्याच्चपूजाहेतुत्वाति
शायितपुष्पमालामिवादधाना॥वसंततिलका॥श्रीः॥बोधिसत्वमिवबोन्निभवंतंसुत्वचिष्ठनयऋज्ववदातं अस्त्रजी
यसि जनेस्त्रजयेत्कः कोत्वचीयसिवनत्वचयेद्वा॥५०॥श्रीः हेमहापुरुषभवंतंत्वांउत्वचिष्ठनया बहूनांमध्ये अत्यर्थंत्वग्वां
स्त्वचिष्ठसुष्ठुत्वचिष्टः सुत्वचिष्ठः तद्भावेनत्वचः सौम्यतादिश्रीविशेषणहेतुनाऋजुः सरलस्वभावः सचासाववदातश्चपा
पमलरहितश्चऋज्ववदातः यद्वाऋजूनिसरलान्यवदातानिउत्कृष्टरूपाकरणादीनिअद्भुतकर्माणियस्यतंबन्निकमि
वबोधिसत्वमिवबुद्धदेवतामिव आकृतिविशेषणापित्वां बुद्धदेवमिवलोकोत्तररूपार्जवादिगुणाधारंजानामीत्यर्थः॥
अमुमेवार्थंव्यतिरेकार्थांतरन्यासाभ्यांद्रढयति बताति कोमलामंत्रणे द्वयोर्मध्ये अत्यंतंस्रग्वीस्रजीयान्नतथास्रजीयांस्त
स्मिन्पुष्पमालारहितजनविषयेकः स्रजयेत्स्रग्विणमाचक्षीतवा यद्वा अत्वचीयसिविशिष्टत्वग्रहितेजनेकस्त्वचये
त्त्वग्वंतमाचक्षीत नकोपीत्यर्थः॥ सौमेंद्रं ऐंद्रावरुणं अत्रातोनेत्यादिना नोत्तरपदवृद्धिः सारव ऐक्ष्वाक मैत्रेय भ्रौण
हत्यधैवत्यः हिरण्मयइत्येते सारवेत्यादिनासाधवः अनंतिमः अंतिमः अंतिनः अनंतियः अंतिषद एते बांतमेत्या

दिनानोत्तरपदवृद्धिः सारवऐक्ष्वाकमैत्रेयभ्रौणहत्यधैवत्यहिरण्मयेत्यत्र सारवेत्यादिना साधवः अनंतमः अंतितमः
अंतितः अनंतियः अंतिषद एते वांतमेत्यादिना साधवः पक्षे अंतिकतमे अंतिकतः अंतिक्य अंतिकसत स्वजयेत स्वजिष्टः
स्वजीयसि त्वचयत सुत्वचिष्ठ नयात्वचीयसीत्यत्र विन्मतोरित्यादिना विन्मतोर्लुप ॥ स्वागता ॥ श्रीः ॥ कनयन्न चधर्ममथाकनीया
नथवाकनिष्टासि मनुः स्वयंसः यवयद्यविष्ठस्य यवीयसो ल्पिष्ठ जनंतथाल्पीयसि नाल्पयेत कः ॥५१॥ अथवा हे महापुरुषकनी
यान द्वयोर्मध्ये अत्यंतं युवा कनिष्ठो बहूनां मध्ये अत्यंतं युवा चातितरुणतम इत्यर्थो सि त्वं सोति धार्मिकत्वेन प्रसिद्धः स्वयं साक्षान्म
नु मनुर्ऋषिः को मनुरित्याह कनीयान द्वयोरल्पयोर्मन्वोर्मध्ये अल्पश्चाथवा कनिष्ठो बहूनां मनूनां मध्ये अल्पश्चावा स्वायंभु --१
स्वारोचिष २ उत्तम ३ तामस ४ चाक्षुष ५ परवत ६ वैवस्वत ७ सूर्यसावर्ण ८ ब्रह्मसावर्ण ९ रुद्रसावर्ण १० धर्मसावर्ण ११ दक्ष
सावर्ण १२ रौच्य १३ भैत्याख्या इति चतुर्दशमन्वर्थय आद्याः सप्तभूता अंत्यास्तु भाविनस्तेषु त्वं लघुतरो लघुतमो वा मनुर्भवसी
त्यर्थः ॥ यतः कीदृक त्वं एवंरूपालुत्वादिगुणैरघं पापं कनयन् अल्पीकुर्वन् अघा तथा धर्मं कनयन् युवानं कुर्वन् अमुमेवार्थम
र्थीत [illegible] बहूनां यूनां द्वयोर्मध्ये अतिय
वाननर कानयुवयवयुवाननाचक्षात स्यथः तथा [illegible]
त्वात्मेत्यादिना अयूनाः कत्वा पक्षे अल्पयत अल्पिष्ठः अल्पीयसि यवयत यविष्ठस्य यवीयसः ककिरवं छंदः ॥ श्रीः ॥ श्रेष्ठे
ज्येष्ठे श्रेयसि ज्यायसि त्वय्यात्मोत्क्रुशान द्राक्श्रयामि ज्ययामि ॥ साधीयः साधिष्ठ नेदिष्ठ नेदीयांसः श्रोतुः संतु तदुःखवेगाः
५२॥ श्रीः ॥ उद्वतः कृशोयेभ्यस्ते उत्क्रुशाः दुःखहेतवः आत्मन उत्क्रुशाः आत्मोत्क्रुशास्तान अहं त्वयि विषये द्राक् श्रयामि वचनस्फा
तिस्फुटसत्यत्वेन प्रशास्यं यथास्या ■■ दवमाचक्षे तथाज्ययामि वचनस्यातिमहत्वात वृद्ध यथास्याद् एवमाचक्षे च प्रशास्यशब्दात
वृद्धशब्दाच्च क्रियाविशेषणादत्र णिजयतः किंभूते त्वयि श्रेष्ठश्रेयसि च महापुरुषत्वेनातिप्रशस्ततमे इत्यर्थस्तथा ज्येष्ठज्याय
सि च अत्यंतं गुणैर्वृद्धतमे इत्यर्थस्ते नश्च श्रोतुर्मदीयोत्क्रुशानाकर्णयतः सतस्ते तव महापुरुषत्वेन परदुःखदुःखितत्वाद् दुः
खवेगाः कष्टसंभाराः संतु कीदृशाः द्वयोर्मध्ये अतिबाढाः साधीयांसो बहूनां मध्ये अतिबाढाः साधिष्ठास्तथा बहूनां मध्ये अत्यं
तिकानेदिष्ठा द्वयोरत्यंतिका नेदीयांसो विशेषणकर्मधारया नेन तथा अतिगाढतमा अतिनिकटतमाश्चेत्यर्थः ५२ शालिनिछंदः
प्रेमनेदयति साधयितोक्तः प्राययन्सबरिमहगरीयान त्वां त्रपिष्ठमहमत्रपिमाणं हीकरोम्यगरिमाचपयंती ॥५३॥ श्रीः ॥
गरीयान द्वयोर्मध्ये अत्यंतं गुरुत्वयुक्त उक्तेर्वचसः साधयिता बाढमाख्याता अत्रापि क्रियाविशेषणाद्वा टार्णिच ॥ अत्यंतंव
कापुमानिह जगति प्रेमप्रियभावं प्रीतिं करोति कीदृशं सबरिम वरिम्णा उरुत्वेन सह यत तत्सबरिम ● महत यतः कीदृशः
प्राययन प्रियमाचक्षाणः यो हि गरीयान वक्तास्यात्स सुखदो किंभिर्जगतो महतीं प्रीतिं निष्कर्दीकरोतीत्यर्थः अहं त्व गरिमा
स्त्रीत्वेन गुरुत्व रहिता अत्रपिमाणं त्रपिम्णा दुःखनरहितं त्वां हीरखेदे अत्रपिष्ठं महापुरुषत्वेन दर्पणवन्निर्मलत्वाच्चिन्त
स्व दुःखसंक्रमणनातिदुःखितं करोमि यतस्त्रपयंती न्रपस्व दुःखमाचक्षाणा दुःखभणनेन सज्जनजनस्य दुःखकारिणं त्वं

त्रणिंयदुःखहेतुनाह ॥ श्रीः आसीत प्रेयान मनिवृंदिष्ठ वृंदीयान स्त्री प्रेष्ठः स्फेष्ठ बंहिष्ठकांतिः ॥ स्फेयो द्राघिष्ठेक्षणश्रीर
तिस्थेयो वर्षीयान श्रेष्ठ वर्षिष्ठ बुध्या ॥५४॥ हे अति वृंदिष्ठ महापुरुषत्वेनातिप्रशस्य मे मम प्रेयान् भर्ता आसीत कीदृक स्फेष्ठो
तिस्फिरो स्युपचितो बंहिष्ठाति बहुलकांतिः लक्ष्म्या युत्कर्षजनितादीप्तिर्यस्य सः तथा स्फेयसी अत्युपचिता द्राघिष्ठा दीर्घा ईक्ष
णश्रीर्यस्य सोतिरूपपात्रमित्यर्थः तथा श्रेष्ठोतिस्थिरो वर्षिष्ठा वातिवृद्धा या बुद्धिः तया कृत्वा अतिस्थेयो वर्षीयान स्थेयान अति
स्थिरप्रकृतिः यो वर्षीयान अतिवृद्धः तमप्यतिक्रांतो नान एव वृंदीयानतिप्रशस्यो न तएव स्त्री प्रेष्ठ स्त्रीणामतिप्रियः ॥ शालिनी छंदः
द्राघीयो बंहीयो वाणिज्यैर्गरिष्ठो लक्ष्मीं सोस्थेम्नीं स्थापयन स्फाययंश्च दध्यौ रात्रौ निर्बंहिम द्राघिमायां वर्षिम्ना नाप्यपि त्रपीया
न कदाचित ॥५५॥ सममप्रियो वर्षिम्णा वार्धक्येना नाप्यपि युवा युवापि त्रपीयान बहुलक्ष्मी रक्षाचिंतया अतिदुःखी सन कदाचि
त निर्बंहिम द्राघिमायां बंहिष्ठो बाहुल्यात द्राघिम्णो दीर्घत्वाच्च निष्क्रांतायां जोषायामित्यर्थः रात्रो दध्यौ चिंतितवान कीदृक द्राघीयां
स्यतिदीर्घाणि बंहीयांसि चाति बहुलानि यानि वणिज्यानि वणिक्कर्माणि व्यवहाराः तैः कृत्वातिगरिष्ठो अतिगुरुरत एवास्थेम्नीं स्थे
म्नास्थैर्येण रहितां स्वभावचपलामित्यर्थः लक्ष्मीं स्थापयन स्थिरां कुर्वन स्फाययंश्चोपचितां कुर्वन्श्च ॥ वैश्वदेवी ● छंदः ॥ श्रीः ॥
बंहयेच्च गरयत्त्रिपयेद्वा यार्थमक्षमसलोभनृपोर्व्यां ॥ द्राघयेत सवरयेत स्थिरयेच्चानर्थमक ■■■ मवरिष्ठमनीषः ॥५६॥
अक्षमः पालयितुमशक्तः सलोभश्च लुब्धो यो नृपस्तस्य या ऊर्वीतस्यां यो नरोर्थद्रव्यं बहु व्यवहारादिभिर्बंहयेच्च बहुलं कुर्यात
स चोर्वीसदृशिभिर्नृपेण वार्थस्य हरणात एकं कवलमनर्थं द्रव्याभावं कष्टं वा द्राघयेद्दीर्घं कुर्यात वरयेऊरु कुर्यात स्थिरयेच्च कीदृक
सन्न ● वरिष्ठा अत्यंतमरुरुरमहत्तमा मनीषा यस्य सः निर्बुद्धिरित्यर्थः ॥ स्वागता छंदः ॥ स्वानि वर्षयितुमेषु वृंदयन शरद्सु
वृंदिम सुवीक्ष्य आत्मनः आपदं क्रशिमदां वरीयसीमक्रशिष्ट विभवाक्रशीयसः ॥५७॥ स्वानि द्रव्याणि वर्षयितुं वर्धयितुं वृं
दयन वृंदारकं प्रकृष्टं कुर्वन्नथ दात्मानमनेक व्यवहारैः प्रकर्षेण द्रव्याणि वर्धयन्नित्यर्थः अहमात्मनः स्वस्य क्रशिमदां कृशत्व
दायिकां दारिद्र्यदामित्यर्थः वरीयसीमतिमहतीमापदं सर्वस्वापहाररूपां वीक्ष्य संभावनायामिक्ष एषु शरद्सु सामीप्यके सप्तमी

यंयद्दृशधुनोष्यते तेषांमनः स्वस्थत्वेनप्रत्यक्षाणांसमीपेदृत्यर्थःज्ञायते शंदिमसुशंदिम्नाप्रशस्यत्वेन रहितेष्वसामर्थ्यलोभातिरे
कादिनानिकृष्टेष्वित्यर्थः आत्मनश्चकीदृशःस्यातिकशिष्टा अरूशतमोयाद्र्व्यंतेनाकशीयसोमहत्तमस्य॥ रथोद्धता॥ श्रीः॥ उरुप्र
नभ्रशिष्ठान भ्रशयन भ्रशीयान्रथान प्रतिष्ठान प्रथयन प्रथीयान॥ वृषान बढिष्ठान बढयन् बढीयान सुगाढिदेशेव वतः सआगा
त॥५८॥ ततः स्वस्यमहापत्संभावनाकरणानंतरं समस्थियः सुराष्ट्रदेशगुर्जरत्रायामागात कीदृकसन् भ्रशिष्ठानतिभ्रशानुष्ठान
भ्रशयन शीघ्रान कुर्वन् यतो भ्रशीयानुत्सुकः तथा अतिपृथून्रथान प्रथयन अतिबहुत्वेनसर्वप्रथिनान कुर्वन् यतः प्रथीयान्महत्श्चा
अतिपृथुस्तथातिदृढान साधमानान वृषान साधमानान् कुर्वन्यतो अतिसाधमः॥५८॥ सभीं प्रदिष्ठं प्रदयन प्रदीयान लक्ष्मीद्रढिष्ठान द्रढ
यन्द्रढीयान ॥ परिव्रढीयान सुपरिव्रढिम्नासहा● नयत्सव्रदिम भ्रशिम्ना॥५९॥ श्रीः॥ अतिशयेनास्मि यस्तेन उत्साह प्रकर्षानितेनसुप
रिव्रढिम्ना सुप्रभुत्वेन कीदृशां द्रढीयान अत्यंतंबलीउपचितो वा तथाद्रढिष्ठामत्युपचितां लक्ष्मीं द्रढयन वृद्धिरक्षादिना बलिष्ठा मुपचितां
वा कुर्वन अतएव परिव्रढीयान अतिपरिवृढोनकंजनस्वामी॥५९॥ श्रीः॥ सपरिव्रढयनपरिव्रढिष्ठं सद्रढिम ■ म्रदिमानमत्रभूपं॥
विभवं प्रथिमापहारशंकां कशयन भूयिष्ठात्क्षादभूयस्यत्संकं॥ समस्तपतिः स्वंधनं भूयिष्ठादतिबहोरपिस्वात्मकाशादभूयस्यदकं बणि
ज्येबहुत्वक्रे यतो विभवप्रथिमापहारशंकांकशयन कृशीकुर्वन मुंचन्नित्यर्थः एतदपिकृतइत्याह यतोत्र देशो नृपंपरिव्रढयन भास्व
व्यभवेननम्रं कुर्वन् किंभूतं सद्रढिमम्रदिमानं द्रढिम्ना प्रजारक्षासामर्थ्येन म्रदिम्ना च नितांभि■ त्वात्थनसदयहृदयत्वेनसहित
मतएव परिबाढिष्ठमुत्तमप्रभुं॥ उपच्छंदसकं॥ श्रीः॥ बंहयनस्वधर्मवसुभावयंश्च स्थवयन विलासान सुखभूम्नि मग्नः॥ कुधियां द
विष्टाविपदां दवीयानसनिनायभूयः समयं यवीयान॥६१॥ यवीयानतियुवासमस्पतिः भूयः सुमयमतिबहुकालं निनाय निन्येक्रमे
कीदृकसन कुधियां मुखाणां कुत्सितानां वा दविष्ठाः तिदूराः अतएव स्वधर्मं बंहयन बहु कुर्वन तथा वसु द्रव्यं भावयंश्च बहु कुर्व
वि
श्चतथाविलासानश्रंगारचेष्टाविश■रोषानस्थवयन उप■तीकुर्वन् यथावसरं धर्मार्थकामानसेवमानइत्यर्थः अतएव च सुख
भूम्निसुखबाहुल्ये मग्नः कंकिरवंछंदः॥ अस्थवीयदृहसोस्थविष्ठधीः क्षोदयध्ववयदन्ययोवतं॥ क्षपयस्त्रदवयन्नजीजनदत्सो
य
पमंमयि यविष्ठ आत्मजं॥६२॥ श्रीः॥ सुविष्ठो अतियुवा मत्पतिरिह देशेवसनस्त्वोपममात्मतुल्यमात्मजं मय्यजीजनत कीदृकसन
नस्थविष्ठधी अस्थूलबुद्धिर्दीर्घदृष्टिरित्यर्थः॥ अतएव अन्यया वतंदवयन दूरीकुर्वन परदारसंगंवर्जयनदूरीकुर्वन्नित्यर्थः कीदृ
शं अस्थवीयारुशागंरूपशत्रमित्यर्थः तथाक्षोदयतवयतक्षपयन्न असतीत्वनक्षुद्रान नटविटादीनन्यूनस्तनस्तरुणानक्षिप्रां
श्चासाधुमानाचक्षाणं रथोद्धता॥ श्रीः॥ अक्षोदीयानद्रढसिष्ठ■हर्षविदध क्षेपीयोमहोत्सवं॥ सद्रसिमक्षोदिमशातनंद्रसी
यः क्षोदिष्ठानामप्यथार्थदानैः॥६३॥ अथपुत्रज■ मानंतरं समत्पतिः क्षेपीयातिक्षिप्रंमहोत्सवं विदध कीदृशांद्रसीयः क्षोदिष्ठाना
मपिद्रसीयांसो अतिद्रस्वा अतिलघवः अतिदरिद्रा इत्यर्थः तथाक्षोदिष्ठा अतिक्षुद्रा अतिनृशंसा व्याधादयो हंहं ते पाम व्यसनां●

द्रस्वमात्राः क्षुद्रमात्राश्चेत्यप्यर्थेर्थिदानैर्द्रसिमक्षोदिमशातनं द्रव्यस्यातिबहोर्दानादतिदरिद्राणामपि अतिनृशंसानामपि च दरि
द्रत्वनृशंसत्वयोः विनाशकमित्यर्थः यतः कीदृकसन् क्षुद्रो दरिद्रः कृपणश्च असंतंक्षुद्रः क्षोदीयान्न तथा ईश्वर उदारश्चेत्यर्थः
तथाद्रसिष्ठः हर्षगुरुत्तमानंदः उपछंदसकापरांतिका॥ श्रीः॥ स्थवयामियवयामिशिशुंक्षेपिष्ठमित्यद्रसिष्ठनाशयत्तिः॥ क्षेपि
मोपनतसत्यसिष्ठत्वाभ्यहृदयमहंनहिपुत्रं॥६४॥ अहं पुत्रंनहिनैव अभ्यदूरयं सदा स्वसमीपस्थमकार्षमित्यर्थः कीदृकसतीक्षे
पिष्ठं अतिक्षिप्रंयथास्यादेवंशिशुं स्थूलयामिस्थूलं करोमितथातथा युवयामियुवानं करोमि इत्येवं प्रकारेण अद्रसितास्नेहातिरेका
दद्रस्वीकृता विपुलीकृता शार्यो हर्निर्मनोरथो ययासा तथा प्रकृष्टा पयस्विनी पयसिष्ठा तस्याभावः पयसिष्ठत्वं क्षेपिम्नाक्षिप्रतं या
पनतंस्वयंढौकितंसन्नीरोगत्वपुष्टीकृत्वादिना शोभनं पयसिष्ठत्वं यस्याः सा अतिस्नेहात्स्वयंप्रभूत प्रचुरस्थारुस्तनेत्यर्थः स्वागता॥
सुतं करिष्ठंकरयंत्ययर्थयंकरीयसीस्वंपयसीयसीस्वयं॥ पतिंवसिष्ठंवसयंत्यदंकदाप्यानायवांनत्पराः पयीयसीः॥६५॥ अहंसुतं
स्तन्यपानादिना वर्धयं कीदृशी कर्त्ताजनको अस्त्यस्याः कर्त्तमती प्रकृष्टा कर्त्तमती करीयसी प्रशस्यपितृत्वं शोसर्थो यद्वा प्रकृष्टं कर्त्तारम
व्यकाला परिरक्षणादि बालकोचित क्रियाणां विधातारं करिष्ठंस्वं सुतं करयंती कर्त्तारमाचक्षाणा ततदनुकूलाचरणेन कर्त्तारं कुर्वाणेव यद्वा
करिष्ठं प्रकृष्टजनकवंतं कर्त्तारं वा पुत्रस्य जनयिता स्वमात्मानं करयंती कर्त्तमंतं कर्त्तारं वा चक्षाणा नहि न पुनरपरान्या पयीयसीः अति
पयस्विनीः पुत्रस्तन्यपानार्थं कदाप्यानाययां कीदृक्सती वसिष्ठमत्यंतं वसुमंतं अतिद्रव्याढ्यं पतिं भर्तारं वसयंती वसुमंतमाचक्षाणा
ईश्वरोयंवा बहुद्रव्यं वा दास्यति पुत्रस्य स्तन्यपानाय स्वपतिमत्याढ्यं भणंतीत्यर्थः यतः स्वयमेव पयसीयसी अतिपयस्विनी॥ वंशस्थंइदं
शयोरुपजातिः॥ श्रीः॥ स्नेहेनमां पयसयन वसवीयसश्च पुत्रो भवत्सतु जनैर्भशमितत्यर्कि॥ एष प्रपावसवयत्सयपज्जनानां चके प
यिष्ठवसविष्ठशुभावसीयान॥६६॥ सतु स पुनर्बालकः जनैर्भृशमतर्कि कथमित्याह एष बालको वसीयान् अतिवसुमान सन् प्रपाश्च
के पूर्वनवेभकारयदित्यर्थः कीदृशीः पयिष्ठाः शीतलसुरभिसुस्वादुजलहर्णघटत्वादतिशयेन पयस्विन्यो वसविष्ठा विशिष्टोपभोग्य
गवाक्षोपवनपुष्पवनवीनच्छायादिमहर्धिकत्वेनातिवसुमत्यः शुभा मनोज्ञाः स्ताः कषांकृते वसवः यत्सयपज्जनानां वसवयतः प

यथनः जगाम वसुमतीः पयस्विनीश्चावक्षाणा येन नास्त पांग वाक्षादिभिर्महर्द्धिकाः सुपयः पूर्णाश्च प्रपाः कृसंनीत्सुपभोगछ्या वरतां
लोकानांनिमित्तमित्यर्थः॥ कुतएवंविन कइत्यादपनः स्नेहेन मां पयसयन पयस्विनीं कुर्वन तथाच सतीया सोमदत्यस्य पुत्रश्चाभवत
श्रयामिश्रेष्ठश्रेयसीत्यत्र प्रशास्यस्यश्रइतिश्रः ज्यायामिज्येष्ठ अत्रवृद्धस्य ज्यइतिज्यः प्रशास्यस्यतुज्यादेशोदाहरणंस्वयंज्ञेयं ज्यायसमिति
ज्यायानितिनिपात्यं साधयिना साधिष्ठ साधीयः नेदयति नेदिष्ठः नेदीयांसः अत्रबाढस्यादिना साधनेदौ प्रियः प्रेम प्रापयन प्रेष्ठः प्रेयान
स्थिर अस्थेमास्थापयन स्थेष्ठः स्थेयः स्फिरः स्फायन स्फेष्ठस्फेयऊरु वरिम वरयन वरिष्ठ वरिमा वरीयसीं गुरु गरिमा गरीयान गरिष्ठः
बहुल बंहिम बहयन बंहीयः तप्र त्रपिमाणं त्रपयंती त्रपिष्ठं त्रपीयान दीर्घद्राघिमायां द्राघयन द्राघिष्ठद्राघीयः वृद्ध वर्षिष्ठ वर्षिम्ना
वर्षयितुं वर्षिष्ठ वर्षीयान वृंदारकः वृंदिमसुवृंदयन वृंदिष्ठ वृंदिन अत्रप्रियस्थिरेत्यादिनाप्रादय आदेशाः कश्चित्तु करोत्सर्वेणोभाषादेशो
नेच्छंति॥ तन्मते प्रिययेत स्थिरयेत प्रथिमा प्रथयन प्रथिष्ठान प्रथीयान म्रदिमानं म्रदयन म्रदिष्ठां म्रदीयान भ्रंशिम्ना भ्रंशयन भ्रंशि
ष्ठान भ्रंशीयान कृशिम कृशयन कृशिष्ठ कृशीयसः द्रढिम द्रढयन द्रढिष्ठां द्रढीयान परिवृढिम्ना परिवृढयन परिवृढिष्ठं परिवृढीयान
अत्रपृथुम्रदित्यादिना ऋतोरः केचित्तु ऋशब्दस्यापीच्छंति वढिम वढयन वढिष्ठान वढीयान अत्रपृथुम्रदित्यादिनाः भूयि भूयित भूयि
ष्ठादित्यत्र बहोर्णीभूयिति भूयणो केचिद्विकल्पमाहुः अभ्रयत बहयन बहोर्णेभाविति कश्चित॥ भावयन भूयः भूमी त्यत्र भूरित्या
दिनाभूद्रत्यादेशाः ईयसिमनो श्वेवर्णस्यलुक् स्थवयत स्थविष्ट स्थवीयः दवीयान दविष्ठः दवयत दवीयान यवयत यविष्ठः यवीया
नू ह्रसिम ह्रसितह्रसिष्ठ ह्रसीयः क्षेपिम क्षेपयत क्षेपिष्ठं क्षेपीयः क्षोदिमः क्षोदयत क्षोदिष्ठान क्षोदीयान अत्रस्थूलदूरेत्यादिना अंत
स्थादेरवयवस्य लुकू नामिनश्चगुणः केचित स्थूलदूरयुनां करोत्सर्वेणा नेच्छंति स्थूलयामि अभ्यहरयं युवयामि करयंनी करिष्ठं क
रीयसी पययत पयिष्ठ पयीयसीः वसयंती वसिष्ठं वसीयान अत्रत्र्यादिना त्रप्रत्ययांतस्यांत स्वरादेश्चावयवस्य लुकू विमतोर्लुपि
अनेकस्वरस्यांत्यस्वरादेर्लुर्वैविकल्पेनेच्छंत्येके लुगभाव पक्षेणो गुणंचेच्छंति पययत पयसयत पयिष्ठ पयसिष्ठत्वा लवीयसीः प
यसीयसीयसी वसयंती विसवयत वसिष्ठं वसविष्ठ वसीयान वसवीयसः वसंततिलकाछंदः॥ श्रीः मालपन स्रजयिता स्रजीयसीम

स्रजिष्ठपितरंचस्मितैः॥ दांडिनायन उ हास्तिनायनो वाशिनायनिरुते स्पलक्षिसः॥६७॥ उहे महापुरुष सबालकः सौभाग्यादिगुणैः शु
द्ध ब्राह्मणवंशजातत्वेन चालक्षितो केरशांकि कथमित्याह किमयं दांडिनो हास्तिनो वाशिनो वाऽपत्यं बालक इति कीदृशो लपन्नल्प
कमधुरंभाषमाणः सचसुस्मितैः हत्वा अस्त्रजीयसीमस्त्रग्विणीं नामस्रजिष्ट पितरं वास्रग्विणं जनकं च स्रजयिता स्रग्विणं कर्ता स्रजयि
ता स्रजिष्ठ स्रजीयसीं अत्र नैकस्वरस्य त्यस्वरादेर्नलुकू दांडिनायनः हास्तिनायनः अत्र दंडीत्यादिना अंत्यस्वरादेर्लुकूच वाशि
नायनिः अत्र वाशिन आयनास्ति जयिता स्रजिष्ठो विसंत्यस्वरादेर्नलुकू॥ श्रीः॥। जैह्माशिनेयान्निगमाध्वनीनात सामान्यकाथर्वणिका
स्वविद्यां॥ आपात्मनीनादथ सौत्वनाच्चादौरात्म्य सयौवनिकां तनूजां॥६८॥ सपुत्रो जैह्माशिनेयात ब्राह्मणपुत्रात सकाशात विद्यां प्राप
किंभूतात अज्ञातः सामनि सामवेदे सांत्वने वा साधुः सामान्यकोयमाथर्वणिकी अथर्ववेदज्ञस्तस्मात्तथा निगमेषु वेदेष्वथ ऋग्यजुषो
रध्वनीनो अध्वानमलंगामी यस्तस्मात चतुर्वेदी विद इत्यर्थः॥ तथात्मनीनाद्धाधार्मिकत्वेनात्मने हितात अथविद्याप्राप्त्यनंतरं आत्म
नीनात सौत्वनाच्च सुत्वनो याज्ञिकस्यापत्यात्सकाशात तनुजां पुत्रिकां प्राप किंभूतां अविद्यमानं दौरात्म्यं कुरूपत्व दुर्गुणत्वादिना दुष्टंस्व
रूपं यस्याः सा अदौरात्म्या यासयौवनिकां शोभनयौवनां जैह्माशिनेयादिस्त्वात्रयेत्यादिनांत्यस्वरादेर्लुग्न अध्वनीनाद आत्मनीनात
अत्रोनेध्वात्मनोरिति नलुक् आथर्वणिकात अत्रेकणीत्यादिना नलुक् यौवनिकां अत्र यनोकइ [illegible] नलुकू सामन्येत्यत्र अनोद्येयेइ
तिलुग्न आद्यइति किं दौरात्म्यं सौत्वनादित्यत्राणीतिलुग्न इंद्रवज्रा॥ श्रीः शांखिन गाथिन वैदथिनाथैः कौशिन पाणिन गाणिन मु
ख्यैः॥ गाणिनवादमदत्तसमैधावस्तनयोमममंक्षु मुदंच॥६९॥ मेधावो मेधाविनो अपत्यं मम तनयः संखिनो गाथिनो विदथिनः कै
शिनः पाणिनो गाणिनश्चापत्यै राचार्यैः सह गुणिनां पंडितानां मयं गोणिनो यो वादस्तमदत्त अत्यंतं शास्त्रवेत्तृत्वात अनेकाचार्यैः सह
पंडितवादं चकारेत्यर्थः तथा सर्वत्र जेतृत्वान्मम मुदं चादत्त शांखिनेत्यत्र संयोगादिन इतिलुग्न संयोगादिति किं मेधावः गाथिनः वैदथि
नः कैशिनः पाणिनः गाणिन इत्य[illegible] च गाथीत्यादिना लुग्न गोणिनेत्यत्र गाथीत्यादिना लुग्न गोणिनेत्यत्र अनपत्य इतिलुकून
अनपत्य इति किं मेधावः दोधकवृत्तंछंदः॥ श्रीः॥ पालानि बौक्षात प्रतिवादिनो जयन दुर्ब्राह्मणान वाम्नरहस्य वेधसो॥ सौषाम वत ब्रा

DR BHAU DAJI MEMORIAL

स्य युतोपि धीयुतोपि हेतनामो जितचाकवर्मणः॥७०॥ असोमसुतः यनियादिनो ब्राह्मणान् परिभवितुं कामबलेन दुष्टचित्तान् द्विजा
न् औक्षान् उक्ष्णां संबंधिनः पालान् इव पालकानिव गोपालानि वेत्यर्थः अजयत कीदृक्सन् ब्रह्मणइयं ब्राह्मी प्रज्ञा हेतु रौषधिः
प्रज्ञार्थं तस्या अभक्षणेन तया युतोपि धीयुतः स्वाभाविक प्रज्ञया युक्त इत्यर्थः अतएव सोपामेव सुपुम्णो अपत्यं सौपाम ऋषिस्तद्वद
ब्रह्मणः स्त्रहुरिदं ब्राह्मं यद्रहस्य मुपनिषच्छास्त्रं वेद ग्रंथस्तद्दर्शी अपूर्व अनिहेतनाम्नो हितनाम्नो ऋतनाम्नो ऋपेरपत्यं वदविदित
मतिक्रांतस्तथाजित चाकवर्मणः इंद्रवज्रा वंशस्थयो रुपजातिः॥ सयशोजित हेतनामनो मेधाविरूप्यमापधन्वापुः॥ कौथुम कालाप पै
व सर्पास्तिनल जाजल लांगलाश्च॥७१॥श्रीः॥ सयशोजित हेतनामः सन् मेधाविरूप्यं मेधाविनो भूत पूर्वं निधन आपत॥ यद्यशोनापुः कौ
थुमिना कलापिना च प्रोक्तं वेदं विदंत्यधीयते ते कौथुमाः कालापाश्च तथा। पैव सर्पिणः ऋषेः अपत्यानि पैवसर्पाः इहते तथा ते नलि जाजलि
लांगलिश्चाचार्य स्तदुक्ता ग्रंथा अपिउपचाराते शब्दे रुच्यंते तानधीयते ते नलिजा जाजल लांगलाश्च महा वैदिकाः अपच्छंदसकं॥श्रीः॥
सौपर्व युक् सौकरसभ्र शिष्य शैलाल शैखंड जित स्तुतोप॥ सा ब्रह्मचारास्य जनो गुणेना श्मोपि द्रवेत्सन्यदनाश्मनोयः॥७२॥ श्रीः॥ सुप
र्वणो पत्यं सौपर्व स्तेन युजा युक्तो या सौकर सभ्र शिष्याः शैलाल शैखंडाः सुकर सभ्रापत्यस्य छात्रस्य शिलालि शिखंडिनोरपत्यत्वतान् वैदि
का द्विजान् जयति यस्तस्य यद्वा किमत्र चित्रं यदस्य गुणेन सा ब्रह्मचारी जनस्तुतोप॥ यतो गुणेन कृत्वा अश्मोप्यश्म विकार वदति कठिन हृद
यः खलादि रपीत्यर्थः द्रवेत् आर्द्र हृदयो स्यात् यस्त्वनाश्मनो अश्म विकार तुल्यः स्नेहार्द्र चित्तः स्वजन मित्रादिसः कीदृक् सन् नि
तरां द्रुत एवेत्यर्थः औक्षानित्यत्र उक्ष्णो लुगि त्यंत्य स्वरादे र्लुक्॥ ब्राह्मेत्यत्र ब्रह्मण इति लुक् ब्राह्मीत्यत्र जाता विति लुक् इत्येणसिद्धे
जाता वनपत्ये एवेति नियमार्थं वचनं तेनोत्तरसूत्रेणापत्ये लुग्न ब्रह्मणो अपत्यानि ब्राह्मणान् सौपामेत्यत्र अवर्मणो अपत्ये
इति लुक् अवर्मण इति चाकवर्मणः हेतनामनः अत्र हितनाम्नो वेति वा लुक् मेधाव अत्र नोपदस्येत्यादिना लुक् मेधावः अ
त्र नोपदस्येत्यादि ना लुक्॥ अपद इति किं मेधाविरूप्यं कालाप कौथुम तैतल जाजल लांगलाः शैखंड शैलाल सा ब्रह्मचाराः पैवस
र्पाः सौकर सभ्राः सौपर्वेत्यत्र कलापीत्यादिना लुक् आश्मः अनाश्मनः अत्र वाश्मनो विकारे इति लुक्॥ इंद्रवज्रा॥ श्रीः॥ सचार्म

कोशस्थगितास्य बाष्पोतिशौच संकोचइहानहंयुः॥ गुरोरपार्थक्यइवांघ्रिमूलादान्हं निनाय व्यहव्यहीनः॥७३॥ यथा व्यहीनो द्वाभ्या
महोभ्यामधीष्टो भृतो वा व्यहं द्वयोरन्होः समाहारं नयति तथा स मत्पुत्र आन्हं स्यादिभ्यो त्रिभ्यस्त्रि अन्हां समूहं निनाय अत्ययात॥ कीद
कू सन् चार्मश्चर्मणो विकारो यः कोशः प्रस्ताकार स्तेन स्थगितो यो सिस्वद बाष्पो बहिर्भूतो गुरुहृदयमध्यस्थः कुतइदमित्याह यतो गुरो
र्मातापित्रादेः पूज्यस्यांघ्रिमूलादपार्थक्य इव अपृथग्भूत इव ईदृगपि कुत इत्याह यत इह गुरोरंघ्रिमूले शुनो यं शौचोयः संकोचः सीता
दिना संकुचंत मतिक्रांतो विना तत्सत्वेन न न संलीनांगत्वा इति संकुचितइत्यर्थः चार्म कोशः शौचसंकोचः अत्र चर्मेत्यादिनांत्य स्वरादे
र्लुक् बाष्पः अत्र प्रायो व्ययस्येति लुक् प्रायो ग्रहणं प्रयोगानुसरणार्थं तेनेह न स्यात् अपार्थक्यः पदस्येत्येव अनहंयुः आन्हं अत्राने
ध्यह स्यादिनान्हो तो लुक् अनिनार्दीतिकिं व्यहीनः रात्र्यहरित्यादिना नेह द्विगोरन्हादिस्यद भन्वहमित्यादि प्रत्युदाहरणं स्वयं ज्ञेयं॥
उपजातिः॥ श्रीः विज्ञोथ वर्षस्य पिताविप न्नः शुक्राद्र वैष्येष सुतोपि दष्टः सांकृत्य दौलेय सदाक्षि चौडि कामंडलेयैः प्रतिबोधितो
पि॥७४॥ स्पष्टं किंतु शुक्राद्रवेष्या शोक सर्पिण्या सुतोपि दष्टोति शोकातुरो भूदित्यर्थः सांकृत्याद योमुनयः इंद्रवज्रा वृत्तं॥ श्रीः॥ यया
व भाग्यैर्मम पांडवेय जांबव्य बाभ्रव्य निभोथ धाम स्वायंभुवं शाबर जंबुकं नु समानकस्नेह नदीं विलंघ्य॥७५॥ अथ शुक्राद्रवेषी दशा
दशानानंतरं ममाभाग्यैरपुण्यैः सपुत्रः स्वायंभुवं स्वयंभुवइदं धाम ब्रह्मलोकं स्वर्गं ययौ कीदृक् पंडोरपत्यानि शुभ्रादित्वादेयणि पांडवेयो
पंच पांडवास्तथा जंबुवर्णा गौ जंबु तस्याः अपत्यं चतुष्पाद्भ्य एयजि जांबवेयो बाभ्रव्यश्च ऋषि बल विद्रत्वादिना तेर्नुतस्तुल्यः किंकृत्वाय
यो मातुरागतो मातृकीयः स्नेह सएव संततं प्रवाहित्वान्नदी तां विलंघ्याव गणय्येत्यर्थः यथा कश्चिन्नदीं मा●र्गसिंधुं विलंघ्य शाबरजं
पादेशे भव। सुवर्णादि कर्णीति कणि शाबर जंबुकं ग्रामं याति॥ उपजातिः॥ अध्यो दोष्को ध्वन्य धानुष्क सार्पिष्कोय इहाकस्मिकं या
तिनाशं॥ शाकृत्स्येषा शाश्वतिक्यं गयष्टिस्तद्दर्तिकं तां धारयिष्याम्य नाथा॥७६॥ यद्वा यद्यथा दौष्कः दोर्भ्यां तरितुमशक्यत्वात् अध्वा
वा कस्मिकमकस्माद्भवं नाशं याति विनश्यति यथावा अधानुष्को न धनुः प्रहरणो यः सार्पिष्कः सर्पिष्पण्यः स धनुः प्रहरणाभावात्सर्पिः
सद्भावाच्च सर्पिर्लुंठनाय निःशंकं चौर पाते नाध्वन्या कस्मिकं नाशं याति॥ यतो अशाश्वति की अशाश्वती तस्मात्तां विनश्वरमंगयष्टिं

अनाथा पति पुत्र रहिता सत्यहं किं धारयिष्यामि नैवेत्यर्थः ॥ विंशो अत्र विंशतेस्तोर्डिति तेर्लुक् दश दाशि चूडा चोडि बाका दित्यादिञ् ॥ इ
वर्णसांकृत्य गर्गादित्वाद्यञ् दुर्ग दौलेय द्विस्वरादनद्याद्य यण् अत्रा वर्णवर्णस्य च वर्णे वर्णलुक् कामंडलेयः दैवी विव सायां स्यास्य
ड इत्येयण् गवितु चतुष्पाद्भ्य एयञ् आंवैयेत्यत्रा कद्रु इत्यादिनो वर्णस्य लुक् अकद्रुर पांडोरिति किं काद्रवेयाश्च आदित्वा देयण् पां
डवेय बाभ्रव्येत्यत्रा स्वयंभुवोरित्यत्र ॥ अस्वयंभुव इति किं स्वायंभुवं क वर्ण मातृकं उवर्णञावर जंबुकं दौस दौष्कः इस सार्पिष्क
उस धातुष्कात् शाकुंको अत्र क वर्णत्यादिना अकस्येतो लुक् शश्वदकस्मात्प्रतिषेधः किं शाश्वतिको वर्षाकालेभ्य इतिकण् आक
स्मिकं अध्यात्मादिकण् शालिनी ॥ श्रीः ॥ अर्थं नृपो पुत्रमृतस्य गृण्हात्यर्थेपि नास्थेत्यपि गच्छ गच्छ ॥ माजल्प जल्पेति तदेति जल्पं
संगेस्व मुल्लं घयितुं प्रवृत्ता ॥ ७७ तदा सा स्त्री अगे रक्षे स्वमुल्लंघयितुं प्रवृत्ता कीदृक् सती जल्पंती किमित्याह अपुत्रः सन् यो मृतस्तस्य
र्थं नृपो गृण्हातीति हेतो रर्थेपि धनेपि विषये नास्था न ममाशास्ति तस्मादपि हे महापुरुष महे तुकातवापि कापा[redacted] पन्नोभूदिति त्वं म्य
गच्छ गच्छ तथा कोपि श्रोष्यतीति माजल्प माजल्पेति गच्छ २ माजल्प २ इत्यसकृत्संभ्रमे इति पदस्य वाक्यस्य च द्विरुक्तिः उपजातिः
आच्छिं ध्याच्छिं धीत्याच्छिद् प्राशमस्याः शोचं शोचं तामित्यवोचन्नृपः ॥ राजा यं तेर्थं न ग्रहीता ग्रहीता स्तोकं स्तोकं श्रद्दीयतां मह
चोपि ॥ ७८ ॥ स्पष्टं किंतु पाशांगल बंधन वस्त्रमाच्छिं[redacted]त्याच्छिं धीत आच्छिनत् भृशं बलात्कारेणोद्दालितवान् शोचं शोचमभी
क्ष्णं स्वं निंदित्वेत्यर्थः अयमत्र स्यो राजा अथवायं प्रत्यक्षो मल्लुक्षणो राजेत्यपि राज्ञाव्यंजितं न ग्रहीता ग्रहीता अविच्छेदेन सदा न ग्र
हीष्यति वैश्वदेवी ॥ श्रीः ॥ कुरुते कुरुते नमां दयां यन्नृपति र्मोक्ष्यति न परासुवित्तं ॥ स्थेयास्तत्पति पुत्रयोः प्रदातुं पयसः पुत्रि घटं
त्र घटं हि नित्यं ॥ ७९ ॥ यद्यस्मान्नृपतिरसौ[redacted] राजा सकल पृथ्व्याममार्या घोषणाकारित्वा दयां कुरुते कुरुते नमां भृशमभीक्ष्णमवि
च्छेदेन वात्यंतं कुरुते तत्तस्मात् परासुवित्तं मृतस्य द्रव्यं मोक्ष्यति तस्मात् हे पुत्रि पयसो जलस्य घटं घटं प्रत्येकमेकैकं घटं हि
स्फुटं हि नित्यं परलोकगतयोः पति पुत्रयोस्तर्पणाय प्रदातुं स्थेयाः द्रव्यापहार शंकां मुक्त्वा तयोः परेतकार्याणि कर्तुं तिष्ठेत्यर्थः
भृशं आच्छिं धीच्छिं धीत्याच्छिनत् आभीक्ष्ण्ये शोचं शोच मवोचत् अविच्छेदेन ग्रहीता ग्रहीतेत्यत्र भृशं त्यादिना द्विरुक्तिः

भृशादयश्च क्रियाधर्मा इति क्रियापदमेवात्र संबध्यते क्रियाविशेषणस्यापि क्रियात्वेनाध्यवसायात् भृशादियोगे द्विर्वचनं स्यात् ॥
यथा स्तोकं स्तोकं श्रद्दीयतां प्रोक्तं अवादेशिति किं कुरुते कुरुते नमां अत्र नमबादेशातिशायिकात्पूर्वमेव द्विर्वचनं पश्चात् तमबादि
रन्यथाद्यनियमः स्यात् पतिपुत्रयोः पयसो घटं घटं प्रदातुं अत्र नानेत्यादिना द्विरुक्तिः उपच्छंदसका ॥ श्रीः ॥ कुर्वत्यनिशं नमोन
मस्त्वं ज्येष्ठं ज्येष्ठमनु प्रसादयर्षीन् ॥ कतरा कतरा त्वदीयास्त्वनयोर्विपदेवं जनवाचि मास्मरोदीः ॥ ८० ॥ श्रीः ॥ हे पुत्रि अनिशं सदा
नमो नमोधिकं नमस्कारं कुर्वती सती त्वमृषीन् ज्येष्ठं ज्येष्ठमनु प्रसादय ज्येष्ठानुक्रमेण मुनीन् संतोषय द्रव्यापहार शंकां मुक्त्वा
सदा गुरुसेवादि धर्मकृत्यानि कुर्वित्यर्थः तथा त्वदीयास्त्वनयोस्त्वत्पति पुत्रयोः कतरा विपत् आधिर्विपत् आधिर्विपत् व्याधिर्विपदो
र्मध्यका मृत्युहेतुर्विपदभूदित्यर्थः ॥ एवं प्रकारेण जनवाचि लोकस्य प्रश्नवाक्ये सति तयोर्विपत्स्मरणेन मास्मरोदीः ॥ श्रीः ॥ कतमा
कतमानयोर्विभूतिः कतमन्निन्हुतमीश्वरत्वमस्ति ॥ कतमत्कतमत्प्रकाशमेवं न खलु प्रक्ष्यति पुत्रि राजना त्वां ॥ ८१ ॥ स्पष्टं किंतु अन
योस्त्वत्पतिपुत्रयोः कतमा कतमा विभूतिरस्ति किं रत्नसंबंधकृता उत स्वर्णरूप्यादि संबंधकृता आहोस्विदुभय संबंधकृतेत्यर्थः ॥ निन्हुतं
गुप्तं निधानीकृतमित्यर्थः ॥ ईश्वरत्वमैश्वर्यं विभूतिरित्यर्थः ॥ राजना राजपुरुषः नमो नमः ज्येष्ठं ज्येष्ठमनु प्रसादयर्षीनित्यत्राधिक्येत्या
दिना द्विरुक्तिः ॥ त्वदीयास्त्वनयोः कतरा कतरा विपत् कतमा कतमानयोर्विभूतिः अत्र डतरेत्यादिना द्विरुक्तिः स्त्री ग्रहणं किं अनयोः
कतमदीश्वरत्वं अन्ये तु डतर डतमाभ्यां स्त्रीलिंगाच्चान्यत्रापीच्छंति अनयोः कतमत्कतमदीश्वरत्वं ॥ श्रीः ॥ प्रथमं प्रथमं पुत्रि मास्म भुं
क्थाः पूर्वं पूर्वं भोजये र्गुरूंस्त्वं ॥ अनुपाप्लवमायुरभ्यतीयाः प्रशमं संसंश्रयंत्यखंडं ॥ ८२ ॥ हे पुत्रि प्रथमं प्रथमं पुत्रि गुरुभ्यः पूर्वतरं
त्वं मास्म भुंक्थाः किंतु पूर्वस्मात्पूर्वतरं गुरून् भोजय राजोपद्रवाभावेन राजोपद्रवाभावेन प्रभूतं स्वधनं गुरुभोजनादिना धर्मकार्येण
सफलयेरित्यर्थः तथा नास्त्युपप्लवो राजादिकृतो धनापहारादि रुपद्रवो यत्र तद्यथा स्यादेवमखंडं रक्षादराबुल्लवनादिना पत्न्यो
रकरणेन परिपूर्णं निष्कलं चायुः अभ्यती यायगमयेः कीदृक्सती प्रशमं उपशांतिं शोकोपशमनेंद्रियजयेन च मनः समाधायेत्यर्थः
संसंश्रयंती उपच्छंदसका ॥ उप[illegible]र्युपर्याति मिमामथोभ्यैः सदृश्यमुद्दोध्यतरून धोधः ॥ चिकीर्षुरध्यध्युपकारमार्तमार्तं च पातास्वग

द्वान् जगाम ॥८३॥ अथ स राजा तरून्‌ अधोधो वृक्षाणामासन्नः सन् स्वगृहं समीपं जगाम गृहाः पुंसि च भूम्न्येवेति गृहस्य पुंस्त्वं किं
कृत्वा आर्तिमुपर्युपरि धनापहारशंकोत्थस्य दुःखस्यासन्नामिमां क्षिप्रमित्यक्त्वा रीत्योच्चैरत्यंतमुद्वोध्य संबोध्य सुस्थीकृत्येत्यर्थः
यतः कीदृग् आर्तमार्तं दुःखितं दुःखितं पाता ॥ दुःखेभ्यो रक्षिता तथा आर्तमध्यध्युपकारमुपकारस्यासन्नं समीपं चिकीर्षुश्चोपचिकी
र्षुरित्यर्थः ॥ उपजातिः ॥ श्लोः ॥ पुरे पुरे स्वस्य हृटापहृत्या सुतो सुतो दुःस्थ इति स्मरन् सः ॥ अथ प्रजानंदयिनेकएकाममात्यमेकैक
मितिन्यदिक्षत ॥८४॥ स्पष्टः किंतु स्वस्य द्रव्यस्यासुतो सुतो निष्पुत्रो निष्पुत्रः स राजा एकां एकां सर्वामित्यर्थः प्रजानंदयिताः सुतद्र
व्यस्य हृता स्वहृते निर्वारणे छ पा आल्हादयितासन्ने कैकममात्यं इति वक्ष्यमाणरीत्यान्यादिक्षत ॥ पूर्वं पूर्वं भोजयेर्युरून् प्रथमं प्र
थमं मास्म भुंक्थाः अत्र पूर्वेत्यादिना द्विरुक्तिः प्रप्रग्रामं अनुषोपप्लवं संसंश्रयती उदुद्वोध्येत्यत्र प्रोपेत्यादिनाद्विरुक्तिः तरून्‌ अधोधः अ
ध्यध्युपकारं उपर्युपर्यार्तिं अत्र सामीप्ये धोध्युपरीति द्विरुक्तिः क्रियया वीप्सायां आर्तमार्तं पाता गुणेन असुतोसुतो दुःस्थः द्रव्येण पुरा
पुरे सुनः अत्र वीप्सायामिति द्विरुक्तिः एकैकं अत्र लुप्त्वेत्यादिना द्विरुक्तिः एकस्या दीर्घ एकस्त्वस्त्वकस्यादेर्लुप् ॥ एकएकां अत्र वि
रामस्याविवक्षितत्वात्पुंवद्भावे सति संधिकार्यं न स्यात् ॥ उपेंद्रवज्रा ॥ श्लोः द्वंद्वं हीनाः संतु लक्षा मदीये द्वाभ्यां द्वाभ्यां कोटयो वाथ निम्नाः
ग्राह्यं वित्तं न त्वस्तनोः परासो रेत द्वंद्वं निर्दिशामो भवद्भ्यः ॥८५॥ अहो अमात्याः मदीये मदीये आयपादे यद्रम्मादीनां लक्षाः स्युस्ते
द्वंद्वं द्वंद्वं द्वाभ्यां द्वाभ्यां कोटिभ्यां निम्नाः हीनाः संतु नु परमस्तनोः परासोर्वित्तं भवद्भिर्न ग्राह्यं एतद्वंद्वं र द्वस्यं भवद्भ्यो निर्दिशामो त
वदामः शालिनीछंदः ॥ श्लोः ॥ ये द्वंद्वमत्राचतुरंत एव द्वंद्वं विभिन्नाम्तृतवित्तलुब्धाः ॥ द्वंद्वं प्रयुंक्ते य उ यज्ञपात्राण्यन्यः समस्तेन
तदस्मि शास्मि ॥८६॥ उ हे अमात्य अत्र भुव्याचतुर्भ्यः शरदारेरित्यत्र आचतुरं ये द्वंद्वं मैथुनाय द्वौ द्वौ भवंति माता पुत्रेण पौ
त्रेण प्रपौत्रेण न तु पुत्रेण च मैथुनं याति इत्यर्थः मृतवित्तलुब्धा मृतद्रव्याभिलाषुका नरास्त एव पशवा एव द्वंद्वं विभिन्ना द्वे शब्देन
पृथग्भूता एके मृतवित्तलुब्धाः मृतद्रव्यग्रहणस्य निंद्यतमकार्यस्य करणेन निर्विवेकत्वात् श्रृंगपुच्छपरिभ्रष्टा नररूपाः पश्‍
वः अपरे तु श्रृंगपुच्छादिमंत इत्यर्थः ॥ अन्यो मृतवित्तलुब्धेभ्यो अपरः पुनस्तेन तुल्यो यो याज्ञिको द्वंद्वं यज्ञपात्राणि प्रयुंक्ते यज्ञक्रि

यासु द्वे द्वे यज्ञपात्रे व्यापारयतीत्यर्थो मृतवित्ताभिलाषी तु पुण्यपात्रत्वात् श्लाघ्यतमत्वाच्च याज्ञिकतुल्यः स्यादित्यर्थः ॥ वत्तस्माद्वे नोरद्वंद्वं शा
स्मि मृतवित्तं भवद्भिर्न ग्राह्यमित्यादिशामि द्वंद्वं हीना इति द्वंद्वं वेति वा निपात्यं पक्षे द्वाभ्यां द्वाभ्यां निम्नाः रहस्ये द्वंद्वं निरिशामः मर्यादोक्तौ आच
तुरं ये ये द्वंद्वे युक्तौ तौ द्वंद्वं विभिन्नाः यज्ञपात्रप्रयोगे द्वंद्वं यज्ञपात्राणि प्रयुंक्ते अत्र रहस्येत्यादिना द्वंद्वमिति निपात्यते इंद्रवज्रा ॥८६॥ ॥ द्वंद्वं वि
विजित्य शिव वैश्रवणौ स्थितस्य वाच्यस्य तेथ न नकुर्म इति स्मनाहुः ॥ छायां दधुर्न खलु कालिककालिकां सज्जातीयबुद्धयउपाददिरे त दा
ज्ञां ॥८७॥ अथ ते अमात्या वाच्यसुराजत्वेन युक्तायुक्तं वकुमशक्यस्यापि राज्ञः पुरो न नकुर्म इति नाहुः स्म मनसा पीड्यमानत्वेन मृतवि
त्ताग्रहणाज्ञां नैव कुर्म इति नोचुरित्यर्थः ॥ कीदृशस्य द्वंद्वं शिववैश्रवणावत्यंतं सहचरौ शिवधनदौ विजित्यैवं परोपकारितोदाराचार्यत्वादि
ष्य गुणोत्कर्षेण पराभूय स्थितस्य वर्तमानस्य राज्ञो मुखदाक्षिण्यो नदं नोक्तं भविष्यति मनस्यरुच्या नु मुखं कृष्णं भविष्यति नेत्याह कालस्येव का
लिकायाः सदृशी कालिककालिका तां मनस्यरुच्या कृष्णां छायां मुखकांतिं च न खलु दधुः किंतु तदाज्ञामुपाददिरे गीन्वकुः ॥ यतः सती
प्रकारा अस्याः सज्जातीया तुच्छत्वेन स्वामिश्रुभाभिप्राये बहुमानिनीत्येन च शोभनौ बुद्धिर्येषां ते द्वंद्वं शिव वैश्रवणौ अत्र लोकेत्यादिना
द्वंद्वमिति निपात्यते अत्र न न कुर्म अत्राबाध इति द्विरुक्तिः कालककालिकां न वा गुण इत्यादिना द्विरुक्तिः अत्र चादौ स्यादेक्षुप्रसाच्चरि
तरिक्करणं प्रतिषिद्धस्य पुंवद्भावस्य प्रतिषेधेपि नार्थं तेनात्र कापातत्वात् पुंवद्भावप्रतिषेधपि रिनीति पुंवद्भावः वाग्रहणात्पक्षे जातीयर
पि सज्जातीया वसंततिलका ॥ इत्यादिशत्क्षितिपतिः स यथा प्रियप्रियेण व्यधुः सुखसुखेन तथा स्यमात्याः ॥ त्यागी प्रियेण परिपर्यमुतः सु
खेन दाताथवा परिबलेः क इति ब्रुवाणाः ॥ ८८ ॥ स क्षितिपतिर्भेमि यथा प्रियप्रियेण व्यधुः सुखसुखेन तथा स्यमात्याः त्यागी प्रियेण परि
पर्यमुतः सुखेन दाताथवा परियलेः क इति अक्लेशेनेति पूर्वोक्तरीत्या मृतवित्तग्रहणविषये अमात्यानादिशत्तथा हि तथैवामात्याः सुखसु
खसुखेनाक्लेशेन नृपादेशं व्यधुः ॥ कीदृशाः सतो भैमो रादर्ये अतिशयरजितश्चेन ब्रुवाणाः किमित्याह ॥ अमुतः परिपरि असंख्यसा
प्यपुत्रमृतद्रव्यस्यैवं लीलयैव मोक्षणाद मुं भैमुं विना प्रियेण सुखेन त्यागी दाता कोथवा बालः परिबलिविमासुखेन कोदाता भैमि
बलिं मुक्त्वा अत्र कोपि त्यागीत्यर्थ इति ॥ प्रियप्रियेण प्रियेण सुखसुखेन सुखेनेत्यत्र प्रियेत्यादिना वा द्विरुक्तिः ॥ श्लोः ॥ राजन् राजन् व्यधव

न्धवास्येकवीरः पृथिव्यां न्यायिन् न्यायिन् बुध बुध जाड्य प्राङ्नयं दुर्नियुंक्त सौजः सौजः खल खल कले वेत्स्य दोदुष्ट दुष्ट क्षुद्र ३ क्षुद्र
त्यजनिजनताबाद उच्चैस्तदानीं ॥८९॥ • तदानीमपुत्रमृतवित्तत्यागकाले उच्चैः कृतकृष्टो जनतावादो लोकोक्ति र्जनिकथमि
त्याह हे राजन् राजन् हे न्धव न्धव नराणां भर्तः कुमारपाल असि त्वं पृथिव्यामेकवीरः केनाप्यकृतपूर्वस्यापुत्रमृतवित्तत्या
गस्य करणान्निरुपमोदयावीरो दानवीरश्चेत्यर्थः ॥ तथा हे न्यायिन् न्यायिन् न्याय्यं न्यायं त्यज हे बुध बुध पंडितंमन्य दुर्नियुक्त दुष्टस्या
पुत्रमृतवित्तस्य ग्रहणेन दुष्टाधिकारिन् दुष्टामात्य प्राग्नयमपुत्र■मृतवित्तग्रहणरूपं प्राक्तमां नीतिं जहिहि त्यजेति तथा रे सौ
जः शौजो बलिष्ठ तथा सर्वैकपत्वाद्रे खल खल तथा रे दुष्ट दुष्टापुत्रमृतस्वापहारादिदोषयुक्तस्तथा लोकानां महाकष्टपातुक
त्वेन रे क्षुद्र क्षुद्र कलेः कलिकालाद तत्पदं पुत्रमृतवित्तत्यागलक्षणं त्वयि यशोजस्त्वादीनो निष्ठुर नराज्ञः सन्न्यायाचरितं वेत्सी
ति च संमतिः कार्यप्राभिमत्वं पूजनं वा तत्र राजन् न्धव न्धवास्येकवीरः पृथिव्यां ॥ अस्यायां न्यायिन् न्यायिन् बुध बुध जहि
प्राङ्नयं दुर्नियुक्त सौजः सौजः खल खल कले वेत्स्यदः कुत्सने क्षुद्र क्षुद्र ३ दुष्ट कले वेत्स्य रः संमतीत्यादिना द्विरुक्तिस्तत्र पूर्वो
कोस्वरेष्वंत्यस्वरः प्लुतो वा मंदाक्रांता ॥ दस्यो दस्यो हतक हतक पाप पापांग कूज अंगो कूजानुभवसि फलं त्वं स्वयं वेश्म याम
देवं खंडालयमकलयः सोपरेद्युः खसं प्रत्येवं प्रोचे प्रणिधिकथिते शीर्णकेदा•रहर्म्ये ॥१०॥ अपरेद्युः शीर्णभग्नं यत्केदारस्य शं
चारेः भोर्हर्म्यं तस्मिन् प्रणिधिकथिते केदारहर्म्ये भग्न■क्षितिकथितेत्यर्थः स भौमिः खसखसाः केदारसमीपदेशस्थाः क्षत्रियभेदाः ख
सानां राज्ञाप्यभेदात् खसस्त्वं खसराजं प्रत्येवं तर्जनाप्रकारेण प्रोचे तथा हि हे दस्यो दस्यो यात्रिकादिधनकस्माद् दे: पातकत्वेन चौरोत
एव रे पाप पाप अत एव रे हतक हतक ३ निंद्यतम अंगशब्दः संबोधने हे खस कूजो■ व्यक्तं शब्दं कुरु तथा गाः हे खसो त्कूज प्राबल्ये
नाव्यक्तं शब्दं कुरु केनाप्यनिष्टहीनत्वे नानिशं चौर्यादिपापकर्मणापार्जितप्रभूतविभूतिः धर्मेण अव्यक्तान् फलकलारावान् कुर्वि
त्यर्थः परमनेकुकर्मणः फलमनुभवसि■ त्वं सत्सामीप्ये सहं दतिभविष्यति वर्तमाना अधुनैव त्वां निग्रहीष्यामीत्यर्थः तथा हे
खस विनयादिधर्माचार■भ्रष्टात्स्वयं वेश्मग्रहं यामि आश्रयसि देवं केदार खंडो विस्तीर्ण आलयः प्रासादो यस्य तं तथा कलयो
ष्ठं वस्त्रि गंधस्नानमभोजनं रत्यौषधपरान्नानि श्राद्धकृत्सप्त वर्जयेत् ततश्च स्वपितृश्राद्धकृतो ब्रह्मचर्यं विदधति
अत एवोपमाद्वारेणोक्तं मघासु ब्रह्मचर्यवदिति तथा च मघासु पायसमेव श्राद्धं संकल्परूपं क्रियते तथा चापि तृसंहिता
यां पितृवचः अपिनः सकुले जायाद्यो नो दद्यात्त्रयोदशीं पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु चेति उत्सुकाः कर २

दानेन बद्धाः कृष्याः पशुष्वपि व्रीहीन् द्विद्रोणान् द्विद्रोणान् द्विद्रोणेश्च तिलान् ददुः २० कृत्रानदी कर्षणे पशुष्वपि गोमहिष्यादिष्वपि बद्धा नि सप्रसक्ता
अत एव करदानं कृषिवशाधारणादिकृतराजकीयमस्तु पनागहतुका राजग्रासो भागस्तस्य दाने उत्सुकाः असंते प्रसक्ता असाधारणविशेषणोपादानाद ग्रा
म्याः करान्   याद्कराजपुरुषेभ्यो ददुः कान् व्रीहीन् किंभूतान् द्रोणेश्च तुः षट्कुडवाद्द्रोणो मानमेषां मानमितिकणे ऽनाम्न्यद्विः द्रुख इति द्रुपि
वीसापां द्विरुक्तो च द्विद्रोणान् द्विद्रोणान् तथा द्विद्रोणैश्च तिलान् चाभिन्नकमे द्विद्रोणमानान् द्विद्रोणमानान् तिलांश्च शरदि हि ग्राम्याः शस्येषु निष्पन्नेषु
राजकरं ददते• क्रौंचान् सहस्रं सहस्रं पंचकेनाचीगणत् सहस्त्रशुकान् गोप्यः पंचकं पंचकं रसात् २१ गोप्यः क्षेत्ररक्षिका नार्यः सहस्रं सहस्रं क्रौंचान्
पक्षिभेदान् रसात्कौतुकात् पंचकेन पंचसंख्यामानमस्य संख्याइतेरित्यादिना के पंचकः संघस्तेनाचीगणत सहस्त्रशुकान् पंच पंचकमित्यत्र शुके
सामान्याधिकरण्येपि पंचकशब्दात् ब्राह्मणानां संघ इति वदेकवचनं• शरदि हि क्रौंचाः शुकाश्च बाहुल्येन स्युः मघाभिः मघास्वित्यत्र कालेत्यादिना वा तृतीया
श्रुत्यां प्रसिताः स्मृतौ प्रसिताः विधिनोत्सुकाः करदानेउत्सुकाः कृष्याच बद्धाः पशुष्वपि बद्धा इत्यत्र प्रसितेत्यादिना• वा तृतीया• द्विद्रोणैः पंचकेन सह
स्रेणेत्यत्र व्याप्य द्वितीयेत्यादिना वा तृतीया पक्षे द्विद्रोणान् द्विद्रोणान् पंचकं पंचकं सहस्रं सहस्रं तृतीयावीप्सायां विहितेति तृतीयांतस्य पदस्य द्विरुक्ति
र्न स्यात्• द्वितीया तु कर्मणि विहिता न वीप्सायाम तस्तदंतस्य द्विरुक्तिः स्यात्• संजानाना गुणैः प्रेम संजानंतः पुरा रतैः संप्राप च्छंत दासीभिर्व्रीहीन् ग्रामीण
२ दारकाः, ग्रामीणदारकाः ग्राम्यपुत्रा दासीभिश्चेटीभिर्व्रीहीन् संप्रापच्छंत ददुः यतो गुणैः रूपलावण्यादिगुणान् प्रेमस्नेहं च अथो दासीनां संजा
नाना जानंतस्तथा पुरा पूर्वं रतैः सुरतस्य संजानंतः स्मरंतः ग्राम्याणां धर्मत्वाद्धर्मेषु दासीषु रमंते• संप्रायच्छत् बिसं हंस्यै हंसो पत्न्यै मुदे भवत् आत्मने
रोचनाल्लिप्सुं कस्मै नस्वदते यथा• २३ हंसोपद्दिसं मृणालं हंस्यै स्वप्रियायै संप्रायच्छत् प्रेम्णा ददौ तद्बिसं हंस्या मुदे अभवत् अथवा आत्मने रोचनात्
रोचत इत्येवं शील इति इत्यादिना रोचनस्तस्मात् बल्लभात् लब्धं प्राप्तं वस्तु कस्मै न स्वदते किंतु प्रीतवर्धकत्वात् सर्वस्मै रुचिमुत्पादयतीत्यर्थः जह्ने
स्वात्यं बुमुक्ताभ्यो दुग्धं दध्ने च कल्पत शिक्तापि न पयोमघः शारदेधारयन्नृणां २४ नुरूपमार्थे यथा दुग्धं दध्ने अकल्पत दधिरूपविकारमापन्नं
तथा स्वातिशब्देन स्वातिनक्षत्ररवियुक्तः कालउपाचारादुच्यते स्वाता यं बुमघ जलं स्वात्यंबु मुक्ताभ्यो जह्ने मुक्ताफलरूपं विकारमापन्नं शरदि दुग्धानि
दधीनिच अन्यर्तुसकाशात् प्रचुराणि विशिष्टानि च स्युः इत्युपमानेनोक्तं तथा स्वातौ जलकणाः यत्र कुत्र शुक्तिमुखेषु पतंति ते सर्वेपि मुक्ताः स्युरिति
प्रसिद्धिः तथा न पौरिकापि जलवर्जितोपि न पयो जलं श्वस्यते शारदं ऋणं धारयत् तु श्रियते तिष्ठति स्वरूपान्न प्रच्यवते ऋणं कर्तनश्रियमाणः प्रयुंजान
इव ऋणकाहि रिक्तो द्रव्यरहितऋणशोधनाशक्तत्वात् पत्रो नमर्णनरा आत्मीयाध्रियते तस्मात्स्थानात्ततं गच्छति• गुणैः संजानानाः प्रेम संजाना
नाइत्यत्र समोज्ञोस्मृतौ वेति वा तृतीया अस्मृतावितिकिं रतैः संजानंतः दासीभिः संप्रायच्छंत इत्यत्र दानइत्यादिना तृतीया दान आत्मने पदं च मध्
र्मइति किं हंस्यै प्रायच्छत् अत्र चतुर्थी संप्रदाने इति चतुर्थी मुदे भवदित्यत्र तादर्थ्ये इति चतुर्थी• रुच्यर्थः प्रिये आत्मने रोचनात् कस्मै स्वदते क्लृप्यर्थे
विकारे दुग्धं दध्ने च कल्पत जह्ने स्वात्यंबु मुक्ताभ्यो धारिणो त्तमर्णे शारदे धारयन् ऋणमित्यत्र रुचि क्लृप्यर्थेत्यादिना चतुर्थीत्यादिना चतुर्थी• ध्वानैः प्र
त्यभ्यणोकः श्रीं शिखिभ्यो नुगृणन् घनः तस्मै प्रति गृणंतस्ते व्याश्र्वन्केकयाथ तां २५ ध्वानैर्गर्जितैः कृत्वा शिखिभ्यो मयूरेभ्यः अनुगृणन्
शिखुकमनुवदन्निवप्रशंसंतो वा शिखिनः प्रोत्साहयन्निव घनः ध्वानैरेव मैत्रीं आंतरप्रीतिं शिखिभ्यः प्रत्यश्रणोदिव मेघ दर्शनोद्भूतशि कं

शिखिकेकानंतरमेव गर्जनादंगीचकारेव अथ घनस्य मैत्रीप्रतिश्रवणानंतरं केकया नस्मै घनाय प्रतिग्रणंतो घनोक्तमनुवदंतो इव शंसंतं घनं प्रोत्सा
यंत इव ते शिखिनोपि तां मैत्रीं तस्मै केकया आभ्यण्वन्निव गर्जानंतरमेव केकायनादंगीचकुरिव शार घपिहि मे घागर्जतिद वृगार्जश्रवणा
च्छिखिनः प्रीताः केकायंते अ नश्चैव मुत्प्रेक्षा अत एव शिखिघनानामाख्यातत्वार्थित्व उपपद्यते उत्प्रेक्षाद्योतकश्चैव शब्दोत्रावसीयते योपि
संतं स्निग्धो वयस्योभयवदस्तावन्योन्यमुक्तमनुवदंतो प्रशंसयोत्साहयंतौ चा वां मिथो वयस्याविति वाचापि मानसीं प्रीतिं प्रतिजानीते शिखिभ्यो मैत्री
प्रत्यश्रृणोत् तस्मै तामाभ्यण्वन्नित्यत्र प्रतीत्यादिना चतुर्थी अर्थिनीति किं शिखिभ्यो मैत्रीं प्रत्यश्रृणोदित्यत्र मैत्र्यां मा भूत् तस्मै प्रतिग्रणंतः शिखिभ्यो
नुग्रणन्तित्यत्र प्रत्यनोरित्यादिना चतुर्थी आख्यातरीति किं तस्मै केकया प्रतिग्रणंत इत्यत्र केकायां मा भूत् रात्स्यंति देवतास्तुभ्यं नाथ किं मत्समीक्षसे ए
वमाराधयन् सायांत्रिकेभ्यः कुलयोषितः २६ कुलयोषितः सायांत्रिकेभ्यः पोतवणिग्भ्यः प्रस्थापार्थं द्वीपांतरं जिगमिषुभ्यः आराधयन् द्वीपांतरं जिग
मिषुपोतवणिजांक्षेमलाभादिविषयं दैवं पर्यालोचयन् स्वविचारं न्यचुरित्यर्थः नत्वकुलीनाइवैते सभाविनिचिरकालीनविरहरूपमहापराधाविधानरु
पत्वा ताभ्यश्चुकुशुः कथमित्याह हे नाथ वल्लभ रात्स्यंति देवतास्तुभ्यं त्वद्वीपांतरं गच्छतः क्षेमलाभादिविषयं दैवं समुद्रदेवतादयो देवताः पर्यालोच
यिष्यंति त्वत्क्षेमलाभादिविषयं देवताः सांनिध्यं करिष्यंतीत्यर्थः अतः किं मत्समीक्षसे मम विरह असोढव्य इति भीरुः कथं न भविष्यतीति क्षेमाक्षेमा
दिविषयं दैवं किमिति निरूपयसि देवताप्रसादात्वयि क्षेमाभ्युदयादिमति त्वं दैवरारणाया मम नितरां क्षेमाभ्युदया मद्दैवचिंतयालया त्वयेव धमिति
भावः यद्वा कुलयोषितः सायांत्रिकेभ्यः आराधयन् पोतवणिजां गमनविषयमभिप्रायं विचारितवत्यो विचारं न्यवमन्त्युरित्यर्थः कथमित्याह हे दे
व देव नमाराध्य हे नाथ तामुपलंपत्रस्तुभ्यमारात्स्यंति अकुलीनत्वेनासतीत्वादेते अस्मत्पतयः परपुरुषाभिसरणविघ्नाः कदा देशांतरं यास्यं
ति इति तव गमनाभिप्रायं पर्यालोचयिष्यंति न तु वयं कुलीनत्वात् तस्मात् किं मत्समीक्षसे अस्याभिप्रायः कीदृश इति विमति दैवं किमिति निरूपयसि
अहं त्वद्विरहं क्षणमपि नाभिलषामीत्यर्थः एवं सायांत्रिकाणां कुलयोषितां च बहुत्वेपि प्राप्ते कंचन भर्तारं प्रतिभणनविवक्षया तुभ्यमित्येकवचनं
असाधयन्नपुत्रेभ्यो दारेभ्यो ददृशुर्नच प्रोषुर्लाभपराध्यंतो पश्यंतः श्रांतमध्वगाः २७ अध्वगाः पांथाः पुत्रेभ्यो नासाधयन् अस्मद्विरहमी
कथं भविष्यंतीति पुत्राणां क्षेमाक्षेमादिविषयं दैवं नाचिंतयन् एवं दारेभ्यो ददृशुर्नच किं तु लाभपराध्यंतो राद्धं विचारयंतो अत एव श्रांतमये
अपश्यंतो मार्गखेदमविचारयंतः संतः प्रोषुः शारदिहि पांथा व्यवहारार्थं देशांतरं यांति तुभ्यं रात्स्यंति मत्समीक्षसे इत्यत्र यद्वीक्षा राधीक्ष्यो इति चतु
र्थी राधीक्ष्यो स्यर्थ धातुयोगमपीच्छंत्यन्ये सायांत्रिकेभ्यः आराधयन् पुत्रेभ्यो नासाधयन् राधिरपतिरस्त्युरादिर्णिगंतो साधिर्णिगंत एव
दारेभ्यो ददृशुः राधीक्ष्यर्थविषयादिप्रश्ने व्यादिच्छत्यन्यः लाभायराध्यंतः श्रांतये पश्यंतः लोहिनीवतडिज्ज्योत्स्ना तापाय विरहे हितत् या
स्त्रैणं सम्श्लाघते पत्येतिष्ठते शापते नुते २८ विरहे सति यस्मात् ज्योत्स्ना लोहिनीवतडित् लोहिता विद्युदिव तापायासी लोहिता हि विद्युत्संतापा
यस्याद्युक्तं तापाय कपिला विद्युदातपायाति लोहिनी पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् साने ति तस्मात् स्त्रैणं पत्ये श्लाघते
स्म तिष्ठतेस्म शापतेस्म नुतेस्म इति सर्वक्रियासु योज्यं श्लाघास्थाने शपथापन्हवान् कुर्वाणं स्त्रैणं कर्त आनमातं जानंतं पतिं प्रयोजयं शाप्यं
तिस्मेत्यर्थः पत्ये इत्यत्र जातावेकवचनं इदमुक्तं स्यात् प्रतीनपराधकत्वेन चाटुकरानैरतुनयतोप्यवगणय्य मानावष्टंभेनावस्थिता अपि

—

शारदज्योत्स्नोदये कामोद्रेकाद्विगलितमानाः सत्यो नार्यः श्लाघयावक्रोक्तिभंगीभिः स्वप्रत्रांसयोद्धिता अनुरागादिसूचकस्थानविशे
षेण शपथेन सपत्न्युद्भावितस्य मिथ्यारूपस्यालीकस्य निरासेन पत्युद्भावितं पतिभिः संभाव्यमानं व्यलीकं यद्यस्मासु कुत्रापि अस्ति तदा
वयं मात्रादिनाशीरं स्पृशाम इति प्रत्यायकवाक्येन धानिन्हवेन च प्राङ्मानवशेन रुतस्यावज्ञाद्यपराधस्यापलापेन चात्यंतिकानुरा
गभक्तिरिरंसुतादिगुणोपेतं ज्ञाप्यमात्मानं पतीन् ज्ञापितवत्यः तापयलोहिनीतडिदित्यत्र इत्यातेन ज्ञाप्ये इति चतुर्थी पत्ये श्लाघते
न्हुते तिष्ठते शापते इत्यत्र श्लाघन्हुस्थेत्यादिना चतुर्थी पाकाय प्रयताजग्मुर्नीवारेभ्यस्तपस्विनः चतुर्मास्योपवासोपनेयुर्ग्रामं पुरा
यवा २९ पाकाय प्रयतोपि तु मुधता संतस्तपस्विनः तापसाः नीवारेभ्यः वनव्रीहीनाहर्तुं यद्युः एतदेषां स्वयंपाकित्वमसंग्रहश्चो
क्तं शारदिहि नीवारा बाहुल्येन सुः परं चतुर्षु मासेषु भवो वर्षाकालेभ्य इति कणितस्य त्वपि चतुर्मासः स चासावुपवासश्च तस्मिन्नपि
चतुरो मासान भुक्त्वा पीत्यर्थो ग्रामं पुराय वानेयुः पारणे प्रधानभिक्षालाभाद्यर्थं नगताः एते नातिनैष्ठिकत्वात् किः महातापसा हि केचि
द्ववस्वपनेकादश्या आरभ्य देवावस्थाने कादशीं यावत् चतुरो वर्षमासानुपवासं कुर्वीत तत्पारणेपि वनस्थितैरेवारण्यकधान्यैः शी
लोञ्छवृत्त्यानीतैः स्वयंपक्वैः प्राणयात्रां कुर्वंति न तु प्रधानं भिक्षालाभाद्यर्थं ग्रामपुरादिवासस्थानमागच्छंति इति तेषां धर्मः ॥
चित्रां स्वातेर्विशाखायै गंतुर्भानोस्त्विषार्दिताः यांतोध्वानममन्यंत नश्रुनं स्वं न वा बुसं ३० अध्वानं मार्गं यांतोध्वगाः पांथा
स्वमात्मानं श्रुनेकुकुरायमाणं नामन्यंतात्मनं कष्टाधारत्वेन श्रुनोप्यात्मानं निकृष्टं मेनिरे न वा बुसं यद्वा आकिंचित्करत्वादात्मानं
पलालादप्यसारं मेनिरे यतश्चित्रां गंतुः स्वातेर्गंतुः विशाखायै गंतुश्चित्रास्वातिविशाखानक्षत्रैः सह संयुज्यमानस्य सतः इत्यर्थो
भानोरवेस्त्विषा आतपेन अर्दिताः अत्युष्णतापीडिताः शारदि हि रविश्चित्रास्वातिविशाखाभिर्वयं युज्यते तत्पुत्रश्च प्रायोत्युष्ण
द्युतिः स्यात् नान्नं नावं शुकं काकं श्रृगालं मेनिरे वृषं पयः पानोन्मदा गोपा महिषं तु श्रुनं तृणं ३१ गोपाः गोपालाः वृषं
जातावेकवचनं गांडान् अन्नं नावं शुकं काकं श्रृगालं वा न मेनिरे निःसत्वतानायासस्वच्छंद्यताकरणादिभ्यो पिनिकृष्टमज्ञासिषुः
महिषं तु श्रुनः पादलिप्तत्वेन श्रुनेतृणं वामेनिरे यतः पयः पानोन्मदाः क्षीरपानोन्मत्ताः नतृणस्य बुसाय स्वं मैत्रेवाश्रुष्यदंबुदः सु
खोहितोपि पृथ्वी द्यौर्यदप्रीणान्नचातकं ३२ तृणबुससकाशादपि स्वमकिंचित्करं मन्यमान इव अंबुदो श्रुष्यन् निर्जलो भवत् यद्य
स्मादेतोरंबुदश्चातकं नाप्रीणात् नतर्पयत् कीदृक् पृथ्व्यै सस्याद्युत्पत्तिहेतुत्वात् द्योः स्वर्गस्य च परोपकारित्वात् धार्मिकत्वा
दिभिर्गुणैः सुखोदितोपि सन् यदा च न तर्पयति तृणकं चातकं याचकं केनाप्यसामर्थ्येन न प्रीणाति तदा तृणबुसाभ्यामप्यात्मानं म
किंचित्करं मन्यमानः सन् श्रुष्यति विद्यत इत्युक्तिः पाकाय प्रयता इत्यत्र तुमर्थ इत्यादिना चतुर्थी नीवारेभ्यो जग्मुरित्यत्र गम्यस्या
प्य इति चतुर्थी ग्रामं नेयुः पुरायनेयुरित्यत्र गतेरित्यादिनावा चतुर्थी अनाप्त इति किं अध्वानं यांतः कृद्योगे तु परत्वात्षष्ठ्येव
स्यात् गंतुः द्वितीयैवेत्यन्ये चित्रां गंतुः चतुर्थीत्यन्ये विशाखायै गतः न स्वं श्रुनं अमन्यत न स्वं बुसममन्यतेत्यत्र मन्यस्याया
दिना वा चतुर्थी अनावादिभ्य इति किं न वृषं नावमन्नं शुकं काकं श्रृगालं वा मेनिरे कुत्स्यते नेनेति करणाश्रयणं किं न स्वं श्रुने
मेनिरे इत्यत्र स्वशब्दान्न स्यात् अतिग्रहणं किं महिषं श्रुनं मेनिरे न स्वं तृणस्य मंतेति परत्वात् कृद्योगे परत्वात् षष्ठी चतुर्थ्यपीति

कश्चित् सस्यं बुसायमंना पथ्यो हितः धीर्हितः पथ्यसुखः धीः सुखः इत्यत्र हितसुखाभ्यामिति वा चतुर्थी ॥ शं पथ्यं भद्रमायुष्यं स्तात् सेमोर्थश्च
सिध्यतु राज्ञः प्रजाभ्य इत्यूचेगस्तिरुद्यन् घनस्वनैः ३२ अगस्तिरगस्त्यर्षिः उद्यन् घनस्वनैर्मेघगर्जितैः कृत्वा ऊचे इव इवोत्र वसीयते
किमित्याह राज्ञः प्रजाभ्यश्च शं सुखं पथ्यं हितं भद्रं धनधान्यादि संपल्लाभ आयुः प्रयोजनमस्य स्वर्गः स्वस्त्यादिना य आयुष्य हेतुर्वस्तुस्ते
मा विपद्भावश्च स्तादर्थश्च सिध्यतु कार्यं निष्पद्यतां चेति शरदि ह्यगस्तिरुदेति घनगर्जितानि च स्युरित्ययमुत्प्रेक्षा मुनिर्हि उद्यं स्तपो ज्ञानादि
विराजोद्दीप्यमानो राजादिसमीपं गच्छन् घनस्वानैः सांद्रध्वनिभिः कृत्वा राज्ञः प्रजाभ्यश्च शमित्याद्याशीर्वादं वक्ति ॥ श्रेयश्चिरायुः कुशलं
स्तात्कार्यसिद्धिमेतु च पुत्रेभ्यश्च स्नुषाणां चेत्यरुचुर्बलिमहस्त्रियः ३३ बलिमहे बलिदिने राज्यश्चेन प्रतिपादने राजकार्तिकश्वेत प्रति
पद्दिने स्त्रियः ऊचुः किमित्याह पुत्रेभ्यः स्नुषाणां च वधूटीनां च श्रेयो धनाद्यर्थलाभश्चिरायुश्चिरजीवितं कुशलं विपद्भावश्च स्तात्कार्य
सिद्धिमेतु चेत्याशीर्वाक्यानि बलिमहो हि कार्तिकपंचदशीरात्रौ शुक्लप्रतिपद्दिने चस्यात्तत्र च लोका यथाशक्ति सुवेषाः सुचेष्टाः प्रमुदिता
स्तो वृत्ताद्यास्वादनपरा भगिन्यादिस्त्रीः प्रणमंति ताश्च नंदनवर्धनादि पूर्वश्रेयस्तादित्याशीर्वादं ददते यतः कार्तिकश्वेतप्रतिपदि य[illegible]ष्ठु
भमितरद्वा चेष्ट्यते तत्स्वेष्टया च सकलं वर्षं याति यदुक्तं भविष्यपुराणे पुरा वामनरूपेण याचयित्वा धरामिमां बलिं जह्ले हरिः सर्वक्रांत
वान् त्रिविक्रमैस्त्रिभिः १ इंद्राय दत्तवान् राज्यं बलिं पातालवासिनं ० कृत्वा दैत्यपतेर्दत्तमहोरात्रं पुनर्नृपः २ पंचदशी निशा ह्येका कृष्णप
क्षस्य कार्तिके एकमग्रेतनदिनं बलिराज्येन चिह्नितं कार्तिके कृष्णपक्षस्य पंचदश्यां निशागमे यथेष्टं चेष्टं दैत्यानां राज्ञे तेषां महीतले
लोकश्चापि गृहस्यांतः शय्यायां शुक्लतंडुलैः संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत् बलिमुद्दिश्य दीयंते दानानि कुरुनंदन यानि ता
न्यक्षयाण्याहुर्मयैवं संप्रदर्शितं ६ एकमेव महोरात्रं वर्षे वर्षे विशांपते दत्तं दानवराज्यस्य आदर्शमिव भूतले ७ कि नीरुजश्च जनः सर्व
सर्वोपद्रववर्जितः कौमुदीकरणाद्राजन् भवतीह महीतले ८ यो यादृशेन भावेन तिष्ठत्यस्यां युधिष्ठिर हर्षदैन्यादिरूपेण तस्य वर्षं प्र
याति हि ९ रुदितो रोदिति वर्षं हृष्टो वर्षं प्रहृष्यति भुक्तो भोक्ता भवेद्वर्षं सुस्थः सुस्थो भवेदिति १० हितार्थः प्रजाभ्यः पथ्यं स्तात् राज्ञः क्षे
मस्तात् पुत्रेभ्यः कुशलं स्तात् स्नुषाणां कुशलं स्तात् अर्थोर्थिः अर्थः प्रजाभ्यः सिध्यतु अर्थो राज्ञः सिध्यतु कार्यं पुत्रेभ्यः सिद्धिमेतु कार्यं स्नु
षाणां सिद्धिमेत्वित्यत्र तद्भावे त्यादिना चतुर्थी शरदाकिं परिक्रीताः सहस्रायायुतेन वा अलं केल्यै श्रियै शाका हंसास्तस्या परं नृपः ३४
केल्यै क्रीडायाः पालं समर्थास्तथा श्रियै शोभायै प्रस्तावाच्छरदः एव शाका हंसास्तस्याः शरदेयघस्मादन्यपुरनुगमनं च कुसलं किं शरदा कर्त्री
सहस्राय रूपकादि ० द्रव्यायुतेन वा रूपकादिद्रव्यसहस्याथा परिक्रीता नियतकाले स्वीकृताः यो हि येन परिक्रीताः स्युः स तेसेवकास्तस्य
स्वामिनः केल्यायलं नर्मणे शाकाः श्रियै शोभायै शाकाश्च संतो नुगच्छंति ॥ स्वधापितृभ्य इंद्राय वषट् स्वाहा हविर्भुजे नमो देवेभ्य इत्युक्ति
कृपाचः सस्यश्रिया फलन् ॥ ३५ ॥ ऋत्विग्वाचो मेघवृष्टिसस्यनिष्पत्त्याद्यर्थं पूर्वकृत कारीष्यादीनां प्रस्तावे याय जुकानां मंत्राक्षरो शेरी
च्चारणानि सस्यश्रिया प्रचुरधान्यनिष्पत्त्या अफलन् सार्थका आसन् का वाच इत्याह पितृभ्यः स्वधा हविर्दत्तमस्तु तथा इंद्राय वषट् हवि
र्दत्तमस्तु तथा तथा हविर्भुजे अग्निदेवताये स्वाहा हविर्दत्तमस्तु तथा देवेभ्यो नमोस्त्विति । प्रजाभ्यः स्वस्त्यभून्निद्रा समुद्रशयनाद्ययो आ
सिंधोः शाद्वलान्यासन् अरमरात्यर्थपोषरात् ० ३५ प्रजाभ्यः स्वस्ति सस्यादिसंपत्त्या लोकस्य क्षेममभूत् तथा समुद्रशयनाद्विष्णोर्निद्रा
ययौ कार्तिके का दश्यां हि विष्णुर्निद्रां जहातीति रूढिः तथा आसिंधोः समुद्रमर्यादीकृत्य नदीमभिव्याप्य वा शाद्वलानि सहरितभूखंडा

उपचाराद्धरितानि वासन् कथं अरमरात्परि अरमैवं नं देशं वर्जयित्वा तथोषरात्परि ऊषरिणं देशं वर्जयित्वा सहस्राय परिक्रीताः अ
युतेन परिक्रीता इत्यत्र परिक्रयणे त्यादिना वा चतुर्थी श्रियै शाकाः अलं केल्यै वषडिंद्राय नमो देवेभ्यः प्रजाभ्यः स्वस्ति स्वाहा हवि
र्भुजे स्वधा पितृभ्य इत्यत्र शाकार्थैश्च चतुर्थी त्यादिना चतुर्थी समुद्रशयनाद्ययाविंत्यत्र पंचमी त्यादिना पंचमी आसिंधोरित्यत्र आ
ङावधाविति पंचमी अरमरात्परि ऊषरादपेत्यत्र परीत्यादिना पंचमी प्रतिद्विपमदामोदाद्गंधं सप्तच्छदान्मधुः शेफालिभ्यो
ददुर्लास्यं प्रतिगंधाश्च मारुताः ३६ सप्तच्छदानि सप्तपर्णतरुपुष्पाणि द्विपमदामोदात् प्रति हस्ति मदसौरभ्यस्य तुल्यं गंधम
धुर धारयन् एतेन शारदि द्विपा माद्यंति सप्तच्छदाश्च द्विपमदामोदतुल्यं पुष्प्यंतीत्युक्तं तथा मारुताश्च गंधात्प्रति गंधस्य प्रति
दानभूतं लास्यं नृत्तं शेफालीभ्यः शेफालीलतापुष्पेभ्यः ददुः शेफालीनां गंधान् गृहीत्वा लास्यं ददुरित्यर्थः अन्येपि नाट्योपाध्या
गंधद्रव्यादि गृहीत्वा नर्तकीनां लास्यं ददति मोदात्प्रति गंधात्प्रति इत्यत्र यतः प्रतीत्यादिना पंचमी उपाध्यायादधीत्येव केकी
श्रुत्वा नटस्य वा प्रासादाग्रान्ननर्तैनं पौर्यः प्रैक्षंत वासनात् ३८ प्रासादाद्गृहशिखरमारुह्य केकी मयूरो ऽयं ननर्त किं कृत्वा
उपाध्यायादधीत्येव नियमपूर्वं नृत्तविद्यां गृहीत्वेव अथवा नटस्य श्रुत्वेव द्रव्याप्यात्र यो ज्यः द्रव्यादिदानेन नृत्तमाकर्ण्यैव यथोपाध्या
नियमपूर्वं नटाद्द्रव्यदानेनाधिविद्यां नृत्यं ज्ञात्वा निपुणं नृत्यति तथा जातिस्वभावेन केकी चतुरं ननर्तेत्यर्थः अपि तेन एनं के
किनं पौर्यः आसनादासने उपविश्य प्रैक्षंत कौतुकात्प्रकर्षेणापश्यन् शरद्यपि मयूरा मत्ताः संतो जातिस्वभावेन नृत्यंति प्रमोद
यंती चटकान्मयूरान् प्रगल्भयंती कुररद्विरेफान् शरत्समभ्येति विकाशयंत्याप्युन्मीलयंती कुमुदोत्पलानि उपाध्यायादधीत्ये
त्यत्र आख्यातरीत्यादिना पंचमी आख्यातरीतिकिं नटस्य श्रुत्वा प्रासादाग्रान्ननर्त आसनात्प्रैक्षंतेत्यत्र गम्ययप इत्यादिना पंच
मी । वर्षात्ययात्स्मरत्स्प्राद्द्रुमादारभ्य चाबभौ अन्यो वीणाक्वणाद्दिनो वेणुनादाद्दलिस्वनः ० ३९ वर्षात्ययाद्वर्षाकालातिक्रमा
त्सन्मति अज्ञाद्द्रुमात्कमलवनोद्ध्रदादारभ्य चालिस्वन आबभौ यतो वीणाक्वणाद्भिन्नो दन्यो न्याद्दशोति मधुरस्तथा वेणुनादाद्भि
न्नः शरदि हि पद्मखंडविकाशो मधुपानोन्मत्तानां भृंगाणां ध्वनिरतिमधुरः स्यात् गम्यपि पश्चिमदेशे ग्रामात्प्राच्यां ययुर्जनाः
महानवम्या अपरेन्हि कोशात्सीमलंघितुं ४० महानवम्या आश्विनश्वेतनवम्या अपरे अनंतरेन्हि दिने विजयदशम्यां ग्रामाद्

पलक्षणत्वात्पुरंदरपिसकाशात्प्राच्यां पूर्वदिशि जनायपुः कसतिग्रामात्सकाशात् पश्चिमे देशे पश्चिमदिग्विभागेगम्येपि नदीपर्वताद्य
भावेन गंतुंशक्योपि पश्चिमदेशं मुत्क्वेत्यर्थः किंकुर्वन् पुः कोशात्क्रोशमात्रात्परेण सीम क्षीपि सीमनत्राष्ट्रं हलायुधभारतीमन्यते
ग्रामादिसीमभूमिलंघितुं शकुनमार्गणाभिप्रायेण विजयदशम्यांहि अस्तमयदित्युक्तेन लोकसामान्येन अप्रशस्ततया प्रसिद्धत्वात् पश्चि
मदिशं वर्जयित्वा उदयदिकूत्वेन लोके सर्वदिक्षुमध्ये सामान्येन मंगल्यादिकूतया प्रसिद्धत्वात्प्रायः पूर्वस्यां कोशासरतः सकलवर्षशुभा
शुभसूचकशकुनान्वेषणाय लोका यांति तस्य च गमनस्य लोके सीमलंघनमिति संज्ञारूढा यद्वा ग्रामादि सुतस्या जनायाम्या व्यज्यं
ते नेविजयदशम्यां कोशात्परेण सीमलंघितुं ग्रामात्पश्चिमे देशे गम्येपि विजयदशम्यां हि ▪ प्रातरेव लोकाः सीमलंघितुं यांति
प्रातश्च पश्चिमदिशि सूर्यस्य पृष्ठवर्त्तित्वा यात्रा कर्तुमुचिता यदुक्तं यामयुग्मेषु राज्यं तयामात्पूर्वा दिगोरविः यात्रास्मिन् दक्षिणे
वामे प्रवेशः पृष्ठगेद्वयं इति गंतुमर्हेपि ग्राम्यत्वात् भ्रमात्प्राच्यांपयुः ग्राम्याहि मूर्खत्वा नथा विधा गम्यागम्यदिक्परिज्ञाना कौशलात्सामान्ये
नलोकव्यवहारे पश्चिमानतथा प्रशस्या पथा पूर्वेति पश्चिमां गमनार्हमपि मपि वर्जयित्वा पूर्वामेव याति आरात्तीराद्बहिर्नीरात् शीतेभ्य
इतरे रवेः अभ्युत्सेत्स्यमानोस्यादृणाद्द्धानुकच्छपः ४१ कच्छपः कूर्मगो जातावेकवचनं शीतेभ्य इतरेरवेरुसैः किरणैः स्तप्यमा
नोपिदह्यमानोप्यारात्तीरात् नद्यादितटसमीपे नीराद्बहिश्चारुह्यात्तस्थौ उत्प्रेक्ष्यते ऋणाद्बद्धानुदेयेन हेतुनानिगडित इव ऋणिकोहि
ऋणादुत्तमर्णेन बद्धो रवेरुष्णैः करैस्तप्यमानो नद्यादितटे तिष्ठति बद्धत्वान्न तु जलमध्ये प्रविशति शरदि हि कच्छपा बाहुल्येन सुखेन च
जातिस्वभावेन नद्यादितटेषु बाहुल्येन विचरंति उक्तं च अपंकिलतटावटः शफरफांटफालोज्वलः पतत्कुररकातरभ्रमदहम्भी
नार्भकः क्षुवत्कमठसैकतस्खलद्बकोटवाचाटितः सरित्सलिलसंचयः शरदि मेदुरं सीदति तदभियत्नं चैषां कच्छपशब्देनैव
व्यंजितं यतः कच्छान्नूपप्रायं तटं तं प्राप्तिनेन पिबति वा कच्छपः प्रभृत्यर्थः वर्षात्ययात्प्रभृति अभोद्गमादारभ्य अन्यार्थे अन्यः
कृणात् भिन्नो नादात् ग्रामात्प्राच्यां बहिर्नीरात् शीतेभ्य इतरैरित्यत्र प्रभृत्यन्येत्यादिना पंचमी दिशि दृष्टाः शब्दादिकृत्वाप्यादिति
देशकालवृत्तिनापि स्यात् ग्रामात् पश्चिमे देशे न यस्या अपरोक्ष तथा गम्यमानेनापि दिक्शब्देन स्यात् कोशात्सीमपरेणेति गम्यते ·

कृणाद्बद्ध इत्यत्र कृणादिति हेतोरिति पंचमी सौरभादनुरागेण मुदा बद्धोलिरभ्रमत् कुमुदस्यांतिके आम्रदूरे नीपस्य केतकाद्
४२ अलिः सौरभादनुरागेण मुदा बद्धः सौरभहेतुकोयोनुरागस्तद्धेतुका या मुद्धर्षस्तया हेतुना बद्धो व्याप्तः सन् कुमुदस्या आम्र
पभ्रस्य चांतिके भ्रमत्तथा नीपस्य कदंबस्य केतकीपुष्पाच्च दूरे ऽभ्रमत् नीपवृक्षस्य किंचित्तीक्ष्णपत्रत्वेन केतकस्य च कंटकित
त्वेन नैकट्येन भ्रमणे अंगविदारणभयात् शरदिहि कैरवाण्यपानि च नवान्युद्भिद्यंते कदंबानि केतकानि च वर्षोद्भिन्नान्यपि शा
रद्यनुवर्तंते वर्ण्यंते च कविभिः सौरभादनुरागेणेत्यत्र गुणादित्यादिना वा पंचमी आस्रियामिति किं मुदाबद्धः केतकाद्दूरे नीपस्य
दूर अआरंतिके कुमुदस्यांतिके इत्यत्राशदर्थैरिति वा पंचमी स्तोकाज्जातिः स्पृशन् स्तोकेना आन्यल्माच्च शीकरान् अल्पेन न
विमरुत् कृच्छ्रात्सेहे वियोगिभिः ४२ सुगमोनवरं स्तोकाज्जातिर्जातिपुष्पाणि स्तोकेना आनिच स्पृशन् शरदि हि जातिपुष्पा
णि स्युः कृच्छ्रेणार्कस्य तीक्ष्यत्वात् ग्रीष्मः कतिपयाच्छरत् भारद् कतिपयेनाल्पैर्मेघैः स्तोकैश्च गर्जितैः ४३ कृच्छ्रेणार्कस्य
तीक्ष्यत्वाद्दुष्टुंशक्यत्वात् शरत्कालः कतिपयात्स्तोकेन ग्रीष्मोभूत् तथा अल्पैर्मेघैः स्तोकैर्गर्जितैश्च कृत्वा कतिपयेन शारदभूत् ॥
क्लांताः कृच्छ्रेण तापेन ज्योत्स्नायाः भागजानत वीचीह्रादैस्ततो जा[illegible]कोराः सरसां पयः ४५ कृच्छ्रेण कष्टकारिणा तापेन
सूर्यातपेन क्लांताश्चकोराः शाकूसरसां पयो जलं स्वच्छत्वेन ज्योत्स्नायाः चुष्या भवतादित्यर्थः भवन्ति रच जानाते रर्थो यद्वा ज्योत्स्ना
प्रियत्वाज्ज्योत्स्नायामत्यंतरक्ताश्चित्तभ्रांत्या सरः पयो ज्योत्स्नारूपेण प्रत्यपद्यंतइत्यर्थः मिथ्याज्ञानवचनो ▪ न जानाति र्मिथ्या
थ्याज्ञानं चाज्ञानमेव · ततः पश्चाद्वीचीह्रादैः कल्लोलध्वानैः कृत्वा सरसां पयः सरसां पयएवाजानन् सरसां पयइत्यनुद्यत्वेन
विधेयत्वेन च योज्यं स्तोकात्स्पृशन् अल्पात्स्पृशन् अल्पेन वान कृच्छ्रात्सेहे कृच्छ्रेण तीक्ष्यत्वात् कतिपयाद्ग्रीष्मः कतिप
येन शारदित्यत्र स्तोकाल्पेत्यादिना वा पंचमी असत्वेइतिकिं स्तोकैर्गर्जितैः अल्पैर्मेघैः कृच्छ्रेण तापेन ज्योत्स्नाया अजाननः इ
त्यत्राज्ञानेज्ञ इति षष्ठी अज्ञान इति किं ह्रादैः पयोजानन् सरसांपयइत्यत्र वराचरितं यतः शैलस्य गिरेरुपरि ऊर्ध्वदेशापेक्ष
या अधस्तादधस्तात्पश्चिमदिग्विभागे परस्ताच्च पूर्वदिग्विभागे चोपलक्षणत्वाद्दक्षिणोत्तरभागयोरपि उत्पत्तिष्णुभिरुच्छल

द्रिः यथा दंडोपरिस्थितं नीलवस्त्रेणा पर्यधश्च तुर्दिक्षु चावृतं नीलछत्रं राजादेरुपरिधृतं शोभातिशयायस्या तथाद्रेः समंतादुत्पतिष्णु शुकमंडलं शरद इत्यर्थः शरदि हि शुका बाहुल्येन स्फुर्जातिप्रत्ययेन शैलाद्युच्चस्थानेषु निवसंति च ध्रुवस्याभाद्दक्षिणतो वातापेः सानुरुत्तरात् पितॄणां दुर्गतेस्त्यागेऽध्वा दीर्घयानस्य साधकः ४७ पितॄणामध्वा पितृदंडः स्वर्गदंडाख्यो स्वर्ग इति नाम्नाज्योतिषे प्रसिद्धो भात् कीदृक् पितॄणामेव दुर्गतेस्तिर्यक्त्वादिकुगतेः शुनौ तु दंदश्शूकत्वादस्यया प्रसिद्धाया स्त्यागे सति द्योः स्वर्गस्य कर्मणो यद्यानं गमनं तस्य कर्मणः साधको निष्पादकः अनेन हि मार्गेण कृतावितरो दुर्गतिं परिहृत्य स्वर्गं यांतीति प्रवादः कास्मादित्यत आह ध्रुवस्य दक्षिणस्यां दिशि तथा वातापेर्दैत्यस्य कर्मणः भ्रातुर्भक्षकस्यागस्त्येर्द्विजानुपद्रवन् वातापिर्दैत्यो ह्यगस्त्येन भक्षित इति प्रसिद्धिः उत्तरा उत्तरस्यां दिशि शरदि हि वत्सस्य ग्राममध्यस्थस्य मुखं पूर्वस्यां मुखं च पश्चिमायां स्यात् यदुक्तं कन्यासंक्रात्यादित्रितये पूर्वादौ वत्स इति ततश्च ध्रुवापेक्षया दक्षिणस्यामगस्त्यापेक्षया चोत्तरस्यां स्यात् निद्रां योऽत्यक्त पूर्वैर्द्विर्यदैर्गर्जिकैः साध्वपांपि ।बैः स त्वामत्यजदंभाधौ कैटभस्य मधुं द्विषन् ४८ सः अंभोधौ तिष्ठन् कैटभस्य मधुं द्विषन् कैटभमधुदैत्ययोः शत्रुर्विष्णुस्तां निद्रामत्यजत् यो भोधाव पांपि वैर्जलानि पिबद्भिर्मेघैर्जलभर्त्यर्थो ऽत एव साध्व्यत्वं तं गर्जकैरद्धैर्मेघैर्हेतुभिर्निद्रात्यक्ता पूर्वमनेन त्यक्तपूर्वी न तथा त्यक्तपूर्वा घनप्रबलगर्जितैरपि योवर्षासु न जजागारेत्यर्थः शैलस्योपरि लक्ष्म्या उपरिष्टात् शैलस्य परस्तात् शैलस्याधस्तात् शैलस्याधः ध्रुवस्य दक्षिणतः भ्रातुरुत्तरादित्यत्र रिरिष्टादित्यादिना षष्ठी वातापेः भ्रातुः यानस्य साधकः अपांपिबैर्दीर्घयानस्य दुर्गतेस्त्यागे इत्यत्र कर्मणि कृत इति षष्ठी क्रियाविशेषणस्य कर्मत्वाभावान्न षष्ठी साधुगर्जकैः कृत इति किं तामत्यजत् निद्राम त्यक्तपूर्वी कैटभस्य द्विषन् मधुं द्विषन्नित्यत्र द्विषो वा तृच्च इति षष्ठी · पवनैः खं तुषाराणां तरलत्वस्य वीरुधां दिशां नेतरि किंजल्कान् श्रान्तानां शायिकाभवत् ४९ श्रांतानां शायिका भवत् खेदापगमात्स्वापो भूत् कसति पवने कीदृशे खं तुषाराणां नेतरि शीकरानाकाशं प्रापयितरि तथा तरलत्वस्य वीरुधां नेतरि मृदुलत्वात् प्लुताश्चलत्वं प्रापयति तथा दिशां नेतरि किंजल्कान् शरदि ह्यनियत दिक्को गुणत्रयोपेतो वातो वर्ण्यते ॥ खं तुषाराणां नेतरि तरलत्वस्य वीरुधां नेतरि यद्वादिशां नेतरि किंजल्कान् तरलत्वस्य वीरुधां नेतरीत्यत्र वैकल्पि द्वयो रितिद्वयोः कर्मणोरकतरस्मिन्वा षष्ठी अन्यत्र पूर्वेणनित्यमेव श्रांतानां शायिका इत्यत्र कर्तरि षष्ठी कृतिः स्वराणां क्रौंचीभिर्विपंचीनामिवाबभौ कृतुमित्येव काशाल्याः कुसुमस्य प्रकाशनं ५० यथा विपंचीनां कर्तॄणां स्वराणां कर्मणां कृतिराबभौ एवं क्रौंचीभिः कर्त्रीभिः शरदि हि क्रौंचा मधुरं कूजंति तथा यथा कृतुमत्याः स्त्रियाः कर्त्र्या कुसुमस्य स्त्रीधर्मस्य कर्मणः प्रकाशनं भवत्येवं काशाल्याः काशाल्याः काशपंक्तेः कर्त्र्या कुसुमस्य जातावेकवचनं पुष्पाणां कर्मणां प्रकाशनमाविर्भावो बभूव शृंगस्य त्याग एणानां मित्रस्येव दुरात्मभिः विभित्सा भेदिका चोष्णां पयसामिव रोधसः ५१ यथा दुरात्मभिर्दुर्जनैः कर्तृभिः मित्रस्य कर्मणस्त्यागस्तथा एणानां कर्तॄणां शृंगस्य कर्मणस्त्यागोऽभूत् शरदि हि रुरुशंबरादिमृगाणां शृंगाणि पतंति तथोक्ष्णां कर्तॄणां रोधसस्तटस्य विभित्सा भेत्तुमिच्छा विभित्सा भेदिका च विदारणं स्यात् पयसामिव यथा जलैर्वर्षासु रोधसो · विभित्सा भेदिका चाभूत् शरदि हि वृषभा मत्ता नद्यादितटानि विलिखंति स्वराणां कृतिर्विपंचीनामिक्रौंचीभिः कुसुमस्य प्रकाशनं काशाल्या कृतुमत्येव शृंगस्य त्याग एणानामि वदुरात्मभिरित्यत्र द्विहेतोरित्यादिना कर्तरि षष्ठी वा अस्माणकस्येति किं विभित्सा भेदिका चोष्णां पयसामिव रोधसः स्तुसमान्यानुयानीयगातव्यादेयसद्गुणः नृणां दैवैश्वस तदा राजा यात्रां प्रचक्रमे ५२ स राजा मूलराजस्तदा शरत्काले यात्रां प्रयाणकं प्रचक्रमे आरेभे कीदृक् नृणां कर्तॄणां दैवैश्च कर्तृभिः स्तुत्या श्लाघ्या मान्या पूज्या अनुयानीया अनुसरणीयाः गातव्या गेया आदेया ग्राह्याः संतः शोभना गुणाः शौर्यादयो यस्य सः नृणां दैवैश्च स्तुत्य मान्यानुयानीय गातव्या देय इत्यत्र कृतस्य वेति कर्तरि षष्ठी अत्र च नित्यसापेक्षत्वात्समासः अथ यात्रोपक्रमं षट्त्रिंशता श्लोकैर्वर्णयति नेतव्यां तं रिपुः पाचागमनेनेच्छुनायशः पूरं पूरं नभोनादैर्दुंदुभिः प्रोचिवान्निदं ५३ नादैः कृत्वा नभः पूरं पूरं व्याप्य दुंदुभिर्विजययात्राढक्का इदं प्रोचिवान् नु तदेवाह अनेन मूलराजेन यशः इच्छुना · अत एव गां भुवं पात्रा दुर्नयिनिराकरणेन रक्षता सता भिपुर्ग्राहरिरं तं क्षयं नेतव्यः पवमानो जगत्त्वन् स्वरं बिभ्राणमुच्चतां चक्राणो मंगलं शंखः · छंदो धीयन्निव द्विजः ५४ शंखो विजयकंबुर्मंगलं राजादीनां चक्राण श्चक्रे कीदृक् सन् उच्चतां उदात्ततां बिभ्रा

वत्स

नैरि

ज

त्रस्ये

BHAU DAJI MEMORIAL

र्णं स्वरं तन्वंस्तथा जगल्लोकं पवमानो मंगल्योदात्तस्वरत्वात्पवित्रयन् यथा छंदो वेदमधीयन्नरुद्धेण पठन् अतएवोच्चतां बिभ्राणं स्वरं
तन्वन्नतएव जगत्पवमानः सन् द्विजो मंगलं चक्रे यात्राकाले हि मंगलार्थं शंखो वाद्यते द्विजाश्च वेदमुच्चारयंति ढक्काभिश्चक्रिभिर्ध्वानं
दुःसहं दिग्गजैरपि सोऽत्र भर्त्कार को यात्रां सुस्नातो वज्रिणोप्यभूत् ५५ दिग्गजैरपि दुःसहं सोढुमशक्यं ध्वानं चक्रिभिः करणशी
लाभिर्ढक्काभिर्विजयभेरीभिः कृत्वा स मूलराजो वज्रिणापि सुस्नातः सुखेन ज्ञेयोऽभूत् कीदृक् सन् यात्राकारकोऽत्र भर्त्त यात्रां करिष्या
मीति स्वढक्कादिशस्त्रभृत् क्रियायामित्यादिना णकच् यात्रां चिकीर्षोर्मूलराजस्य युद्धोचितास्त्रग्रहणं ढक्काभिर्वाद्यमानाभिरिंद्रेणापि ज्ञा
तामित्यर्थः राजा हि यात्रां चिकीर्षुर्यदा युद्धोचितास्त्रग्रहणं तं साधयति तदा विशेषतो विजयढक्का वाद्यंते नेतव्यांतं रिपुरित्यत्र नो भ मुहू
योर्हेतौरिति कर्मकर्त्रोर्न षष्ठी तन् यात्रा गां उदंतं यत्राद्य स्युना अव्ययंनभः पूरं पूरं कसुः इदं प्रोचिवान् आनेस्कल्सष्ठानुबंधनि
र्देशात्कानशानसांग्रहणं कान मंगलं चकाणः शान जगत्पवमानः आनश् उच्चतां बिभ्राणं अतश् छंदोधीयन् शत स्वरं तन्वन्
क्ति ध्वानं चक्रिभिः णकच् यात्राकारकोऽत्र भर्त्त स्वलर्थः दिग्गजैर्दुःसहं सुस्नातो वज्रिणा इत्यत्र तन्नुदंतेत्यादिना षष्ठी मृदंगैरुद्द
वद्भिर्यो ध्वनिनानुकृतो घनः शिखिभिः शीलिताः केकागते हर्षैः सतां मताः ५६ ध्वनिना कृत्वा द्यां व्योम रुद्धवद्भिः व्याप्नुवद्भिर्मृदंगे
तै कर्तृभिः ध्वनिनैव घनो मेघोऽनुकृतो मेघगर्जिर्विडंबितः सर्थोऽतत्सघनगर्जाशंकया हर्षगतैः शिखिभिर्मयूरैः केकाशीलिता
अभ्यस्ता अभ्यस्ताः कृता इत्यर्थः कीदृश्यः सतां विदुषां केकालक्षणज्ञानां कर्तृणां मतां माधुर्यादिगुणप्रधानत्वेन मूलराजार्थ्ययात्रा
साफल्यज्ञापकत्वादभीष्टाः आरक्षैरक्षितं भूपस्यासितं प्रतियोषितः कीर्तेः श्रियानुहसितं मौक्तिकस्वस्तिकान् व्यधुः ५७ आरक्षै
रंगरक्षकैः रक्षितं नृपस्य मूलराजस्य कर्तुरास्यते तस्मिन्नर्थाच्चाधार इति क्ते आसितं सिंहासनं प्रतिलक्ष्मीकृत्य योषितो विधवानार्यो
मौक्तिकस्वस्तिकान् मांगलिक्याय व्यधुः कीदृशान् कीर्तेः श्रियाः हसितं तु निर्मलत्वात् कीर्तिकर्तृकाणि लक्ष्मीकर्तृकाणि च हास्यानी
व मृदंगैरत्तु - द्यां रुद्धवद्भिः हर्षगतैरित्यत्र क्तयोरित्यादिना न षष्ठी असधार इति किं सतां मताः ज्ञानेच्छादिसूत्रेण सत्य
त्क्तः कथं शिखिभिः शीलिताः आरक्षैरक्षितं भूतेयं क्तः वर्तमानप्रतीतिस्तु प्रकरणादिना आधारे भूपस्यासितं कीर्तेर्हसितं श्रियाः

हसितमित्यत्र वा क्लीबे इति वा षष्ठी कामुकस्य श्रियां भूपा राज्ञ आज्ञां प्रपादुकाः सुराष्ट्रंगमिनस्तस्थुस्तत्र कोटिं नु दायिनः ५८ राज्ञो मूलरा
जस्य आज्ञां प्रपादुकाः आश्रयंतो भूपास्तत्रास नसमीपे तस्थुः कीदृशाः संतः श्रियां शातुलक्ष्मीणां कर्मणां कामुकस्येच्छा रत एव माहादिदेत्यो
च्छेदाय सुराष्ट्रां देशं गमिनो गंतुकामस्य उत्प्रेक्ष्यते कोटिं नु दायिन. दीनारादिकोटिं धारयंत इव अधमर्णा हि श्रियां कामुकस्याज्ञां प्रपादुकाः
संतः समीपनिषंति जगदागामिनोऽरिष्टस्यावश्यं छेदिनो द्विजाः ययुः आशिता रोद्वि मासि मासे द्विरं बुपाः ५९ तत्रासनसमीपे शांति स्त
कर्मणे द्विजा ययुः किंभूताः मासे द्विर्द्विरो आशितारो भोक्तारोस्तथा मासे मासस्य द्विरं बुपाः द्वौवारौ जलपायिनः तीव्रतपश्चारिणः अत एव जग
ल्लोकमागामिनो भाविनोपीत्यर्थः अरिष्टस्याशुभस्यावश्यं छेदिनः आज्ञां प्रपादुका इत्यत्र कर्मेरुकस्येति न षष्ठी अकमेरिति किं श्रियां कामुकस्य
सुराष्ट्रंगमिनः जगदागामिनः कोटिं नु दायिनः इत्यत्र इ व्यदृणेन इति न षष्ठी एष्यदृणेन इति किं अरिष्टस्यावश्यं छेदिनः अत्र णित्यावश्यका
धमर्ण्ये इत्यावश्यकर्थे णिन् · ययुस्तत्र त्यत्र सप्तमीत्यादिना सप्तमी मासे द्विराशितार इत्यत्र न नवेत्यादिना वा सप्तमी पक्षे शेषे षष्ठी मासे द्विरं
बुपाः सौवस्तिकः सन्मुहूर्ते आयुक्तैस्तपसः श्रुते मंत्रे शांतेश्च कुशलैश्चक्रे हस्त्यश्वपूजनं ६० सौवस्तिकैः पुरोहितैः सन्मुहूर्ते शुभवेलायां हस्त्य
श्वपूजनं शांतये मंत्रोच्चारपूर्वं पुष्पादिनार्चक्रे किंभूतैः तपसस्तपश्चरणे आयुक्तैस्तत्परैः रतेन नैष्ठिकत्वोक्तिस्तथा श्रुते आगमे आयुक्तैः रतेन तज्ञा
नित्वोक्तिरत एव मंत्रे कुशलैर्निपुणैरत एव शांतेः शांतिकर्मणि कुशलैश्च मंत्रकुशलैः क्रुत आयुक्तैरित्यत्रा कुशलेत्यादिना वा सप्तमी
पक्षे शेषे षष्ठी · शांतेः कुशलैस्तपस आयुक्तैः स्वामिनोऽश्वेभिभानां वानसां पतिषु चेश्वराः लक्ष्म्याः क्षितेश्चाधिपतेः सद्यो द्वारं सिषेविरे ॥
६१ अश्वेभिभानां च स्वामिनः अनसां रथानां पतिषु चेश्वराश्च तुरंगबलनायका लक्ष्म्या राज्यश्रियः क्षितेश्चाधिपते मूलराजस्य द्वारं सिं
सघः हद्वारं सिषेविरे · प्रतिभूभिः श्रियः कीर्तौ धर्मनीतेश्च साक्षिभिः शुक्रे गुरौ प्रसुतैर्नुदायादैर्न्यायिमंत्रिभिः ६२ मंत्रिभिः शायिन पांतिके रोः
आगतं किंभूतैर्धर्मे धर्मस्य नीतेश्च न्यायस्य च साक्षिभिर्लग्नकैः स्थानभूतैरित्यर्थस्तथा श्रियः कीर्तौ च प्रतिभूभिर्लग्नकैः स्थानैरि
त्यर्थस्तथा महामतित्वाच्छुक्रस्य गुरोर्बृहस्पतेर्वा प्रसुतैर्न्यपत्यैरिव यद्वा दायादैर्नु गोत्रिभिरिव अश्वेभिभानां स्वामिनः पतिषु अनसा
मीश्वराः लक्ष्म्याः क्षितेश्चाधिपतेः शुक्रे गुरोर्दायादैः धर्मनीतेः साक्षिभिः कीर्तौ श्रियः प्रतिभूभिः शुक्रे गुरोः प्रसुतैरित्यत्र स्वामीश्वरेत्यादि

नावासप्तमी पक्षेशेषे षष्ठी॰ ज्योतिषेधीतिनो जन्म छायायांशंकुमादधुः द्विष्यसाधुनृपेसाधुलग्नंसाधयितुंक्षणात् ६३ जन्म जन्मकाले
प्राप्यंजन्मत आरभ्येत्यर्थः कालाध्वनोर्व्याप्ताविति द्वितीया ज्योतिषेऽधीतमेभिरधीतिनः इष्टादेरितीन् आजन्म अधीतेज्योतिषंअसंतंज्यो
तिःशास्त्रज्ञइत्यर्थः आदधुः समभूभागे स्थापयन् छायायां छायानिमित्तंशंकुं ज्योतिःशास्त्रोक्तसरलत्वादिगुणरूपं तंसप्तांगुलादिप्रमा
णं कालमानकारकं काष्ठकीलकं किंकर्तुं लग्नं मेषादि क्षणात् शीघ्रं साधयितुं कीदृक् द्विषि शत्रावसाधुक्षयकारि नृपे मूलराजे साधु अभ्यु
दयकारि शंकुर्हि छायामानानयनाय आतपवति समभूभागे स्थाप्यते तेन च फलोमीयते कालमानेन च लग्नं साध्यते छायायां शंकुमादधुरि
त्यनेन यात्रालग्नदिनस्य राज्ञो बहुगुंठनात् घातपातरहितत्वेन साधुत्वं बोध्यते॰ स्वं प्रसत्साधन्साधूनसाधूंश्चागणयन्वेत्रिणांपतिः साधून्
स्वामिनितत्कार्येनिपुणांश्चायतो व्यधात् ६४ वेत्रिणांपतिः प्रतिहारेशः स्वामिनि मूलराजे साधून् भक्तान् तत्कार्ये स्वाम्यर्थे निपुणान् विधानचतुरान्
अग्रतो मूलराजस्य पुरतो व्यधाच्चक्रे कीदृक् सन् अतिस्वामिभक्तत्वात् स्वमात्मानं प्रति असाधून् अभक्तान् साधूंश्च भक्तान् अगणयन् परिभा
वयन्॰ हसंतो निपुणा भ्रातुः पितुः साधंश्चशास्त्रिणः प्रतीशांनिपुणास्तस्थुः श्रेण्याद्वारेंगरक्षकाः ६५ अंगरक्षकाः श्रेण्या पंक्त्या द्वारे तस्थुः
किंभूताः संतः ईशां स्वामिनं प्रति निपुणा रक्षाचतुरा अत एव भ्रातुर्निपुणात् भ्रातेवनिपुणान् मन्यमानान् पितुः साधून् पितेवसाधून्मन्यमानान्
भटान् हसंतः तथा शास्त्रिणः प्रहरणहस्ताः ज्योतिषेधीतिन इत्यत्र व्याप्येक्तेनइतिसप्तमी॰ व्याप्यइतिकिं जन्म अधीतिनो ज्योतिषे अत्र जन्मनो
६ माभूत् छायायांशंकुमादधुरित्यत्र युक्तेहताविति सप्तमी॰ द्विष्यसाधु[…]त्यत्राप्रतीत्यादिना सप्तमी अप्रत्यादाविति किं स्वंप्रसत्साधून् नृपसा
ध्विसत्र साधुनेति सप्तमी अप्रत्यादाविसेव स्वंप्रतिसाधून् तत्कार्येनिपुणान् स्वामिनिसाधून्निसत्र निपुणैरित्यादिना सप्तमी अर्चायामितिकिं भ्रातु
र्निपुणान् पितुः साधून् अप्रत्यादाविसेव प्रतीशांनिपुणाः भूत्यानामधिचौलुक्योध्यद्रिषु क्ष्माभुजां बलं उपरवार्यामिव द्रोणे मिलत्यागाद्बुले
धिकं चौलुक्येऽधिभूतानां मूलराजस्येशस्य किंकराणामध्यद्रिषु क्ष्माभुजामीशे[…]षु पर्वतेषु स्वामिनां राज्ञां बलं सैन्यं बलं मूलराजसैन्ये मिल
तिसति अधिकमपर्याप्तं मागाद्यर्था[…] तन्मध्य एव॰ उपरवार्यां द्रोणइव यथा खार्यां षोडशद्रोण्यां द्रोणश्चतुराढकी अधिकइत्यर्थः एताव
न्मूलराजममिलद्यावति बहूनामप्यद्रिनृपाणां खार्यां द्रोणतुल्यमभूदित्यर्थः वेणोर्ध्वनतिभेर्यास्वभेर्यां वेणुरपि क्षणात् आसीनेषु द्विजे
ष्वापुः स्वंभूतापुष्पच द्विजाः ६६ वेणुशब्देनात्र वेणुपलक्षितं प्रेक्षणकमानिप्यज्यते भेरीशब्देन च भेर्युपलक्षितं तूर्यं ततो वेणौ वंशोपलक्षि
ते प्रेक्षणिके ध्वनति लयप्रधानं वाद्यमाने वेणुवीणादिभिः शब्दायमाने भेरीभर्युपलक्षितं तूर्यं प्रेक्षणकस्याविप्राभावार्थमपानिध्वानं स्थिता
तथा भेर्यां तूर्यध्वनं त्यां वेणुरपि प्रेक्षणकमपिक्षणात् स्तानिरर्थकत्वात् यात्रार्थमुद्यतेहि नृपे उत्सवार्थं पर्यायेण प्रेक्षणकं तूर्यवादनं चस्यात्
तथा द्विजेष्वासीनेषु द्रव्यप्राप्तिरहितेषु सुता भट्टाः स्वंद्रव्यमापुर्लेभिरे एषु च सत्स्वासीनेषु द्विजाः स्वमापुः यात्रार्थमुद्यतोहि राजा धीराश्च

८

गुणोत्कीर्तकेभ्यो भट्टेभ्यो यशसे वेदपाठिभ्यो द्विजेभ्यश्च धर्मार्थं द्रव्यं ददाति स्म अध्यद्रिषु क्ष्माभुजामीशे अधिचौलुक्ये भूत्यानामित्यत्र स्व
शेधीनेति सप्तमी अधिः स्वस्वामिसंबंधं द्योतयति उपरवार्यां द्रोण इत्यत्रोपोधिकिनीति सप्तमी उपोधिकां अधिकसंबंधं द्योतयति बलेमि
लत्यागादित्यत्र यद्भावइत्यादिना सप्तमी॰ यत्र क्रियार्हाणां कारकत्वं तद्विपर्ययो वा यथा भेर्यां ध्वनंत्यां। वेणुरास्त द्विजेष्वासीनेषु स्वं सुता
आपुः यत्र च क्रियानर्हाणामकारकत्वं तद्विपर्ययो वा यथा सुतेष्वासीनेषु द्विजाः स्वमापुः वेणौ ध्वनति भेर्यास्ति तत्रापि भावाभावस्य
लक्षणं भवतीत्यनेनैव सप्तमी यत्र च वेण्वपेक्षया॰ उदात्तध्वानत्वेमेव वाद्येषु मुख्यत्वेन च ध्वानक्रियार्हत्वाद् भेर्याः सुतापेक्षया तपश्च
रणादिक्रियाप्रधानत्वेन दानक्रियार्हत्वात् द्विजानां च क्रियार्हता भेर्यापेक्षया वेणोर्द्विजापेक्षया सुतानां च ध्वानदानक्रियानर्हत्वेन क्रि
यायामर्हता ग्रामो योयोजनान्यष्टौ योजनेषु दशास्थितः पर्वण्यह्नि त्रयोदश्यां यात्रां द्रष्टुं स आययौ ६८ यथात्र योदश्यास्तिथेः सका
शात् अह्नि दिने चतुर्दशील क्षणे गतेइति गम्यते पर्व पूर्णिमास्यात्तथेतः पत्तनात् यो ग्रामो ग्रामस्थो लोकः अष्टौ योजनानि अष्ट
सुयोजनेषु गतेषु दशसु योजनेषु गतेष्वभूत् सग्रामो यात्रां प्रयाणं द्रष्टुं आययौ नानोत्सववादिना अत्यद्भुतत्वात् दूरदेशस्थोपि लोकः को
तुकेन यात्रां द्रष्टुमागत इत्यर्थः इतो ग्रामो योयोजनान्यष्टौ इतो ग्रामो यो योजनेषु दशास्वित्यत्र गते गम्ये इत्यादिनेकार्थ्यवापक्षे पूर्वेण
सप्तमी अध्वनइति किं॰ त्रयोदश्याअह्नि पर्व अत्रैकार्थ्याभावे पूर्वेण नित्यसप्तमी पौर्यैरुदत्सु बालेषु सीदत्यां ग्रहकर्मणां एयुर्द्र
ष्टुं नृपं श्रेष्ठं नाकिंद्रमिव नाकिनां ६९ बालेषु रुदत्सु मातृविरहेण रुदतो बालान् सीदतां ग्रहकर्मणां अप्रवर्तमानान्न रंधनादीन् ग्र
हव्यापारांश्चानादृत्य पौर्याः कौतुकात् नृपं द्रष्टुमेयुः यतो नाकिनां मध्ये इंद्रमिव नृषु मध्ये श्रेष्ठं रूपैश्वर्यादिगुणैरुत्कृष्टं तरास्विभ्यो
वरायोधा रेजुर्यैः स्थानकस्थितैः विद्धः कोशात् कोशायोर्वा[…] म्रियेत क्षणयोः क्षणात् ७० तरायात्रोपक्रमकाले अस्विभ्यो अ
स्त्रं धनुरस्त्येषां तेभ्यो वराधनुर्धरेषु श्रेष्ठा योधा रेजुः स्वावसरप्राप्तिसंभावनया तेजस्विनो भवन् यैर्योधैः स्थानकस्थितैरालीं
ढादिस्थानावस्थितैः सद्भिः कोशात् गव्यूत्यर्धात् कोशायोर्वा विद्धः सन् क्षणयोरल्पकालभवयोः क्षणाद्वा पूर्वं वा अत्रापियो मान
ज्यः म्रियेत यैर्दूरवेध्यवधिनो महाप्राणाश्चेत्यर्थः संभावने सप्तमी सीदतां ग्रहकर्मणामेयुः रुदत्सु बालेष्वित्यत्र षष्ठी चा
नादरे इति षष्ठीपक्षे पूर्वेण सप्तमी नाकिनां नृषु श्रेष्ठमित्यत्र सप्तमीन्वेत्यादिना षष्ठीसप्तम्यौ अन्ये तु पंचमीमपीच्छंति अस्वि

भ्योवरायोधाः स्थितेः कोशात् कोशयोर्वाचिह्नः क्षणात् क्षणयोर्वाम्रियेत इत्यत्र क्रियामध्ये इत्यादिना पंचमीसप्तम्यौ इह धानुष्कावस्था
नमेकाक्रिया पुरुषवधश्च द्वितीया तन्मध्ये क्रोशो क्रोशाद्वा • तथा व्यधनमेकाक्रिया मरणं च द्वितीया तन्मध्ये क्षणः कालः संघट्ट
शीर्णस्त्रीहारे मुक्तानां राजवेश्मनि खार्याः खार्यां व्यधिको द्रोणार्धेन तदाभवत् ७१ तदा यात्रोपक्रमकाले राजवेश्मनि संघट्टना
दन्यान्यसंमर्दनं शीर्णास्त्रुटिता ये स्त्रीहारास्तेभ्यो हेतुभिर्मुक्ताफलानामर्धेन व्याकुलया कथा अधिको अध्यारूढो द्रोणः आढकचतुष्क
मभूत् कीदृश्याः खार्या मुक्तानामेव द्रोणषोडशात्मकात् खार्या रपि अविविक्तार्थः खारिद्वयेन बाधिको ध्यारूढवान् अक्षतक्षेपादि
मांगलिक्यविधये अहमहमिकयागतमहेभ्यकुलस्त्रीणामतिबाहुल्याद् देवंनामसंमर्दनं हारास्त्रुटिता यावता राजगृहांगणे मुक्ताफला
नामेका द्वे वा खार्यौ सार्धद्रोणेनाधिके अभूतां इत्यर्थः अधिको द्रोणः खार्याः अधिको द्रोणः खार्याः इत्यत्र अधिकेत्यादिना सप्तमी
पंचम्यौ अधिको द्रोणार्धेन इत्यत्र तृतीयार्धमीयस इति तृतीया ॥ नाक्षतैश्चंदनान्नादधात्र्र्वयापृथक् न पुष्पेभ्यः फलं दर्वे पात्राणि द
धिरंगनाः ७२ नानापृथक्शब्दाः वसहायार्थाः अंगनाः पात्राणि न दधिरे कीदृशि अक्षतैः खंडतंदुलैश्चंदनात् श्रीखंडद्रवेण च नाना असहाया
नि तथापुष्पेभ्यः फलं च नारिकेरादिकं च ऋते विनाभूतानि अक्षतचंदनदधिदूर्वापुष्पफलोपेतानि पात्राणि राजादिगृहेषु महेभ्यादिकुलांगना
श्चंदनवर्धनादिमांगलिक्यायनयंतीति स्थितिः पृथक् दभः पृथग्दूर्वया नाना चंदनात् नानाक्षतैरित्यत्र पृथङ्नानेत्यादिना पंचमीतृती
फलं ऋते पुष्पेभ्यः ऋते इत्यत्र ऋते द्वितीयेति द्वितीया पंचम्यौ नासन्विनांगरागेण कौसुंभं भूषणात् स्त्रियः तुल्या रतेः श्रिया चंद्रोः
पद्मेन च समै मुखैः ७३ इंदोः पद्मेन च समैस्तुल्यैर्मुखैः कृत्वा रतेः कामपत्न्याः श्रिया च विष्णुभार्यया तुल्याः स्त्रियो नासन् कथं अंगरागेण
कौसुंभं कुसुंभरक्तं वस्त्रं च भूषणाच्च स्वर्णालंकाराच्च विना मंगल्यत्वात् सुरूपा विभूषितालंकृताः सधवाश्च युवतयो राजादिमांगल्य
कर्मसु व्यापृता अभवन् इत्यर्थः विना कौसुंभं विना भूषणात् विनांगरागेणेत्यत्र विनेत्यादिना द्वितीयापंचमीतृतीयाः श्रिया तुल्या र
तेस्तुल्या पद्मेन समैः इंद्रोः समैः इत्यत्र तुल्यार्थैरित्यादिना तृतीयाषष्ठ्यौ दत्ता प्रासादं पूर्वेण गोपुरस्यापरेण च प्राक् प्रयाणादुत्सवन
हेतुना कुंकुमच्छटाः ७४ प्रयाणात् प्राक् प्रथमं उत्सवेन हेतुना यात्रामहोत्सवार्थं कुंकुमच्छटा दत्ताः कुंकुमांबुना अभ्युक्षितमित्यर्थः प्रासादे
पूर्वेण पूर्वाभिमुखात् राजभवनात् पूर्वस्यां महरपर्तिन्यां दिशि गोपुरस्य पूर्वदिगभिमुखस्य पूर्वद्वारस्यापरेण चापरस्यां महरपर्तिन्यां दिशि च प्रासा
दपक्षस्य गोपुरस्य पूर्वत्वात् पुरापक्षस्य च प्रासादात्परत्वात् प्रासादादारभ्य गोपुरं यावदित्यर्थः स्नेहाय हतये भक्तैर्निर्मिता मुदि कारणन नरं द्रदर्श
नस्यार्थस्योत्सुकोऽभूत्लक स्तदा • ७५ स्नेहाय हतये प्रेम्णा हेतुना भक्तैर्निर्मितां मुदि कारणं हर्षार्थं तार्पनं नरेंद्रदर्शनं तस्यार्थस्य नरराजदर्शनस्य हेतु
नावसथा आरंभकाले उत्सुको नाभूत् प्रासादं पूर्वेण गोपुरस्यापरेण मित्र द्वितीयमित्यादिना द्वितीयापष्ठ्यौ अनेन चेतिकिं प्राक्प्रयाणात् उत्सवेन हेतु
ना स्नेहाय हतये भक्तनिर्मिता मुद्दर्शनस्यार्थस्य मुदि कारणे इत्यत्र हत्यर्थैरित्यादिना तृतीयाद्याविभक्तयः याहतु यात्रिनां येदृहुर्दंतिनां मदः हतु नो
त्साधनि धनार्थाय यस्या भटा ग्रामः ७६ सा च्छासा भर्यता हता यस्य हेतोः सुरवामरुत् तत्र हेतोर्नर हरं ग्राम्याभीजया मदान् ७७ यत्र हेतुनो अध्या
दीनां हेपादयो नवंतते हेतुना राज्ञो मलेरा जा ह्यामहात्सजयो न हरभावी तीर्थमथ भविष्यति यांजि हेपादिभिर्वा वाविषय हतु नालिने नावि नोयात्रां कार्यस्य
विजयस्यानेक ध्वंसत्विताम लर्थः संतानितकमिति युग्मस्य संज्ञा यदुक्तं एकद्वित्रिचतुष्कं तास्मिन्मुक्तकसंदानितक विशेषक कलापकानि अथ हरविलाक

तथाद्ध्नोद्दर्व यानिपृथगसहायानि ये

नवहुमाननहुना

स्यांतिकं तेजसा ज्वलन् नहरात् श्रेयसां सिंहासनमध्यास्त भूपतिः ७९ अथ सैन्य सज्जनानंतरं भूपतिः सिंहासनमध्यास्त कीदृक् सन् श्रेयसां पु
ण्यानां मंगलकर्मणां यावत् दूरात् निकटस्थः सर्वथा एव लोकस्य इरपि [illegible] राजसामंतादिभ्यान्तिकूट प्रदेशाकृत्वा दनिकटेपि वर्तमानस्तेजसा
प्रतापेनकोशाधाज्वलन् सन् लोकस्यांतिकं तु समीपे इव वर्तमानः नहरात् श्रेयसामिति सिंहासनस्य धाविशेषणं सिंहासनसमीपे हि मुक्तास्वस्तिका
दीनि मांगलिक्यानि कृतानि स्युः ८० इह राज्ञो पुरः कृताविप्राः सर्वोतिकं ननु अंतिका दूरात् शास्त्रगायना आशंतिकं जगुः ८० राज्ञो नृपस्य नृपाह
दूरं समीपं तदा अपगन् विप्राः सुब्राह्मणजातीः पुनः सर्वा विराज्ञातिक वेदमपरात् गुरुपुरोहितजातिः सर्वा विराज्ञातिकातसमीपे आशासाति वंदनपात्र
कंसाविधिमकथयन् गायनाश्च राज्ञोंतिकं निकटे जगुः योहतुः यहेतुः यतहेतुनाप्यर्थाय यतो हेतोस्तत्रहेताविरित्यत्र सर्वादिः सर्वा इति सर्वविभक्तयः
दूरे णराज्ञः दूराच्छ्रेयसां इह लोकस्य इह राज्ञः अंतिकार्थे राज्ञोंतिकेन राज्ञोंतिकात् लोकस्यांतिकं राज्ञोंतिकमित्यत्र दूरांत्यार्थादिना नाड सिद्धि अमरः प्रत्य
यः विप्रः सर्वेषुताः सर्वे सर्वगुरुः गायना इत्यत्र जातीत्यादिना एकार्थो बहुवचन स्थास्मानः सुखमन्यादां भास्यामाद्यवद्यश्रिया इति तर्प्यप्रतिरय
र्जलतमेव गारसी ८० तर्पप्रतिरे वैर्याभामांगलिक्यविधापनाय सिंहासनमध्यासीने राज्ञि विशेषतो वादयमानानां नांदीतर्पाणां व्योमा ता प्रतिरावि
तैः कृत्वा रोदसीजगत अतः कथं किमित्याह अद्यसंप्रति अस्मदुपक्रांविदेस्यानामुच्चतुत्यमानेत्याततां सुखं रूढास्याबो अत एव अद्यावां श्रिया भास्या
मः वध्यहतदूधं मो पार्थायः फल्गुनीच्च भूत • सत्वं जयति विकास्य पुरोधास्तिलकं व्यधात् ८१ पुरोधा अस्य राज्ञो वा त्रा विहितं तिलकं व्यधात् कीदृक्
सन्वचकावदन् किमित्याह तदहं यथिजानेतथा तदूर्धं भ्रमसन्न्याहं सर्वत्र कीर्तयामि यतः किं यः पार्थः फाल्गुनोर्जुनः फल्गुनीभिश्चंद्रयुक्ताभिर्युक्त
कालेऽभवत् जातः स पार्थस्त्वं भवानेव ततः पराक्रमादिगुणोपेतत्वात् तस्मात् जय शत्रुपराभवेन तोत्कृष्टो भव अर्जुनो हि शत्रुपराभवेनात् कृष्टोऽभवदिति धूय
मानअलक्ष्यतां राजानमनुचामरे चा[illegible]शांकमनुफल्गुन्योः किंतु प्रोष्ठपदेतु के ८२ राजानमनुलक्षीकृत्य धूयमानेवी जनीयचालमेमाने चामरे
अलक्ष्यतां ताकरूपक्षित कथमित्याह शशांकं चंद्रमनुलक्षीकृत्य किंतु फल्गुन्यौ किंवा प्रोष्ठपदे धूयमान चामरद्वयमध्यस्था राजा पूर्वाफल्गुन्योः
पूर्वाभाद्रपदयोः तारकयोर्मध्यस्थचंद्र इव लोकैर्ज्ञातिइत्यर्थः यांतुयाम्यां दिशि प्रोष्ठपदासु तव शत्रवः जयत्वं यमधध्वमितिज्यातिर्विदो वदन्
ध्रुवज्यातिर्विदोऽवदन् आ तमनुरूपाश्चाशिषा ८३ः यथाहराजं त्वपशत्रवः ज्याहरिष्यास्य यः प्रोष्ठपदासु प्रोष्ठपदानि पूर्वाभाद्रपदाभिर्वा[illegible]चंद्र
युक्ताभिर्युक्तकाले याम्यां दिशि दक्षिणांदिशं यांतु स्त्रियंतामित्यर्थः प्रोष्ठपदासुहि दक्षिणादिशि यानपुनरागमनं नस्यात यदुक्तं धनिष्ठादर्तीमध्ये चर
तिया व्रजेत् दक्षिणस्यां कृतावस्य पुनरागमनं नहि ततश्च जय त्वं तथा जय त्वं यमधध्वं लक्ष्म्या त्वं वर्धस्वेति • युधामध्यो[illegible] ग्रहालक्ष्याप्यम
स्यभुजाविति कल्याणतिलकाकृत्वा दाराजगुरिवालिनः ८४ अस्य राज्ञः कल्याणहेतुत्वात् कल्याणं कल्याणाय यथा पुरोधसा कृतं यत्तिलकं त
नाकृत्वाः सारभेणदारानीता आलिनोभंगस्य तारा भंगीः जगुरिवगायंतिस्म कथमित्याह इ भुजाय यं युधां लक्ष्म्याः विजयादिश्रियानहा
आश्रयो अत एव युधां अत्यास्थिइति भुजयोगीनानां काचतयोरेव भविष्यज्जयहेतुत्वेन यात्रारंभकाले गानार्हत्वात् या अपि दाराः आकृष्टितिल

कृतरवभद्रपदादिभि

कारुद्यानवंतितास्तस्याः दुर्गानादिकं कुर्वतीत्युक्तिः गोदोग्रामं खलतिकं वनानिदेशमश्मकान् भोकारोन्येपिस्त पासंनमस्कृत्या ग्रतोभवन् ८५ स्प
पुरस्कृ लि पुरस्याति पुरस्कृतः सतेर्विभानः नमः करोतिस्म महालक्ष्म्यै भक्ति पुरस्कृतः ८६ महालक्ष्म्येनमः करोतिस्म नमः शब्दमुच्चारितवान् ननाम
वाइष्टदेवताप्रणाम पूर्वं हियात्राक्रियते इतिस्थितिः कीदृक् सन् भक्तिपुरस्कृतः बहुमानेनप्रेरितः तथाते गोदग्रामादिभोक्तृभिरन्यैश्च नृपैर्विभान् यतः
पुरस्कृ लि पुरस्याति पुरस्यकः कैश्चित् पुरस्त्वेवलिभिः प्रसादपात्रत्वादग्रकीडनशीलैः कैश्चिच्च पुरस्यातिभिर्नृपतिवाय स्थापनायाग्रेलुठद्भिः कैश्चि
च्च पुरस्कृतः विनयात्तीर्णवर्गच्छद्भिः आवांस्त्वास्मावः वयंभास्मा०मः अहं यमिवयंब्रूमइत्यत्र विशेषणेत्यादिना अस्मदो द्वारकस्यार्थो वा बहुवत्व
फल्गुन्यो फल्गुनीषु प्राष्टपदे प्राष्टपदासु इत्यत्र फल्गुनीत्यादिना द्वावर्थौ बहुवद्वा जयत्वं यप्रमेयध्वं युवामथ्यौ यूयंवृता इत्यत्र गुरावित्यौ एकस्मि
कश्चवति द्वावेकश्चार्था बहुवद्वा दाराः गृहाः • देशमस्मकान् गोदाग्रामं खलतिकं वनानीत्यत्र सर्वलिंगसंख्य वस्तुनिस्याद्वारमनुपतति मुख्यापचरितार्था
नुपातिनिश्चयाद्यात्मनिरूढितस्माल्लिंगसंख्योपादानव्यवस्थानुसर्तव्या षष्ठः पादः सामर्थितः ॥ नमस्कृत्य पुरस्कृतः पुरस्त्वेवलि पुरस्याति
पुरस्कृ करित्यत्र नमस्पुरसोरित्यादिनासः गतेरितिकिं नमः करोति अत्र नमः शब्दांतरं नत्वव्ययमिति नमः शब्दस्य कृयोगविकल्पेन गतिसंज्ञावि
धानाद्वा • स्थितंपादैतिरः कृत्वा तिरस्कृत्य नगिरिं गजं तिरः कृतारिः सोध्यास्त तिरस्कृत्या रविंत्विषा ८६ तिरः कृता अंतर्हिताजिता आशा पावनस
तथा समूलराजस्त्विषा नेजसा कृत्वा रविं तिरस्कृत्य अंतर्धायविजित्य अतितेजस्वीभूयेत्यर्थः गजमध्यास्त कीदृशं दृष्ट्वा तिरस्कृत्य नगिरिं ओध्नासे
त्येन परान्ताद्रिं • यदि शैलादप्युन्नतो गजस्तर्हि कथं तमध्यास्ते स्माह यतः पादं तिरः कृत्वा तिरश्चीनं विधाय धावनमर्थः । स्थितं निश्चलीभूतं
गजो हि पार्श्वीयपो पादयामधायेन कृताव्याकृष्टात् नमसावधाव नामयति तिरस्कृत्य रविंत्विषा तिरस्कृत गिरिंगजं सोध्यास्तेत्यनेन • यथा
रविर्गिरिमुदयाचलं आरोहति तथा अयं गजमित्यव्यज्यते तिरस्कृत तिरः कृत्य यत्र तिरसो वेति वासः गतेरितिकिं तिरः कृत्वा अगतत्वेन्नर्थ
विच्छंत्यन्ये तिरस्कृत्वा • पुंस्कादयुनः सपुंस्यानामत्त पुंस्करिणस्तदा विस्पदमलंचक्रे पुंस्त्ववड्भिरधस्कृतं ८७ समत्त राजस्तदा यात्रा
कालेमनाम् तत्कृतः पुमान् पौरुषापत्यश्च यः करीतस्याशिरस्पदं कुंभस्थलस्थानमलंचक्रे करीन्द्रोहि राज्ञाध्यासितः परमपदानिधारणाय ड्भि
रधः पश्चियतेइतिस्थितिः पुंस्करिणः पुंस्त्ववड्भिः पौरुषोपेतखड्गधारिभिः श्चाधस्पदं हस्तिनो अधस्थानमलंचक्रे अधस्पदमित्यत्र शिरोधस
सइत्यादिनासः अथराज्ञः प्रस्थानमंगलं तानामकान्निशातावर्णयति • श्रेयस्कामः सहस्कंसोयस्कुशाधान् यशस्कृते यानसोपश्यतपयस्कुं
भाल पयस्कर्णं शुभंपुरः ८८ सराजापयस्कुंभंजलघटं पुरापश्यत् कीदृक् सन् सहसो बलस्यकंसः पात्रं अतएव अयः प्रधाना कुशाः अत्र
स्त्रायात अंकुशास्यास्ति अयस्कुशावान् सन् यशस्कृते शत्रुजयार्थं प्रार्थं यानं शत्रुं प्रतिगच्छन् अतएव च श्रेयः कामयते निश्रयस्कामः
कुशलार्थी किंभूतं कुंभं पयश्च कर्णो च पयस्कर्णौ ताभ्यां शुभं अभग्नकर्णं जलपूर्णं चेत्यर्थः यात्रायांहि जलपूर्णस्य पूर्णकलशस्य प्रतारदर्शनं महा
शकुनं ■ ऊर्जस्यानंपुनः कारं गीः कारः सव्यतो [illegible] स्य गोः यशस्कृन्मोद्दिषद् दुर्गं रोधस्यानांशांसत्तुः ८९ गोः शांडः सव्यतो राज्ञो वामे
मदेशे पुनर्वारंवारं कारं करणं य [illegible] तद्यथा स्यादेवं गिरं शब्दं करोति गीः कारः सन्नस्य राज्ञो द्विषद्दुर्गं या हारि दुर्गस्थानं रोधस्यानां निपतदं शांसं
तुष्याचेव यथाहं रोधस्यानं सुखं विक्षिपामि तथात्वं द्विषद्दुर्गं विध्यस्यसीति शब्दायमानः शांडो वेद इत्यर्थः कीदृक् ऊर्जस्यानं बलिष्टः तथा य
शृंगं यशो यशस्कृत् ओ ■ बाधं तस्वार्थिकाः • कचिदिति कीवत्वाभावः अतिस्पतत्वात् यशस्तुत्सः यात्रायां ईदृक् • शांडः शकुनराजः ॥ श्रीः ॥

१

रि

याः उरकं तन्त्रकाम य
त

गोः पयस्कं क्षरंत्यस्यस्वः कल्मायांपुरोभुवि पयस्काम्यदधः काम्यदवाः काम्यत्तु ताभवत् ९० अस्य राज्ञो गच्छतः पुरः स्वः कल्मायां क्षीरतरु
च्छायायां तत्तणवृद्धित्वादि गुणरम्यत्वेन स्वर्गतुल्यायां भुविगौर्धेनुरभवत् कीदृशी सती पयस्काम्यन्ती क्षीरकंवत्से न दुग्धपानाय भक्षन्नभदश्वस्ये
च्छुर्गौः काम्यत् नवप्रसूतत्वाज्जलस्याप्यनिच्छुः सुतायतोय स्याः सा अतएव पयस्त्वेहन पयस्कमात्मनः पयोदुग्धं क्षरन्ती स्रवंती गंतुकस्य हीदृक्
गोः शकुनमतल्लिकाय सस्कल्ये श्रेयस्कामः सहस्कंसः पयस्कुंभं अयस्कुशावान् ^ पयस्कर्णं ऊर्जस्यानमित्यत्र अतः कृमीत्यादिना सः अतइतिर्गीः कारः
अनव्ययस्येतिकिं पुनः कारं रोधस्याशंय शस्कलः पयस्कामित्यत्र प्रतायइतिसः अनव्ययस्येत्येव स्वः कल्मायां पयस्काम्यदित्यत्र गोः काम्ये
इतिसः शेरितिकिं अवाः काम्यत अनव्ययस्येत्येव अधः काम्यत ज्योतिष्काम्यत्तु धूः काम्यन् धनुष्कलं भुवंस्त्रियं • ससर्पिष्काम गीष्यांशां
निष्कलंकां सलक्ष्त ९१ सराजा ज्योतिर्लानमिद्धं तियंते धूर्ज्योतिष्काम्यत्तु धूः काम्यन् धुरमिच्छन् शकुननिमित्तादिज्ञमध्ये धुरीणः
सन् स्त्रियमक्षत कीदृशीं धनुष्कलं कुटिलत्वेन चापतुल्यभ्रु वौ यस्यास्तां एतेन रूपवत्त्वमुपलक्षितं तथा असती गीष्यांशां निंद्या गीर्यस्याः
तांशुभवादिनीं तथा निष्कलंकां एक्षत सतीमित्यर्थः कुष्ठादिकलंकरहितां वा तथा सर्पिर्घृतपात्रान्वितां यात्रायांहि ईदृक् स्त्रीदर्शनं हि शकु
नरत्नं • दुश्चापशकुनान्याविष्कुर्वन्त्याविष्कृताधर्मः निष्प्रियबहिष्वयन्सबहिष्कृतदुष्कृतः ९२ बहिष्कृतदुष्कृतो निर्धूतपापः सरा
जा निष्प्रियं नाविविजयसिद्धिं निश्चयेन नितरां प्रीतः कीदृक् सन् आविष्कृतधर्मः प्रकटितयात्रात्साहः सन् दुश्चापशकुनानि श्रमत्वादुर्ल
• भानि पूर्वोक्तानि शकुनानि बहिः प्रासादाद्वाचादेशो अपश्यन् कीदृशानि आविष्कृतं ज्ञापितं शुभं पुण्यं कर्मभयं --गतार्थत्वात् कृतवाष्ट
